CC-0. In Public Domain. Digitization by eGangotri

FJAB-04

फलितज्योतिषम्

आचार्यसेतुः, चतुर्थपत्रम्

मुक्तस्वाध्यायपीठम्

(Institute of Distance Education)

राष्ट्रियसंस्कृतसंस्थानम्

(मानितविश्वविद्यालयः)

प्रश्नभूषणम्

सर्वप्रश्नविचारणा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मुक्तस्वाध्यायपीठम्
(Institute of Distance Education)
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)

FJAB-04

प्रश्नभूषणम्

फलितज्योतिषाचार्यसेतुः,
चतुर्थपत्रम्

खण्डः

१

सर्वप्रश्नविचारणा

पुरोवाक् - प्रो. राधावल्लभत्रिपाठी

प्रथमः पाठः ०८-२५

द्वितीयः पाठः २६-५८

तृतीयः पाठः ५९-८२

चतुर्थः पाठः ८३-११०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रधानसम्पादकः

प्रो॰ राधावल्लभत्रिपाठी
कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

पाठलेखनम्

प्रो. वासुदेव शर्मा
आचार्यो ज्योतिषविभागाध्यक्षश्च
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)
भोपालपरिसरः, मध्यप्रदेशम्,
(०१-०४ पाठाः)

सम्पादनम्

डॉ. विनोदकुमारशर्मा
उपाचार्यो ज्योतिषविभागाध्यक्षश्च
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.वि.),
जयपुरपरिसरः, राजस्थानम्

पाठ्यक्रमसंयोजनम्

डॉ. श्यामदेवमिश्रः
वरिष्ठसहायकाचार्यः, मु.स्वा.पीठम्
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

प्रकाशनम्

डा. रमाकान्तपाण्डेयः
निदेशकः, मुक्तस्वाध्यायपीठम्
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

प्रकाशनवर्षम् : २०१३, पुनर्मुद्रणम् : २०१४, २०१५

ISBN : 978-93-82091-51-6

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

सर्वाधिकारः सुरक्षितः। नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य लिखितरूपेणानुमतिम् अप्राप्य येन केनापि माध्यमेन अस्याः पाठ्यसामग्र्याः कञ्चिदप्यंशं पुनः प्रस्तोतुम् अनुमतिः नास्ति।

प्रयुक्तकागदम् - Agro-based environment Friendly.

पृष्ठविन्यासः

राजीवकुमारसिंहः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

रमाकान्तशर्मा
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पुरोवाक्

राष्ट्रियसंस्कृतसंस्थानं संस्कृतपरम्पराणां प्रचारे प्रसारे च सर्वथा दत्तावधानं विद्यते। निखिलेऽपि भारते संस्थानस्याऽस्य दशपरिसरा विलसन्ति। तेषु तस्मिन् तस्मिन् शास्त्रे कृतभूरिपरिश्रमा आचार्याः तानि तानि शास्त्राणि अध्यापयन्ति। तत्र विविधेषु विद्याप्रस्थानेषु दीक्षां समवाप्य अस्माकम् अनूचानाः शिष्याः सर्वासु दिक्षु संस्कृतपरम्पराया ध्वजम् उत्तोलयन्ति स्थापयन्ति भारतभारत्या नवनवान् मानदण्डान् आविष्कुर्वन्ति च सततं शास्त्रपरम्परासु अभिनवाः सम्भावनाः।

एकविंशशतकम् इदं विद्यते नवसम्भावनानां नवाविष्काराणां नवप्रयोगाणां च कालः। कालेऽस्मिन् नूतनप्रविधीनां वैज्ञानिकसंसाधनानां च प्रयोगेण संस्कृताध्ययनक्षेत्रेऽपि नवा दिश उन्मील्यन्ते। तदेतत्सर्वं मनसि निधाय राष्ट्रियसंस्कृतसंस्थानं दूरशिक्षामाध्यमेन पारम्परिकसंस्कृत-शास्त्राणाम् अध्यापनाय प्रयतते। तदर्थं संस्थानमुख्यालये मुक्तस्वाध्यायपीठनाम्ना स्वतन्त्रः प्रकल्पः संस्थापितः। यस्य स्वाध्यायकेन्द्राणि जम्मू-जयपुर-गुरुवायुर-शृङ्गेरीप्रभृतिसंस्थानपरिसरेषु स्थापितानि सन्ति। एतेन प्रयासेन देशस्य कोणे कोणे स्थिताः शास्त्ररसपिपासवः जिज्ञासवः पुराणीमपि चिरतारुण्यप्राप्तां प्राचीनामपि युगानुरूपां भारतीयां सकलजनहितकारिणीं शास्त्रशिक्षां प्राप्नुवन्ति। कक्षासु नियमितच्छात्रान् अध्यापनपटवः प्राध्यापका यया शैल्या पाठयन्ति तयैव सरलसरलया पद्धत्या लिखितेयं पाठ्यसामग्री भवतः/भवत्या हस्ते विद्यते। विभिन्नेषु संस्थानपरिसरेषु तत्र तत्र नियुक्ताः प्राध्यापका एव शिक्षयन्ति। दूरस्थशिक्षामाध्यमेन अधीयानानां कृते पुनः न केवलं संस्थानस्य प्राध्यापकैः अपि तु राष्ट्रे तस्मिन् तस्मिन् विद्याप्रस्थाने सुनिपुणैः आचार्यैः लिखिता सङ्कलिता सम्पादिता चेयं पाठ्यसामग्री मुक्तस्वाध्यायपीठेन प्रकाश्य प्रेष्यत इति विशेषः।

पूर्वं सत्रद्वये दूरशिक्षामाध्यमेन व्याकरणसाहित्यशास्त्रयोरेव आचार्यपाठ्यसामग्री छात्राणां कृते प्रेषिता। नूतनेऽस्मिन् सत्रे सेयं व्याकरण-साहित्य-फलितज्योतिषशास्त्रेषु शास्त्रावगाहिनीत्याख्यं सेतुपाठ्यक्रममपि विषयीकरोतीति शास्त्राध्ययनप्रकर्षोऽयं जिज्ञासूनां महते हर्षाय उपकाराय ज्ञानाय च कल्प्यते। क्रमेऽस्मिन् नाट्यशास्त्र-पालि-प्राकृत-भाषानुवादादिविविधेषु विषयेषु तथैव शारीरिकशिक्षा-योगशिक्षाप्रभृतिषु प्रमाणपत्रीयपाठ्यक्रमा अपि नातिचिरम् आरप्स्यन्ते। मुक्तस्वाध्यायपीठस्य प्रयासैरेभिः तासु तासु परम्परासु दीक्षिताः सन्तः अध्येतारः भारतवर्षस्य गौरवाभिवृद्धये समधिकतरं प्रयासं विधास्यन्तीति दूरशिक्षायाः पाठ्यक्रमेषु प्रवेशं प्राप्तवतः विद्यार्थिवृन्दान् शुभकामनाभिः सभाजयन् पाठ्यसामग्र्या अस्याः निर्माणे समुल्लासे च स्वप्रातिभं साहाय्यं दत्तवतः विदुषः मुक्तस्वाध्यायपीठस्य प्राध्यापकान् कर्मचारिणश्च वर्धापनततिभिः पुरस्करोति-

(प्रो. राधावल्लभत्रिपाठी)
कुलपतिः
राष्ट्रियसंस्कृतसंस्थानम्,
नवदेहली

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पत्रपरिचयः

राष्ट्रियसंस्कृतसंस्थानस्य मुक्तस्वाध्यायपीठेन प्रवर्तिते सेतुपाठ्यक्रमे ज्योतिषविषयस्य चतुर्थे प्रश्नपत्रे भवतां स्वागतम्। पत्रेऽस्मिन् पाठ्यग्रन्थरूपेण "प्रश्नभूषणम्" नामकः प्रश्नशास्त्रस्य महत्त्वपूर्णः ग्रन्थः निर्धारितः। भवन्तः जानन्ति यत् भारतीयज्योतिषशास्त्रस्य स्कन्धत्रयात्मक-मूलविभागे त्रयः स्कन्धाः प्रसिद्धाः सन्ति। आचार्यवराहमिहिरः कथयति–

ज्योतिषशास्त्रमनेकभेदविषयम् स्कन्धत्रयाधिष्ठितम्।
तत्कात्स्नर्योपनयस्य नाम मुनिभिः संकीर्त्यते संहिता॥

स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ।
होराऽन्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः॥

अत्र स्कन्धत्रयम् संहिता, तन्त्रम्, होरा नाम्ना प्रसिद्धम्। तन्त्रस्कन्धस्यैव नाम सिद्धान्तम् गणितम् च अपि प्रसिद्धम्। वराह-मिहिरकाले पञ्चमशताब्द्याम् त्रयः स्कन्धाः प्रसिद्धाः आसन्। अग्रे गत्वा ज्योतिषशास्त्रस्य (अनेकभेदविषयात्मकस्य) स्कन्धत्रयातिरिक्तस्य स्कन्धद्वयस्यापि प्रचारः अभवत्। तत्र अन्यत् स्कन्धद्वयम् प्रश्नशास्त्रम् शकुनशास्त्रम् इति नाम्ना प्रसिद्धौजातौ। इत्थम् सिद्धान्तपञ्चकस्य चर्चा डॉ. नेमिचन्द्रशास्त्रिणा प्रसिद्धे ग्रन्थे "भारतीय ज्योतिषे" कृता। तत्र सिद्धान्तपंचकमस्ति– होरा, सिद्धान्तः, संहिता, प्रश्नः, शकुनञ्चेति।

अत्र प्रश्नशास्त्रम् तत्कालफलज्ञापकम् शास्त्रम् अस्ति। अत्र ईस्वीयाब्दस्य पञ्चमषष्ठशताब्द्याम् केवलम् प्राश्निकोच्चारितप्रश्नाक्षरैरेव प्रश्नकर्तुः प्रश्नस्य उत्तरिविधिः प्रश्नफलप्रतिपादनं वा प्रश्नशास्त्राधीनमासीत्, परन्तु अग्रे गत्वा प्रश्नस्कन्धान्तर्गतम् विधानत्रयम् प्रसिद्धम् जातम्। तत्र प्रथमः प्रश्नाक्षरसिद्धान्तः, द्वितीयः प्रश्नलग्नसिद्धान्तः तृतीयश्च स्वरविज्ञानसिद्धान्तः।

प्रश्नशास्त्रस्य प्रथमः सिद्धान्तः प्रश्नाक्षरसिद्धान्तः। अतः सर्वप्रथमम् प्रश्नाक्षर सिद्धान्तीयाः प्रश्नग्रन्थाः एव आचार्यैः निर्मिताः, येषु केवलज्ञानप्रश्नचूडामणिः, चन्द्रोन्मीलप्रश्नः, आयज्ञानतिलकः, अर्हच्चूडामणिः इत्यादयः ग्रन्थाः प्रसिद्धाः सन्ति। एतेषाम् ग्रन्थानामाधारम् स्वीकृत्यैव दक्षिणभारते केरलीयप्रश्नशास्त्रस्य अनेके ग्रन्थाः निर्मिताः जाताः। येषु केरलप्रश्नसंग्रहः प्रसिद्धोऽस्ति।

वराहमिहिरपुत्रस्य पृथुयशसः काले प्रश्नलग्नसिद्धान्तस्य प्रचारः प्रसारश्च विशेषतया अभूत्। "षट्पञ्चाशिका" अस्य प्रसिद्धः ग्रन्थः। अग्रे नवमदशमैकादशशताब्दीषु अनेके ग्रन्थाः प्रश्नलग्नसिद्धान्तम् स्वीकृत्य निर्मिताः जाताः। येषु 'भुवनदीकम्' 'ताजिकनीलकण्ठी' च प्रसिद्धौ स्तः। अस्यामेव परम्परायाम् प्रश्नशिरोमणिप्रश्नवैष्णवप्रश्नसिन्धुप्रश्नचण्डेश्वरादिग्रन्थाः अपि प्रश्नलग्नसिद्धान्तमधिकृत्य अनेकैः आचार्यैः लिखिताः। अस्यामेव परम्परायाम् दैवज्ञकुले समुत्पन्नः श्री जीवनाथ शर्मा अनेकान् प्राचीनग्रन्थान् समालोक्य मुहुः स्वपित्रा श्री शम्भुनाथेन सम्मतिम् नीत्वा प्रश्नभूषणनामधेयम् ग्रन्थम् संगृहीतवान्। अस्य आचार्यस्य जन्म १७५० शकाब्दासन्ने आसीदिति कर्णाकर्णिकया श्रूयते। आचार्यजीवनाथदैवज्ञस्य इयम् रचना अन्तिमा रचना अस्ति। यथोक्तम् प्रश्नभूषणग्रन्थस्योपसंहारे –

कृत्वा जातकदर्पणम् प्रथमतः श्री जीवनाथः कृती।
रम्यं भावकुतूहलञ्च परतः पाराशरीवासनाम्॥

विद्वच्चक्रमनोविनोदकरणम् छात्रानुकम्पावशा –
दन्यत् प्रश्नविभूषणम् मुनिमतं ज्ञात्वा परं निर्ममे ॥

इत्थम् चतुर्थपत्रे निर्धारिते प्रश्नशास्त्रस्य प्रसिद्धे प्रश्नभूषणग्रन्थे प्रथमं केन केन भावेन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

किं किं फलं विचार्यमिति संज्ञां प्रथमं निरूप्य, मौष्टिकादिगमनागमनविवाहस्त्री-गर्भसन्ताननष्टद्रव्यविजयपराजयादिविषयानां षोडशाध्यायेषु विवेचनम् कृतमाचार्येण। एतेषाम् समेषाम् विषयानाम् पञ्चखण्डेषु विंशतिपाठैः भवताम् कृते अध्ययनसामग्री प्रस्तूयते।

सेतुपाठयक्रमे भवन्तः ज्योतिषशास्त्रस्याध्ययनार्थम् कृतभूरिपरिश्रमाः प्रश्नशास्त्रस्यापि आधारभूतानाम् सिद्धान्तानाम् ज्ञाने कुशलाः भवेयुः, अथ च जन्मकुण्डलीम् विनापि तात्कालिकप्रश्नानाम् समाधाने झटिति प्रश्नकुण्डलीं निर्माय प्रश्निकलक्षणानाम् परीक्षणम् कृत्वा प्रश्नविद्याप्रवीणत्वम् सम्पाद्य, विविधप्रश्नानाम् समुत्तरविधौ दक्षाः भवेयुः इति धिया प्रश्नपत्रोऽयम् निर्धारितः। प्रश्नपत्रेऽस्मिन् निर्धारितः प्रश्नभूषणनाम्ना प्रसिद्धः ग्रन्थः लघुकलेवरोऽपि महत्त्वपूर्णानाम् प्रश्नानाम् समाधानेऽतिमहत्त्वपूर्णः। मन्येऽयं ग्रन्थः भवताम् कृते प्रश्नशास्त्रज्ञानार्जने साहाय्यम् कृत्वा भवताम् प्रश्नविद्याप्रवीणत्वम् सम्पादयिष्यतीत्याशासे।

—◆—

खण्डपरिचयः

मुक्तस्वाध्यायपीठस्य शास्त्रावगाहिन्याः ज्योतिषविषयकसेतुपाठ्यक्रमे चतुर्थपत्रे भवतां स्वागतम्। भारतीयज्योतिषशास्त्रे मानवजीवनस्य शुभाशुभफलज्ञानार्थम् अनेकाः पद्धतयः निर्धारिताः सन्ति। समग्रस्य जीवनस्य शुभाशुभम् जन्मसमयाधीनम् भवति। जन्मसमयम् जन्मतिथिञ्चाधारीकृत्य जन्मस्थानीयाक्षांशादिना यज्जन्मकुण्डलीचक्रं निर्मीयते तद्वशात् मानवजीवने जन्मतः मृत्युपर्यन्तम् शुभाशुभफलम् विचार्यते। परन्तु सर्वेषाम् प्रश्नानाम् समाधानम् जन्मकुण्डली द्वारा भवितुम् नार्हति। अतः ज्योतिषशास्त्रे एका शाखा 'प्रश्नतन्त्रम्' इति नाम्ना प्रसिद्धा जाता। तत्र त्रिविधाः सिद्धान्ताः प्राप्यन्ते। प्रथमः – प्रश्नलग्नसिद्धान्तः, द्वितीयः – प्रश्नकालीनस्वर सिद्धान्तः, तृतीयः प्रश्नाक्षरसिद्धान्तः।

प्रथमे प्रश्नलग्नसिद्धान्ते प्रश्नसमयम् जन्मसमयवत् महत्त्वपूर्णम् स्वीकृत्य प्रश्नलग्नम् ज्ञात्वा प्रश्नकुण्डलीम् निर्माय महत्त्वपूर्णप्रश्नानाम् समाधानम् क्रियते।

द्वितीये प्रश्नकालीन स्वरसिद्धान्ते – प्राश्निकस्य दैवज्ञस्य च वामदक्षिणनाडिकास्वर (श्वासोच्छ्वास) भेदेन इडापिङ्गलासुषुम्नानाडीभेदेन वा मानवजीवने ब्रह्माण्डवादस्य पूर्वनिश्चय वादस्याधारभूमिम् स्वीकृत्य विभिन्नप्रश्नानाम् समाधानम् क्रियते।

तृतीये प्रश्नकर्त्रा उच्चारितप्रश्नाक्षरैः जगत्त्रयव्याप्तमातृका (वर्णमाला) वशेन मानसिकस्थितेः पूर्वभूमिकाम् विज्ञाय विभिन्नप्रश्नानाम् समाधानम् क्रियते।

अत्र भवन्तः चतुर्थपत्रे सेतुपाठ्यक्रमे प्रथमखण्डे 'प्रश्नभूषणम्' नाम्ना प्रसिद्धग्रन्थस्या-धारम् स्वीकृत्य प्रश्नलग्नसिद्धान्तानुसारम् विभिन्नप्रश्नानाम् समुत्तरविधिम् पठिष्यन्ति।

खण्डेस्मिन् चत्वारः पाठाः सन्ति। येषु प्रथमे पाठे प्राश्निकदैवज्ञयोः लक्षणानि भावराशिग्रहाणाम् सामान्यपरिचयः ग्रन्थप्रयोजनम् मङ्गलादिकम् च विवेचितम्। द्वितीये पाठे 12 भावेभ्यः विचारणीयविषयाः, शुभाशुभग्रहाः, फलविचारविधयः तत्रोपयोगीनि तुङ्गमित्रादीनि, ग्रहाणां बलाबलम्, ग्रहस्वभावः, शयनाद्यवस्थानिरूपणम् च पठिष्यन्ति। तृतीये च पाठे सर्वप्रश्नोपयोगिविषयः निर्दिष्टः तत्र चत्वारः कार्यसिद्धियोगाः महत्त्वपूर्णाः सन्ति। तत्र प्रथमतया प्रश्नकर्तुः कपटभावपरीक्षणस्य प्रश्नलग्नद्वारा एकः विशिष्टः प्रकारः अपि पाठेऽस्मिन् निर्दिष्टः। प्रसंगवशादन्यप्रश्नग्रन्थोक्तकपटप्रश्नलक्षणान्यपि निर्दिष्टानि। कार्यसिद्धियोगान्तरविचारे शुभाशुभवर्गनिरूपणम् तेषाम् च प्रयोगेन उदाहरणान्यपि यथासम्भवम् निर्दिष्टानि। चतुर्थः पाठः खण्डस्यास्य मौष्टिकादिप्रश्नविचारे हृदयगतप्रश्नविचारेऽतिमहत्त्वपूर्णः पाठः। यस्याध्यनेन भवन्तः प्रश्नकर्ताद्वारा अनुक्तमपि प्रश्नम् धातुमूलजीवेति विभागत्रये ज्ञातुं शक्नुवन्ति, तत्र ग्रह नवांशदृष्टिसम-विषमराशिगतनवांशादिभेदैः स्वनवांशपरनवांशादिपरीक्षणैः मुष्टिगत वस्तूनाम् निर्देशने, मूकप्रश्नविचारे, हृद्गतविचारपरीक्षणे समर्थाः भवितुम् शक्नुवन्ति।

—◆—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रथमः पाठः (संज्ञानिरूपणम्)

पाठसंरचना

१.१ प्रस्तावना
१.२ उद्देश्यम्
१.३ मङ्गलाचरणम्
१.३.१ मङ्गलाचरणे सूर्यस्य वैशिष्ट्यम्
बोधप्रश्नाः
१.४ प्रश्नशास्त्रस्य परम्परा
१.४.१ ग्रन्थनिर्माणस्यावश्यकता
बोधप्रश्नाः
१.५ प्रश्नविद्याप्रवीण (दैवज्ञ)स्य लक्षणम्
१.५.१ वराहोक्तदैवज्ञलक्षणानि
१.५.२ गणितविद्याकुशलः, विविधविषयविशेषज्ञः एव प्रश्नविद्याप्रवीणः
बोधप्रश्नाः
१.६ प्राश्निकलक्षणम्
१.६.१ प्रश्नकरणार्थम् अधिकारी कः?
१.६.२ प्रश्नविधिः
१.७ द्वादशभावाः द्वादशराशयः राशिस्वामिनश्च
१.७.१ द्वादशभावाः
१.७.२ द्वादशराशयः
१.७.३ राशीनाम् स्वामिनः ग्रहाः
१.७.४ राशिस्वामिविषये विशेषः
१.७.५ सूर्यचन्द्रयोः ग्रहत्वविषये विशेषः
बोधप्रश्नाः
ग्रन्थस्य मूलपाठः
१.८ सारांशः
१.९ शब्दावली
१.१० सन्दर्भग्रन्थाः
१.११ सहायकग्रन्थाः
१.१२ बोधप्रश्नोत्तराणि

१.१ प्रस्तावना

प्रथमखण्डस्य सर्वप्रश्नविचारणात्मकस्य प्रथमे पाठे संज्ञानिरूपणाख्ये भवताम् स्वागतम्। भवन्तः सर्वप्रथमम् सूर्यप्रार्थनात्मकम् मंगलम् कृत्वा प्रश्नशास्त्रे प्रवेशार्थम् पटुत्वम् प्राप्य प्रश्नविद्याकुशलः दैवज्ञः कथम् भवति, प्राश्निकश्च केन विधिना दैवज्ञपार्श्वे गत्वा प्रश्नम् कुर्यात्, अस्य समाधानार्थं उपयोगिविषयाध्ययनम् अनिवार्यमिति मत्वा पाठस्यास्याध्ययने प्रवृत्ताः भविष्यन्ति। प्रारम्भतया १२ भावाः, १२ राशयः, ग्रहाः, तेषाम् च स्वामित्वरूपेण राशिषु आधिपत्यम् कथम् इति ज्ञानमनिवार्यमस्ति। प्रायः ग्रन्थेषु संज्ञाप्रकरणम् महत्त्वपूर्णम् भवति तथैवात्र प्रश्नभूषणे संज्ञाप्रकरणात्मकप्रथमाध्यायस्य ज्ञानमनिवार्यम्।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१.२ उद्देश्यम्

'प्रश्नभूषणम्' ग्रन्थस्य प्रथमोऽध्यायः संज्ञाध्यायनाम्ना प्रसिद्धः। अत्र प्रथमे पाठे भवन्तः संज्ञाध्यायोक्तनिम्नविषयान् ज्ञास्यन्ति –

- मङ्गलाचरणेन भगवतः सूर्यस्य ध्यानम्।
- प्रश्नशास्त्रस्य परम्परायाः संक्षेपण दिग्दर्शनम्।
- प्राश्निकस्य, प्रश्नविद्याप्रवीण (दैवज्ञ)स्य च लक्षणानि।
- द्वादशभावाः, द्वादशराशयः, राशीनां स्वामिनः।
- सूर्यचन्द्रयोः ग्रहत्वविषये विशेषः।
- राशिस्वामित्वप्रसंगे ग्रहेषु राशिविभाजनस्य रहस्यम्।

१.३ मङ्गलाचरणम्

प्रायः सर्वेषु ग्रन्थेषु ग्रन्थकर्ता विघ्ननिवारणार्थम् मङ्गलाचरणम् करोति। अस्मिन् "प्रश्नभूषणग्रन्थे" अपि ग्रन्थकर्ता पण्डितप्रवरः श्री जीवनाथझामहोदयः – अनेकमुनीनाम् मतम् सङ्गृहय, दुग्धान्तर्गतघृतमिव प्रश्नशास्त्रसारम् अनेकेभ्यः प्रसिद्धप्रश्नशास्त्रग्रन्थेभ्यः समुद्धृत्य निर्विघ्नग्रन्थसमाप्तये आशीर्वादात्मकनमस्करात्मकवस्तुनिर्देशात्मकेति मङ्गलाचरणम् त्रिविधत्वम् मनसि निधाय ज्योतिषशास्त्रस्याधिष्ठातृदेवताराधनस्वरूपम् मङ्गलम् प्रस्तौति –

जगत्पद्मम् भानावुदयमुपयाते क्षितितले
श्रिया साकं प्रीत्या विकसति समन्तादरमिदम्।
प्रवर्तन्ते यज्ञा दिवि दिविषदो यान्ति परमम्
विनोदत्वम् यस्मिन् स दिशतु पटुत्वं दिनमणिः॥

पदच्छेदः

जगत्, पद्मम्, भानौ, उदयम्, उपयाते, क्षितितले, श्रिया, साकम्, प्रीत्या, विकसति, समन्तात्, अरम्, इदम्, प्रवर्तन्ते यज्ञा, दिवि, दिविषदः, यान्ति, परमम्, विनोदत्वम् यस्मिन्, स दिशतु, पटुत्वम्, दिनमणिः।

अन्वयः

यस्मिन् भानौ, उदयम्, उपयाते, क्षितितले, जगत् पद्मम्, श्रिया, साकम् प्रीत्या, अरम्, समन्तात् विकसति। यज्ञाः,च प्रवर्तन्ते। दिविः दिविषदः परमम्, विनोदत्वम् यान्ति। सः दिनमणिः पटुत्वम्, दिशतु।

प्रतिपदार्थः

"यस्मिन्" भानौ = सूर्ये, उदयम् = स्वस्वदेशीयोदयक्षितिजम् , उपयाते = उद्गते (सति), क्षितितले = क्षितेः पृथिव्याः तले पृष्ठे भूपृष्ठे इत्यर्थः, "सूर्योदये सति" इति फलितार्थः। जगत् पद्मम् = संसाररूपीकमलम्, श्रिया = शोभया प्रकृतिप्रसादेन प्रेम्णा हर्षेण वा "न तु सूर्यतेजसा मालिन्येनेत्यर्थः" अरम् = सत्त्वरं शीघ्रं वा, समन्तात् = आसमन्तात् चतुर्षु दिक्षु, विकसति = विकासम् प्रफुल्लतां वा प्राप्नोतीत्यर्थः। सूर्य एव प्रकाशकः अतः सूर्योदयेन सदैव समस्तजगति प्रकाशो भवतीति फलितार्थः। वेदेऽपि "आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतम् मर्त्यञ्च। हिण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्"मन्त्रेऽस्मिन्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सूर्य एव समस्तभुवनानाम् प्रकाशकत्वात् द्रष्टा रूपेण व्याख्यातः। यज्ञाः = अग्निष्टोमादयः दर्शपौर्ण मासादयो वा, प्रवर्त्तन्ते = प्रारभ्यन्ते। अर्थात् यत्र यत्र भूमण्डलस्य यस्मिन् यस्मिन् भागे क्षितिजे वा सूर्योदयो भवति तत्र तत्र यज्ञाः भवन्ति इत्यर्थः। तैश्च यज्ञैः दिवि = आकाशे स्वर्गलोके वा दिविषदः = तत्रस्थाः निवासिनः देवताः, परम् = अत्यन्तम् उत्कर्षरूपम् इत्यर्थः, विनोदत्वम् = आनन्दमग्नताम्, यान्ति = प्राप्नुवन्ति आनन्दम् अनुभवन्तीत्यर्थः। एतादृशः भगवान् दिनमणिः = दिवा सूर्यः आकाशे मणिवत् प्रकाशकत्वात्, दिनस्य मणिः इति दिनमणिः, पटुत्वम् = ग्रन्थनिर्माणे ज्योतिषज्ञाने च तीक्ष्णमतित्वम् दिशतु = प्रयच्छतु।।

१.३.१ मंङ्गलाचरणे सूर्यस्य महत्त्वम् (भावार्थः)

मङ्गलाचरणेऽस्मिन् ग्रन्थकर्ता श्री जीवनाथः ज्यौतिषाम् आराध्यम् सूर्यम् नमस्करोति, कथयति च यत् यस्य सूर्यस्य उदये सति जगतः सर्वाः क्रियाः विकसितकमलवत् प्रसृताः भवन्तिः तथा च शीघ्रमेव सूर्यादयानन्तरम् प्रकृतिरूपी श्रीः अपि सर्वत्र प्रसृता जायते अथ च सूर्योदयात् एव दर्शपौर्णमासादयः, नित्यनैमित्तिकाः यज्ञाश्च अनुष्ठीयन्ते, तैश्च यज्ञैः स्वर्गस्थाः देवताः परमहर्षे निमग्नाः सन्तः निरन्तरम् आनन्दमनुभवन्ति, यतो हि "यतस्ते यज्ञांशभुजः यज्ञाश्च तदधीनाः" एतादृशः सूर्यः अस्मभ्यम् पटुत्वम् ददातु। यतो हि – "ग्रन्थकर्तृभ्यः पटुत्वम् तीक्ष्णबुद्धित्वम् सर्वत्र अपेक्षते ।।"

बोधप्रश्नाः

१. जगत्पद्मम् कदा विकसति?

.....

.....

२. जगत्पद्मम् कया साकं विकसति?

.....

.....

३. दिवि शब्दस्य किम् तात्पर्यम्?

.....

.....

४. दिविषदः के सन्ति?

.....

.....

५. ग्रन्थकर्ता दिनमणिं प्रार्थ्य किं वाञ्छति?

.....

.....

१.४ प्रश्नशास्त्रस्य परम्परा

प्रेयांसः छात्राः भवन्तः जानन्ति यत् यथा जन्मकुण्डलीद्वारा जातकशास्त्रफलपरम्परा भारतीयज्योतिषशास्त्रे प्रसिद्धा, तथैव तात्कालिकप्रश्नानाम् फलज्ञानार्थम् (प्रश्नोत्तरम् दातुम्)

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आचार्यैः प्रश्नशास्त्रपरम्परायामपि अनेके प्रश्नग्रन्थाः प्रश्नलग्नसिद्धान्तमधिकृत्य विरचिताः । तस्याम् परम्परायाम् पञ्चमशताब्द्याम् वराहमिहिरपुत्रः पृथुयशाः षट्पञ्चाशिकाग्रन्थम् व्यरचयत्। आचार्य दुर्गदेवः १०८९ विक्रमसम्वत्सरे रिष्टसमुच्चयग्रन्थे (अंगुलिप्रश्नम्, अलक्तप्रश्नम्, गोरोचनप्रश्नम्, प्रश्नाक्षरप्रश्नम्, शकुनप्रश्नम्, अक्षरप्रश्नम्, होराप्रश्नम्, लग्नप्रश्नम्) अष्टौ प्रश्नान् विवेचितवान्। आचार्यः पद्मप्रभूसूरिः १२९४ विक्रमसम्वत्सरे भुवनदीपकम् विरचितवान्। ज्ञानप्रदीपिकाख्योऽपि एकः ग्रन्थः समुपलभ्यते। ताजिकनीलकण्ठ्याः 'प्रश्नतन्त्रम्' अतिप्रसिद्धमस्ति। प्रश्नभूषणटीकाकारः प्रश्नशिरोमणिः - प्रश्नवैष्णवः - प्रश्नसिन्धुः - प्रश्नचण्डेश्वरादिग्रन्थानाम् वर्णनम् करोति। श्री नारचन्द्र उपाध्यायेन १३२४ विक्रम सम्वत्सरासन्नकाले एव "प्रश्नचतुर्विंशतिका" नामकः प्रश्नग्रन्थः लिखितः। अस्यामेव परम्परायाम् आचार्यः जीवनाथ शर्मा १७५० शकाब्दासन्ने जन्म गृहीत्वा आपन्नपञ्चाशद्वर्षावस्थायाम् स्वपितुः श्री शम्भुनाथसकाशात् मुहुः (वारम् - वारम्) प्रश्नतन्त्राणाम् (प्रश्नसिद्धान्तानाम्) ज्ञानम् अधिगम्य प्रश्नभूषणम् दैवज्ञानाम् विनोदाय रचितवान्।

भवन्तः पाठकाः जानन्त्येव यत् प्रस्तावनायाम् अस्माभिः निर्दिष्टमेव यत् यथा जातकशास्त्रस्य परम्परा जन्मकुण्डलीद्वारा फलज्ञानार्थम् महत्त्वपूर्णा अस्ति तथैव विभिन्नप्रश्नानाम् समाधानार्थम् प्रश्नशास्त्रेऽपि अनेके ग्रन्थाः निर्मिताः। अत एव भवताम् पाठयग्रन्थस्य प्रश्नभूषणस्य प्रथमेऽध्याये द्वितीये श्लोके ग्रन्थकारः कथयति (प्रस्तावनारूपेण स्पष्टीकरोति) –

निबन्धम् प्रश्नतन्त्राणामधिगम्य पितुर्मुहुः ।
दैवज्ञानां विनोदाय क्रियते प्रश्नभूषणम् ॥

पदच्छेदः

पितुः, प्रश्नतन्त्राणाम्, निबन्धम्, मुहुः अधिगम्य, दैवज्ञानाम्, विनोदाय, प्रश्नभूषणम्, क्रियते।

अन्वयः

पितुः, प्रश्नतन्त्राणाम्, निवन्धम्, मुहुः अधिगम्य, दैवज्ञानाम्, विनोदाय, प्रश्नभूषणम् क्रियते।

प्रतिपदार्थः

पितुः = ग्रन्थकारस्य जनकात् श्री शम्भुनाथनाम्नः सकाशात्, प्रश्नतन्त्राणाम् = प्रश्नशास्त्रस्य तन्त्रम् सिद्धान्तम् तेषाम् अनेकग्रन्थोक्तविभिन्नसिद्धान्तानाम् निबन्धम् पुस्तकम् "प्रश्नशास्त्रीयम् ग्रन्थान्तरम्" मुहुः मुहुः = वारम् वारम् अनेकवारमित्यर्थः, अधिगम्य = अवगमनम् कृत्वा सम्यक् प्राप्येत्यर्थः। दैवज्ञानाम् = दैवम् भाग्यम् ये जानन्ति ते दैवज्ञाः तेषाम् दैवज्ञानाम् भाग्यज्ञातृणामित्यर्थः, विनोदाय = मनोविनोदाय शास्त्रज्ञानरूपीविनोदः एव येषाम् प्रसन्नताकारणम् तादृशे विनोदायेत्यर्थः। प्रश्नभूषणम् = विविधाः प्रश्नाः प्रश्नकर्तृभिः क्रियन्ते प्रश्ना एव भूषणानि येषाम् एतादृशम् प्रश्नभूषणम् नाम पुस्तकम् ग्रन्थविशेषमित्यर्थः क्रियते = निर्मीयते इत्यर्थः प्रश्नतन्त्र (सिद्धान्त) ज्ञापकाः अनेके ग्रन्थाः सन्ति। यैः एका परम्परा प्रश्नशास्त्रे आरब्धा तस्यामेव परम्परायां यथा भुवनदीपकम्, केरलप्रश्नसंग्रहः प्रश्नमार्गः, तजिकनीलकण्ठी, दैवज्ञवल्लभा, प्रश्नसिन्धुः, प्रश्नचिन्तामणिः इत्यादयः तेषाम् समेषाम् ग्रन्थानाम् (निवन्धानाम्) ज्ञानम्। यत्र तत्र अन्येषु ग्रन्थेषु च तेषाम् विवरणादिकम् मुहुः मुहुः (वारं वारम्) विशेषम् । इति भावः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१.४.१ ग्रन्थनिर्माणस्य आवश्यकता (भावार्थः)

भवन्तः पाठकाः द्वितीयश्लोकस्य प्रतिपदार्थादिकमधीत्य इदम् तु ज्ञातवन्त एव यत् ग्रन्थकर्ता श्री जीवनाथझा कथयति यत् मम प्रश्नशास्त्रीयम् ज्ञानम् प्रश्नतन्त्रस्य अनेकान् ग्रन्थान् अधीत्यैव प्रस्फुटितम् जातम्, तज्ज्ञानम् तेन (ग्रन्थकर्त्रा) स्वपितुः श्रीशम्भुनाथसकाशादेव वारम् वारम् प्रश्नशास्त्रीय (तन्त्रोक्त) निबन्धान् (ग्रन्थान्) अधीत्य प्राप्तम्। तेन च ज्ञानेन एकस्य एतादृशस्य ग्रन्थस्य निर्माणार्थमावश्यकता अनुभूता, यो हि ग्रन्थः अनेकेषु निबन्धेषु (प्रश्नग्रन्थेषु) भूषणरूपेण स्यात् अथ च दैवज्ञानां कृते विभिन्नप्रश्नानां समुत्तरविधौ विनोदस्य प्रसन्नतायाः कारणम् भवेत्। विषयेऽस्मिन् प्रश्नभूषणस्य टीकाकारः दरबारि शर्मा ग्रन्थारम्भप्रयोजने वराहवचनम् उद्धरति –

दैवज्ञस्य हि दैवेन सदसत्फलवाञ्छया।
अवश्ये गोचरे मर्त्यः सर्वः समुपनीयते॥

अश्रौषीच्च पुरा विष्णोर्ज्ञानार्थे समुपस्थितः।
वचनं लोकनाथोऽपि ब्रह्मा प्रश्नादिनिर्णयम्॥

"प्रश्नभूषणम्" निर्मलाविवृतौ, श्लोक सं.-२

बोधप्रश्नाः

६. ग्रन्थकर्त्रा प्रश्नतन्त्रज्ञानम् केन सम्बन्धिना प्राप्तम्?

.....

.....

७. ग्रन्थकर्ता केषाम् विनोदाय ग्रन्थम् अरचयत्?

.....

.....

८. प्रश्नतन्त्रशब्देन किं तात्पर्यम्?

.....

.....

९. निबन्धशब्दः कस्यार्थस्य बोधकः?

.....

.....

१०. ग्रंन्थनिर्माणस्य किमुद्देश्यम्?

.....

.....

१.५ प्रश्नविद्या प्रवीण (दैवज्ञ)स्य लक्षणम्

ज्योतिषविद्यायाः ज्ञाता 'दैवज्ञः' इति कथ्यते। आचार्यवराहमिहिरेण स्वीये ग्रन्थे बृहत्संहिताख्ये एकोऽध्यायः सांवत्सरसूत्राध्यायनाम्ना विलिखितः, तस्मिन् अध्याये दैवज्ञस्य लक्षणानि निर्दिष्टानि सन्ति। तत्र ज्योतिषशास्त्रस्यापि भेदत्रयम् संहिताहोरातन्त्रेति कृतमस्ति। तत्र तन्त्रलक्षणम् –

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

"स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ"

इति कृतमस्ति। तत्रापि प्रश्नभूषणे आचार्यः जीवनाथः "निबन्धम् प्रश्नतन्त्राणाम्" इति पूर्वश्लोके व्यनक्ति।

तत्र तन्त्रज्ञस्य विशेषलक्षणम् प्रतिपादयन् आचार्यः वराहमिहिरः बृहत्संहितायाः द्वितीयेऽध्याये (सांवत्सरसूत्राध्याये) कथयति –

नानाचोद्यप्रश्नभेदोपलब्धिजनितवाक्सारो निकष

सन्तापाभिनिवेषैः कनकस्येवाधि-

कतरममलीकृतस्य शास्त्रस्य वक्ता तन्त्रज्ञो भवति।"

अस्मिन् उपर्युद्धृते वाक्ये अनेकविधप्रश्नानाम् तेषाम् च भेदानाम् उपलब्धिः प्राप्तिजनितवाक्सारः वाक्कौशलम् यस्य पार्श्वे भवति स एव प्रश्नविद्याप्रवीणः भवितुमर्हति। अत एव मङ्गलाचरणेऽपि " स दिशतु पटुत्वम् दिनमणिः" इति प्रार्थनापि ग्रन्थकारेण कृता। अधुना भवन्तः "प्रश्नविद्याप्रवीणः " कः इत्यस्मिन् विषये ग्रन्थकारस्य अभिमतम् ज्ञास्यन्ति। तत्र –

द्विविधगणितविद्यातत्त्वनैपुण्ययुक्तो
बहुविधविषयाणां चातुरीणां धुरीणः।
गुरुजरणसरोजध्यानयोगानुरक्तो
भवति यदि तदाऽसौ प्रश्नविद्याप्रवीणः॥

पदच्छेदः

द्विविधगणितविद्यातत्त्वनैपुण्ययुक्तः, बहुविधविषयाणाम्, चातुरीणाम्, धुरीणः गुरुचरणसरोजध्यानयोगानुरक्तः, भवति, यदि, तदा, असौ, प्रश्नविद्याप्रवीणः।

अन्वयः

द्विविधगणितविद्यातत्त्वनैपुण्ययुक्तः, बहुविधविषयाणाम्, चातुरीणाम्, धुरीणः यदि भवति गुरुचरणसरोजध्यानयागानुरक्तः, तदा, असौ, प्रश्नविद्याप्रवीणः।

प्रतिपदार्थः

द्विविधगणितविद्यातत्त्वनैपुण्ययुक्तः = द्विविधा गणितविद्या तस्याः द्विविधगणित-विद्यायाः व्यक्ताव्यक्तस्वरूपायाः अङ्कगणित-बीजगणितेतिनाम्ना प्रसिद्धायाः यत् तत्त्वम् वास्तविकम् रहस्यं गणितशास्त्रस्येत्यर्थः तस्मिन् तत्त्वे यत्नैपुण्यम् पटुत्वम् तेन नैपुण्येन युक्तः सहितः, यदि भवेत्, "अथ च" बहुविधविषयाणाम् = बहुविधाः विविधाः प्रश्नाः तेषाम् च ये भवन्ति बहुविधाः विषयाः तेषाम्, चातुरीणाम् = प्रश्नोत्तरकलायाः यदस्ति चातुर्यम् तस्य भावना एव चातुरी तासाम् चातुरीणाम्, धुरीणः = कुशलः पटुः इत्यर्थः, यदि भवति = दैवज्ञः एभिः पूर्वोक्तैः लक्षणैः सम्पन्नो भवति चेत्, अथ च गुरुचरणसरोजध्यानयोगानुरक्तः = गुरूणाम् चरणरूपीसरोजयोः कमलयोः यदस्ति ध्यानम् मनोयोगः तस्मिन् योगे यो हि दैवज्ञः अनुरक्तः संलग्नः स भवति गुरुचरणसरोजध्यानयोगानुरक्तः गुरुसेवायां नैरन्तर्येण संलग्न इत्यर्थः, तदाऽसौ तदा एव असौ अर्थात् सः प्रश्नतन्त्रज्ञः दैवज्ञः प्रश्नविद्याप्रवीणः = प्रश्नविद्या प्रश्नशास्त्रे प्रश्नतन्त्रे वा प्रवीणः कुशलः दक्षो वा भवति, अन्यथा न भवति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१.५.१ दैवज्ञलक्षणानि वराहोक्तानि

तत्र ग्रहगणिते पौलिशरोमकवासिष्ठसौरपैतामहेषु पञ्चस्वेषु सिद्धान्तेषु युगवर्षायनर्तुमासपक्षाहोरात्रयाममुहूर्तप्रायत्रुटित्रुटयाद्यवयवादिकस्य कालस्य क्षेत्रस्य च वेत्ता "

" चतुर्णाम् च मानानाम् सौरसावननाक्षत्रचान्द्राणाम् अधिकमासकावमसम्भवस्य च कारणाभिज्ञः"

"सौरादीनाञ्च मानानामसदृशसदृशयोग्यायोग्यत्व प्रतिपादनपटुः"

एतदतिरिक्तम् यो दैवज्ञः एकस्यापि प्रश्नस्य उत्तरं दातुम् न समर्थः स शास्त्रार्थवित् न भवति यथा गर्गवचनमस्ति –

न प्रतिबद्धं गमयति वक्ति न च प्रश्नमेकमपि पृष्टः ।
निगदति न च शिष्येभ्यः स कथम् शास्त्रार्थविज्ञेयः ॥

बृहत्संहिता, सांवत्सरसूत्राध्यायः

प्रिय पाठकाः अनेन निदर्शनेन इदम् तु स्पष्टमेव यत् दैवज्ञः स एव भवितुमर्हति यो हि गणितविद्याप्रवीण प्रश्नोत्तरविधौ कुशलः, नानाचोधप्रश्नभेदोपलब्धिजनितवाक्सारः, गुरुसेवानुरक्तः भवति। अत एव प्रश्नभूषणे प्रथमाध्यायस्युपर्युक्ते तृतीये श्लोके प्रश्नविद्या प्रवीणदैवज्ञस्य लक्षणनिर्धारणे अयमेव भावार्थः फलितो भवति। भट्टोत्पलादयः आचार्याः अपि विषयेऽस्मिन् निर्दिशन्ति –

उत्तमफलितज्ञ ज्योतिर्लक्षणमाह भट्टोत्पलः – "दशभेदम् ग्रहगणितम् जातकमवलोक्य निरवशेषमपि। यः कथयति शुभमशुभं तस्य न मिथ्या भवेद्वाणी"

१.५.२ गणितविद्याकुशलः अनेकविधविषयज्ञाता एव प्रश्नविद्याप्रवीणः (इति भावार्थः)

इदम् तु भवन्तः ज्ञातवन्तः एव यत् दैवज्ञलक्षणवत् प्रश्नविद्याप्रवीणलक्षणेष्वपि गणितशास्त्रे कुशलः प्रश्नशास्त्रोक्तबहुविधविषयेषु भेदानाम् उपभेदानाम् प्रतिपादानार्थम् लौकिकव्यवहारचतुरः अनेकविधप्रश्नानाम् समुत्तरविधौ पटुः, "गुरुशुश्रूषया विद्या" इति वाक्य परिपालकः एव प्रश्नाविद्यायाम् प्रवीणो भवतीति दिक्।

बोधप्रश्नाः

११. वराहोक्तदैवज्ञलक्षणे ग्रहगणितस्य पञ्चसिद्धान्ताः के?

.....

.....

१२. वराहोक्तदैवज्ञलक्षणे शास्त्रार्थविद् दैवज्ञः कः?

.....

.....

१३. प्रश्नविद्याप्रवीणशब्दस्य किं तात्पर्यम्?

.....

.....

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१४. द्विविधगणितम् किम्?

.....

.....

१५. गुरुचरणध्यानस्य किं तात्पर्यम्?

.....

.....

१.६ प्राश्निकलक्षणम्

प्रेयांसः पाठकाः! भवद्भि ज्ञातमेव यत् ज्योतिषशास्त्रग्रन्थेषु दैवज्ञलक्षणानि यथा महत्त्वपूर्णानि सन्ति तथैव प्राश्निकस्यापि लक्षणानि विचार्यन्ते। अथ च प्रश्नविद्यायाम् आदेशकर्ता दैवज्ञः गणितशास्त्रे प्रवीणत्ववदे प्रश्नविद्याप्रवीणत्वम् यथा लभते तथैव यः भवति प्रश्नकर्ता तस्यापि लक्षणानि प्रश्नग्रन्थेषु आचार्यैः प्रोक्तानि सन्ति। अस्मिन् प्रश्नभूषणे संज्ञाध्यायस्य चतुर्थे श्लोके आचार्यः जीवनाथः प्राश्निकलक्षणानि एवम् व्यनक्ति, कथयति च यत् केन विधिना प्राश्निकः दैवज्ञपार्श्वे गत्वा अभीष्टजिज्ञासया प्रश्नम् कुर्यात्। यथा –

शान्तो विवेकी शुद्धात्मा हिरण्यमणिसत्फलैः।
दैवज्ञम् प्रेमभावेन सम्पूज्यार्थम् निवेदयेत्॥ २॥

पदच्छेदः

शान्तः, विवेकी, शुद्धात्मा, हिरण्यमणिसत्फलैः, दैवज्ञम्, प्रेमभावेन, सम्पूज्य, अर्थम्, निवेदयेत्।

अन्वयः

शान्तः, विवेकी, शुद्धात्मा, हिरण्यमणिसत्फलैः, दैवज्ञम्, प्रेमभावेन, सम्पूज्य, अर्थम्, निवेदयेत्।

प्रतिपदार्थः

शान्तः = सुशान्तमनोभावयुक्तः सहनशीलो वा, विवेकी = सत् वा असद् वा इति विचारकुशल इत्यर्थः, शुद्धात्मा = शुद्धः निर्विकारः आत्मा अन्तः करणम् यस्य सः पवित्रात्मा कपटभेदद्वेषादिविकाररहित इत्यर्थः, हिरण्यमणिसत्फलैः = हिरण्यम् सुवर्णम् मणिः मुक्ताप्रवालमरकतादयः सत्फलैः आम्रकदलीदाडिमादयः तैः युक्तः अर्थात् "रिक्तपाणिर्न गच्छेत राजानम् देवताम् गुरुम्" इत्याद्युक्तिम्परिपालयन् प्राश्निकः दैवज्ञ (प्रश्नविद्याप्रवीण) पार्श्वे यथाशक्तिः सुवर्णम्, मणिद्रव्यादिकम् फलम् वा तत्रापि सत्फलम् गृहीत्वा प्रश्नार्थम् गच्छेदिति भावः, दैवज्ञम् = दैवम् भाग्यम् जानीति दैवज्ञः प्रश्नविद्याप्रवीणस्तम् दैवज्ञम्, भाग्यविद् गणकम्, प्रेमभावेन = प्रेमपूर्णः भावः भावना यस्य सः, तेन प्रेमभावनापरिपूर्णेन मनसा, सम्पूज्य = सादम् सप्रश्रयम् श्रद्धाभावनया पूज्यभावनया अर्थात् नमस्कृत्य अभिवादनपूर्वकम् वा परिचयादिकम् प्रदाय, अर्थम् = प्रयोजनम् आगमनकारणम् प्रश्नं वा, निवेदयेत् = कथयेत् अर्थात् नम्रीभूय प्रश्नम् कुर्यादित्यर्थः।

भावार्थः

पाठकैः विज्ञेयम् यत् प्राश्निकस्य उपर्युक्तलक्षणान्येव " ज्योतिषाशास्त्रफलं पुराणगणकैः आदेश इत्युच्यते" इत्यादि भास्करोक्तिम् सत्यीकरणे सहायकभूमिकाम् निर्वहन्ति, यतोहि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रश्नशास्त्रस्यापि एष नियमः यत् यथा दैवज्ञः सम्यक् अभ्यासेन प्रश्नविद्याप्रवीणो भवति तथैव प्राश्निकोऽपि शान्तविवेकशुद्धात्मत्वादिगुणैः युक्तः सन् प्रश्नकरणस्य अधिकारम् प्राप्नोति। एतदतिरिक्तम् प्रष्टा एकमेव प्रश्नम् पृच्छेत् एतादृशः अपि नियमः अनेकग्रन्थेषु प्राप्यते अथ च प्राश्निकस्य कृते राशिचक्रपूजनादिकस्यापि विधानम् तत्र प्राप्यते यथा चिन्तामणिग्रन्थे –

राशिचक्रम् समभ्यर्च्य फलैः पुष्पैः सरत्नकैः।
प्रष्टा सुभूमौ दैवज्ञानेकं पृच्छेत्प्रयोजनम्॥

तत्र साधुः सत्कारादिभावयुक्तः प्रष्टा एव प्रश्नस्याधिकारी भवतीति भावः।

एतदतिरिक्तं स्मृतिरप्याह – विद्याह वै ब्राह्मणमाजगाम गोपाय मां शेवधिस्ते ऽहमस्मि। असूयकायानृजवे शठाय न माम्ब्रूया वीर्यवती तथा स्यामिति।। एच्छास्त्रम् विनीतेभ्यो दीयमानम् सत्सफलम् भवति तदाह –

समरसारग्रन्थे – "विनयावतस्यदीयमाना प्रभवेत्कल्पलतेव सत्फलाय" इति दिक्।

बोधप्रश्नाः

१६. प्राश्निकः आत्मना कीदृशः भवेत्?

.....
.....

१७. दैवज्ञम् केन भावेन पृच्छेत्?

.....
.....

१८. किम् विनिवेद्य प्रश्नम् कुर्यात्?

.....
.....

१९. चिन्तामणिग्रन्थानुसारम् कम् समभ्यर्च्य प्रश्नं कुर्यात?

.....
.....

२०. एककाले कियन्तः प्रश्नाः कर्तुं शक्यन्ते?

.....
.....

१.७ द्वादशभावाः, द्वादशराशयः, राशिस्वामिनश्च

प्रश्नशास्त्रस्य अध्ययनात् प्राक् भवद्भिः प्रश्नकुण्डलीनिर्माणम् विज्ञेयम्। अस्य निर्माणार्थम् आवश्यकप्रक्रिया विधिर्वा ग्रन्थान्तरेभ्यः शिक्षणीयास्ति। अस्मिन् विषये जन्मकुण्डली निर्माणवत् स्पष्टग्रहज्ञानम्, प्रश्नलग्नस्पष्टीकरणम्, द्वादशभावसाधनम्, चलितचक्रनिर्माणम्, पञ्चाङ्गपरिचयः, षड्वर्गदशवर्गषोडशवर्गादीनाम् परिज्ञानम् शिक्षणीयम् भवति। तदर्थम् प्राक्शास्त्रीप्रथमवर्षे ज्योतिषपत्रे (षष्ठपत्रे) निर्धारितपाठयसामग्री "जन्मपत्रदीपकम्" द्रष्टव्यम्। अथ च यथासम्भवम् भवताम् कृते शास्त्रावगाहिन्याः सेतुपाठयक्रमस्य षष्ठपत्रे (ज्योतिषशास्त्रपरिचये) अपि आवश्यकगणितम् प्रश्नशास्त्रोपयोगी, मुहूर्तशास्त्रोपयोगी,

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संहिताशास्त्रोपयोगी वा पठितुम् शक्यते।

अत्र अस्माभिः प्रश्नभूषणे यस्य विषयस्य निर्देशः प्राप्यते, तस्मिन्नेव विषये क्रमशः विचारणा प्रस्तूयते।

१.७.१ द्वादशभावाः

प्रश्नकुण्डल्याम् द्वादशकोष्ठकानि भवन्ति। तेषु कोष्ठकेषु प्रश्नलग्नानुसारम् राशीनाम् अङ्काः स्थाप्यन्ते। एते अङ्काः एकतः द्वादशपर्यन्तम् भवन्ति। तेषु अंकेषु एकादयः अङ्काः मेषादिराशीनाम् बोधकाः भवन्ति। प्रश्नलग्नचक्रे (प्रश्नकुण्डल्यां) वा सर्वप्रथमम् यो हि अङ्कः स्थाप्यते सो हि प्रश्नलग्नराशिः कथ्यते। तदनुसारम् क्रमशः द्वादशभावाः भवन्ति। तेषाम् नामानि सर्वेषु ज्योतिषग्रन्थेषु नाम्ना निर्दिश्यन्ते। अत्रापि प्रश्नभूषणे द्वादशराशीनाम् नामनिर्देशात्पूर्वम् द्वादशभावानाम् नामानि निम्नश्लोके निर्दिश्यन्ते –

तनुकोशसहोदरबन्धुसुता
रिपुकामविनाशशुभाविबुधैः।
पितृभं तत आप्तिरपाय इमे
क्रमतः कथिता मिहिरप्रमुखैः॥ ५॥

पदच्छेदः

तनुः, कोशः, सहोदरः, बन्धुः, सुतः, रिपुः, कामः, विनाशः, शुभः, पितृभम्, ततः, आप्तिः, अपायः, इमे, क्रमतः, कथिताः , मिहिरप्रमुखैः।

अन्वयः

तुनकोशसहोदरबन्धुसुताः, रिपुकामविनाशशुभाः, पितृभम्, ततः आपिरपायः, इमे (द्वादशभावाः), मिहिरप्रमुखैः, विबुधैः, कथिताः।

प्रतिपदार्थः

तनुकोशसहोदरबन्धुसुताः = तनुः प्रथमभावः , कोषः द्वितीयो भावः, सहोदरः, तृतीयो भावः, बन्धुः चतुर्थोभावः , सुतः पञ्चमो भावः, एते पञ्चभावाः, "पुनश्च" रिपुकाम विनाशशुभाः = रिपुः षष्ठो भावः, कामः सप्तमो भावः, विनाशः अष्टमो भावः, शुभश्च नवमो भावः, ततः = तदनन्तरम्, पितृभम् = पितृस्थानरूपे प्रसिद्धः भम् भावः दशमो भावः, तदनन्तरम् च आप्तिः = लाभः आयः प्राप्तिर्वा एकादशो भावः, अपायश्च = अपगतः सन्त्यक्तः आयो यस्मात् स व्ययो भावः इत्यर्थः एते द्वादशभावाः मिहिरप्रमुखैः = आचार्यवराहमिहिरादिभिः विबुधैः = विद्वद्भिः विशिष्टज्ञानयुक्तैः आचार्यैः कथिताः = प्रोक्ताः सन्ति।

द्वादश भावानाम् नामानि

भावार्थः

मिहिरप्रमुखाः वराहमिहिरादयः "नामैकदेशेन नामग्रहणात्" इति नियमेन (न्यायेन) वराहमिहिरप्रभृतिभिः आचार्यैः तनुः लग्नम्, कोशः धनम्, सहोदरः भ्राता, बन्धुः मित्रम्, सुतः सन्ततिः, रिपुः शत्रुः, कामः मदनः, विनाशः मृत्युः, शुभः धर्मः, पितृभम् कर्मस्थानम्, आप्तिः आयः, अपायः व्ययः एताः संज्ञाः द्वादशभावानाम् कृताः सन्ति। एताः संज्ञाः क्रमशः सन्ति यथा दृष्टव्यम् निम्नचक्रम्–

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



अनेन चक्रेण भवन्तः लग्नात् द्वादशभावपर्यन्तम् द्वादशभावानाम् तनुकोशसहोदरबन्धुसुतरिपुकामविनाशशुभपितृआप्तिअपायसंज्ञाः स्पष्टरूपेण ज्ञातुम् समर्थाः भविष्यन्ति।

१.७.२ द्वादशराशीनाम् नामानि

ग्रन्थेऽस्मिन् आचार्येण राशीनाम् नामानि न उक्त्वा राशीनाम् स्वामिनः प्रोक्ताः सन्ति। भवद्भिः पाठकैः राशीनाम् नामानि किम् अन्यग्रन्थेभ्यः पठितव्यानि? इति विचिन्त्य अस्माभिः अत्रैव मेषभतः क्रमशः राशीनाम् नामानि लिख्यन्ते –

मेषः, वृषः, मिथुनम्, कर्कः, सिंहः, कन्या, तुला, वृश्चिकः, धनुः, मकरम्, कुम्भः, मीनम् एताः मेषभतः क्रमशः १२ राशयः सन्ति।

१.७.३ राशीनाम् स्वामिनः

यथा द्वादशराशीनाम् नामानि ग्रन्थेऽस्मिन् न सन्ति। तथैव ग्रहाणाम् नामान्यपि क्रमशः पृथक्तया नोल्लिखिताः। कारणमिदमस्ति यत् ग्रन्थोऽयम् आचार्यकक्षायाम् प्रवेशार्थम् सेतुपाठयक्रमे निर्धारितः। इतः पूर्वम् शास्त्रीकक्षायाम् प्राक्शास्त्रिकक्षायाम् वा ये ग्रन्थाः सन्ति तेषु राशीनाम् नामानि, ग्रहाणां नामानि वा अत्र ग्रन्थाऽध्ययने यत् किमपि अपेक्षते तत्सर्वम् पठितव्यमेव। यद्यपि केचन आवश्यकविषयाः ग्रन्थस्यास्य परिशिष्टभागेऽपि टीकाकारेण निर्दिष्टाः सन्ति। तथापि यत्र-यत्र स्थाने यदपेक्ष्यते तत्र तत्रापि अस्माभिः ते ते विषयाः निर्दिश्यन्ते एव, तस्मिन् एव क्रमे नवग्रहाः एवम् सन्ति –

सूर्यः, चन्द्रः, भौमः, बुधः, गुरुः, शुक्रः, शनिः, राहुः, केतुः।

अत्र विशेषः – भारतीयपरम्परायाम् सूर्यः ग्रहः स्वीकृतः, राहुः केतुः एतौ द्वावपि ग्रहौ छायाग्रहरूपेण फलिते, सिद्धान्तज्योतिषे च पातत्वेन स्वीकृतौ स्तः। सूर्यः "राजा रविः" इत्यादिपरम्परायाम् ग्रहराज अपि कथ्यते। अस्तु अत्र प्रकृतमनुसारमः द्वादशराशीनाम् स्वामिनः ग्रहाः एवम् सन्ति –

मङ्गलशुक्रबुधा विद्युभान् सौम्यकवी कुजदेवगुरू च।
भानुजमन्दपुरन्दरवन्द्या मेषभतः क्रमशः पतयस्ते॥

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पदच्छेदः

मङ्गलशुक्रबुधाः, विधुभानू, सौम्यकवी, कुजदेवगुरू च, भानुजमन्दपुरन्दरवन्द्या मेषभतः, क्रमशः, पतयः, ते।

अन्वयः

ते मङ्गलशुक्रबुधा, विधुभानू, सौम्यकवी, कुजदेवगुरू, भानुजमन्दपुरन्दरवन्द्याः च क्रमशः मेषभतः, पतयः।

प्रतिपदार्थः

ते = मङ्गलादिग्रहाः (आदि शब्देन श्लोकोक्तग्रहः क्रमग्रहणम् कर्तव्यम्) मङ्गलशुक्रबुधाः = मङ्गलशुक्रबुधश्चेति मङ्गलः शुक्रः बुधेश्चेति त्रयो ग्रहाः , (ततः परम्) विधुभानू = विधुश्चन्द्रः भानुः सूर्यः तौ द्वौ ग्रहौ चन्द्रसूर्यावित्यर्थः (ततः परम्) सौम्यकवी = सोमस्य अपत्यम् पुमान् सौम्यः बुधः, कविः शुक्रश्च तौ बुधशुक्रौ, कुजदेवगुरू च = कुजः कुत्सितं जन्म यस्य सः अथवा कु = पृथ्वी तत्सकाशात् जन्म यस्य सः कुजः भौमः अथ च देवगुरुः देवानाम् गुरुः पूज्यः योऽसौ सः देवगुरुः बृहस्पतिरित्यर्थः तौ कुजदेवगुरू मंगलबृहस्पति, (ततः परम्) भानुजमन्दपुरन्दरवन्द्याः = भानुः सूर्यः तस्माज्जायमानः पुत्रः भानुजः शनिरित्यर्थः, मन्दः मन्दम् मन्दम् चलति शनैः शनैः राशिम् भुनक्ति अथवा अतिदूरतरकक्षावशात् मन्द-मन्दगत्या चलन् प्रतीयते स मन्दः शनिरित्यर्थः, पुरन्दरवन्द्यः = पुरन्दरः इन्द्रः तस्य वन्द्यः वन्दनीयः पूजनीयः गुरुपदेऽभिषिक्तत्वात् देववन्द्यः ग्रहः बृहस्पतिः इत्यर्थः ते ग्रहाः भानुजमन्दपुरन्दरवन्द्याः अर्थात् शनिशनिगुरुग्रहाः, मेषभतः मेषतः समारभ्य द्वादशराशीनाम् एते पूर्वोक्ताः ग्रहपतयः = अधिपतयः स्वामिनः वा भवन्तीति।

१.७.४ राशिस्वामिविषये विशेषः

विज्ञाः पाठकाः भवद्भिः सामान्यतो मेषतः समारभ्य मीनान्तम् यावत् भौमादयः ग्रहाः राशिस्वामित्वेन पठिताः। एतत् निम्नचक्रेण स्पष्टतया सरलतया च परिस्फुटम् भवति यथा चक्रम्

राशिस्वामिचक्रम्

स्वामिनः ग्रहाः	भौमः	शुक्रः	बुधः	चन्द्रः	सूर्यः	बुधः
राशयः	मेषः	वृषः	मिथुनम्	कर्कः	सिंहः	कन्या
स्वामिनः ग्रहाः	शुक्रः	भौमः	गुरुः	शनिः	शनिः	गुरुः
राशयः	तुला	वृश्चिक	धनुः	मकरः	कुम्भः	मीनः

एतदतिरिक्तमपि एको विशेषोऽपि अत्र रहस्यत्वेन आचार्यैः ग्रन्थेषु प्रोक्तः यथा प्रश्नभूषणग्रन्थस्य संस्कृतटीकायाम् निर्मलाविवृतौ टीकाकारः श्री दरबारी शर्मा लिखति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



नन्वहोरात्रयोः प्रकाशकत्वेन परमप्रधानयोर्नक्षत्रादीनामधीशयोश्च सूर्याचन्द्रमसोरेव सकलराशीनामधिपतित्वमुचितम्, तत्र कथम् तद्विरुद्धमनयोरेकराशिपतित्वमन्येषाञ्च द्विद्विराशिपततित्वमिति चेत्? सत्यम्, अनयोरेव समविभागेन षण्णां षण्णां राशीनाम् स्वामित्वमासीत्, किन्तु परमकारुणिकाभ्याम् परोपकृद्भ्यामाभ्याम् प्रदत्ता अन्ये ग्रहाः द्विराशिपतयः स्वयञ्च एकैकराशिपतिरिति विभागः। यथाहुः प्राचीनाः –

सिंहादिषट्कस्य पतिर्दिनेशः कर्कादिषट्कस्य पतिर्निशेशः।
ताभ्यां प्रदत्तः क्रमशो ग्रहाणां ज्ञशुक्रभौमेज्यशनैश्चराणाम्॥

प्रश्नभूषणम्, संज्ञाध्यायः, श्लो. 6 विवृतौ द्रष्टव्यम्।

द्वादशराशीनाम् क्रमः यद्यपि मेषराशितः प्रारभ्यते, परन्तु राश्यधिपविचारक्रमे सर्वप्रथमं "राजानौ रविशीतगू इत्यादि" विचारक्रमेण राजानौ द्वौ ग्रहौ सूर्यचन्द्रौ, बुधः युवराजः भौमः सेनापतिः गुरुशुक्रौ मन्त्रीग्रहौ, शनिश्च सेवकः भृत्यो वा ग्रहस्वभावत्वेन ज्योतिषविचारकैः निर्दिष्टाः सन्ति। तत्र सर्वप्रथमम् "कण्ठीरवम् विक्रमिणं विलोक्य" इत्यादि प्रसंगेन राजा सूर्यः तस्य विशिष्टपराक्रमत्वात् राशिमण्डले विशिष्टपराक्रमम् सिंहराशौ विलोक्य राशीनाम् अधिपतित्वम् सिंहानुक्रमतः एव निर्धारितम् अभूत्। यथा पुरुषेषु राजा सूर्यः सिंहाधिपतिः तथा स्त्रीणाम् राज्ञत्वेन चन्द्रः (स्त्रीग्रहः)। तत्वाश्वर्ववर्ती स्त्रीराशेः कर्कस्य अधिपतिः जातः। तदनन्तरम् युवराजः बुधः सिंहकर्कानुक्रमेण च पार्श्ववर्तिद्वयस्य क्रमानुक्रमेण प्राप्तस्य राशिद्वयस्य तुलावृषभयोः स्वामी ग्रहः मन्त्रीपदे नियुक्तः शुक्र एव जातः। एकः मन्त्री गुरुः, परन्तु द्वयोः मन्त्रिणोः मध्ये सेनापतिः भौमः चक्रे उपतिष्ठन्नास्ते अतः तुलायाः क्रमेण वृषस्यानुक्रमेण च प्राप्तस्य राशिद्वयस्याधिपतिः भौमः, एवमेव गुरुर्मीनधन्विनोः, शनिश्च भृत्यः (सेवकग्रहः) सः च चक्रेऽधः स्थित्या मकरकुम्भयोः अधिपतिः निर्धारितः। इत्थमस्माभिः दृश्यते यत् सूर्यचन्द्रौ कारकत्वदृष्टया राज्ञत्वेन प्रारम्भकाले चक्रार्धस्य (षड्राशीनाम्) अधिपत्वने स्वीकृतौ आस्ताम्। सिंहादिषड्राशीनाम् स्वामी सूर्यः तथा च कर्कादिषड्राशीनाम् विलोमक्रमेण स्वामी चन्द्रः आसीत्। एतौ द्वौ राजानौ (रविशीतगू) स्वस्वचक्रार्धस्य प्रथमराशिम् स्वग्रहत्वेन स्वीकृतवन्तौ एवम् च सूर्यः अनुलोमक्रमेण चन्द्रश्च विलोमक्रमेण अग्रिमराशीन्, क्रमेण बुधशुक्रभौमगुरुशनिग्रहेभ्यः प्रयच्छन्। एवम् सूर्यचन्द्रौ एकैकराश्यधिपौ अन्ये ग्रहाश्च राशिद्वयस्य क्रमशः अधिपतित्वेन ज्योतिर्विद्भिः एकमतेन स्वीकृताः।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१.७.५ सूर्यचन्द्रयोः ग्रहत्वविषये विशेषः

पाश्चात्यानां मतेन सूर्यः नक्षत्रम् तारा वा अस्ति। चन्द्रश्च पृथ्व्याः उपग्रहः। इदम् तथ्यम् भारतीयाः अपि जानन्ति स्म। परन्तु सूर्यचन्द्रयोः ग्रहत्वेऽस्ति किञ्चिद्वैशिष्ट्यम्। विषयेऽस्मिन् आचार्यवराहमिहिरस्य आचार्य कमलाकर भट्टस्य, वेदोक्तवचनानि च प्रमाणानि सन्ति।

यथा– आचार्यः वराहमिहिरः बृहज्जातकस्य मङ्गलाचरणे सूर्यविषये लिखति–

मूर्तित्वे परिकल्पितः शशभृतो वर्त्मा पुनर्जन्मनाम्
आत्मेत्यात्मविदाम् क्रतुश्च यजतां भर्तामरज्योतिषाम्।
लोकानां प्रलयोद्भवस्थितिविभुश्चानेकधा यः श्रुतौ
वाचं नस्स दादात्वनेककिरणस्त्रैलोक्यदीपो रविः॥

अत्र "भर्ता अमरज्योतिषाम्" इति कथनेन सूर्यः सर्वेषाम् ज्योतिषाम् भर्ता स्वामी तेजोप्राणविशेषत्वेनापि आख्यातः। ग्रहसत्त्वेऽपि एतत् तत्र वैशिष्ट्यम्। अथ च सिद्धान्ततत्त्वविवेके कमलाकरभट्टः कथयति –

तेजसां गोलकः सूर्यः ग्रहर्क्षाण्यम्बुगोलकाः।
प्रभावन्तो हि दृश्यन्ते सूर्यरश्मिप्रदीपिताः॥

अमरकोषे लिखितमस्ति (चन्द्रविषये) –

"द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः"

श्रुतिः लिखति –

"चन्द्रमा नक्षत्राणामधिपतिः " इति दिक्।

बोधप्रश्नाः

२१. द्वादशभावसंज्ञासु सप्तमाष्टमभावयोः संज्ञा का?

.....
.....

२२. द्वादशभावसंज्ञासु एकादशव्ययभावयोः का संज्ञा?

.....
.....

२३. द्वादशभावसंज्ञासु नवमभावस्य चतुर्थभावस्य च का संज्ञा?

.....
.....

२४. मेषवृश्चिकराश्योः अधिपतिः कः?

.....
.....

२५. कन्यामिथुनयोः स्वामी कः?

.....
.....

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२६. अमरज्योतिषाम् भर्ता कः ग्रहः?

.....

.....

२७. नक्षत्राणामधिपतिः कः ग्रहः?

.....

.....

२८. पुरन्दरवन्द्यः को ग्रहः?

.....

.....

२९. सौम्यग्रहः कः ग्रहः?

.....

.....

३०. कविः को ग्रहः?

.....

.....

ग्रन्थस्य मूलपाठः

जगत्पद्मम् भानावुददयमुपयाते क्षितितले
श्रिया साकं प्रीत्या विकसति समन्तादरमिदम्।
प्रवर्तन्ते यज्ञा दिवि दिविषदो यान्ति परमम्
विनोदत्वम् यस्मिन् स दिशतु पटुत्वं दिनमणिः ॥१॥

निबन्धम् प्रश्नतन्त्राणामधिगम्य पितुर्मुहुः।
दैवज्ञानां विनोदाय क्रियते प्रश्नभूषणम् ॥२॥

द्विविधगणितविद्यातत्त्वनैपुण्ययुक्तो
बहुविधविषयाणां चातुरीणां धुरीणः।
गुरुजरणसरोजध्यानयोगानुरक्तो
भवति यदि तदाऽसौ प्रश्नविद्याप्रवीणः॥३॥

तनुकोशसहोदरबन्धुसुता
रिपुकामविनाशशुभाविबुधैः।
पितृभं तत आप्तिरपाय इमे
क्रमतः कथिता मिहिरप्रमुखैः॥४॥

मङ्गलशुक्रबुधा विद्युभान् सौम्यकवी कुजदेवगुरू च।
भानुजमन्दपुरन्दरवन्द्या मेषभतः क्रमशः पतयस्ते ॥

१.८ सारांशः

कस्यापि ग्रन्थस्य मङ्गलाचारणम् ग्रन्थकारस्य आस्तिकतायाः लक्षणम् भवति। ग्रन्थस्यास्य मङ्गले भगवतः सूर्यस्य उदयात् जगत्पद्मम् विकसति, श्रिया साकं विकसति, यज्ञाः प्रवर्तन्ते,

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

देवाः दिवि विनोदन्ते, एतादृशः सूर्यः पटुत्वम् दद्यात् इति पठितम्। प्रस्तावनायाम् प्रश्नभूषणकर्ता श्री जीवनाथः पितुः सकाशात् ज्ञानम् प्राप्य, प्रश्नतन्त्राणाम् निबन्धम् अधिगम्य, दैवज्ञानाम् विनोदाय ग्रन्थमरचयत् इति ज्ञातम्। अत्र दैवज्ञः यो हि द्विविधगणित (व्यक्ताव्यक्तगणित) विद्यायाः तत्त्वे यत् नैपुण्यम् तेन युक्तः गुरुचरणेषु ध्यानशीलः (गुरुसेवकः) अनेकविध विषयज्ञाता यदि भवति तदा तस्य प्रश्नविद्याप्रवीण इति संज्ञा भवति इत्यपि ज्ञातम्। न केवलम् दैवज्ञः अपि तु प्राश्निकस्य लक्षणम् अपि शान्तः विवेकी, शुद्धात्मा आदि प्रक्रमे पठितम्। प्राश्निकस्य भावोऽपि प्रेमभावः दैवज्ञम्प्रति स्यात् तथा रिक्तपाणिः प्रश्नम् न कुर्यात्। अन्यग्रन्थोद्धृतांशैः इदमपि ज्ञातम् यत् प्राश्निकः राशिचक्रम् समभ्यर्च्य एकमेव प्रश्नम् एककाले कुर्यात्। द्वादशभावानां संज्ञा मिहिरप्रमुखैः आचार्यैः प्रोक्ताः एव अत्र तनुः, कोशः, सहोदरः, बन्धुः सुतः, रिपुः, कामः, विनाशः, शुभः, पितृभम्, आप्तिः, अपायः इत्यादिक्रमे पठिताः। मेषभतः क्रमशः, पतयः (मंगलः, शुक्रः, बुधः, विधुः, भानुः, सौम्यः, कविः, कुजः, देवगुरुः, भानुजः, मन्दः पुरन्दरवन्द्यः) एते ज्ञाताः।

१.९ शब्दावली

१.	जगत्पद्मम्	=	संसारकमलम् ।
२.	अरम्	=	सत्त्वरम् = शीघ्रम्।
३.	दिवि	=	स्वर्गे।
४.	दिविषदः	=	देवताः।
५.	दिनमणिः	=	सूर्यः।
६.	पटुत्वम्	=	शास्त्रे चातुर्यम्।
७.	प्रश्नतन्त्रम्	=	प्रश्नशास्त्रस्य सिद्धान्ताः।
८.	निबन्धम्	=	ग्रन्थम्।
९.	द्विविधगणितम्	=	व्यक्ताव्यक्तगणितम् (अंकगणितम् बीजगणितं वा)
१०.	नैपुण्यम्	=	कुशलता।
११.	गुरुचरणसरोजः	=	गुरोः पादौ।
१२.	प्रश्नविद्याप्रवीणः	=	प्रश्नशास्त्रे दक्षः।
१३.	हिरण्यम्	=	स्वर्णम्।
१४.	अर्थम्	=	प्रयोजनम् (प्रश्नम्) कथनीयम् वा।
१५.	विवेकी	=	सद्विचारकुशलः।
१६.	दैवज्ञम्	=	भाग्यविद्गणकम्।
१७.	विनाशः	=	अष्टमभावः।
१८.	शुभः	=	नवमभावः।
१९.	आप्तिः	=	एकादशः भावः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२०.	अपायः	=	द्वादशः भावः।
२१.	मिहिरप्रमुखाः	=	वराहमिहिरादयः आचार्यः।
२२.	भानुजः	=	सूर्यपुत्रः शनिः।
२३.	मन्दः	=	शनिः।
२४.	पुरन्दरवन्द्यः	=	इन्द्रवन्दनीयः बृहस्पतिः।
२५.	मेषभतः	=	मेषराशितः।
२६.	कुजः	=	कु = पृथ्वी तस्याः पुत्रः मंगलः।
२७.	कविः	=	शुक्रग्रहः।
२८.	तेजसां गोलकः	=	सूर्यः।
२९.	अम्बुगोलकाः	=	जलमयगोलाः।
३०.	क्रतुः	=	यज्ञः।
३१.	अमरज्योतिषाम्	=	अमराः देवाः ज्योतीषीं ग्रहनक्षत्रादयः तेषाम्।
३२.	प्रलयः	=	विनाशः।
३३.	उद्भवः	=	उत्पत्तिः।
३४.	विभुः	=	स्वामी।
३५.	श्रुतिः	=	वेदः।
३६.	क्षपाकरः	=	रात्रिकर्ता।

१.१० सन्दर्भग्रन्थाः

१. प्रश्नचिन्तामणिः।

२. बृहज्जातकम्।

३. सिद्धान्ततत्त्वविवेकः।

४. अमरकोषः।

५. श्रुतिः।

१.११ सहायकग्रन्थाः

१. भुवनदीपकम्।

२. केरलप्रश्नसंग्रहः।

३. ताजिकनीलकण्ठी।

४. दैवज्ञवल्लभा।

५. प्रश्नमार्गः।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

६. प्रश्नसिन्धुः।

१.१२ बोधप्रश्नोत्तराणि

१. सूर्योदये।

२. श्रिया साकम्।

३. स्वर्गे।

४. देवताः।

५. पटुत्वम्।

६. पितुः सकाशात्।

७. दैवज्ञानां विनोदाय।

८. प्रश्नशास्त्रस्य सिद्धान्ताः।

९. प्रश्नशास्त्रस्य ग्रन्थाः।

१०. दैवज्ञानाम् प्रश्नविद्याप्रवीणत्वसम्पादनाय।

११. पौलिशरोमकसौरवासिष्ठपैतामहाः एते ग्रहगणितस्य पञ्चसिद्धान्ताः भवन्ति।

१२. यः दैवज्ञः प्रतिबद्धं गमयति, शिष्येभ्यः प्रश्नोत्तरं ददाति सः दैवज्ञः शास्त्रार्थविद् भवति।

१३. प्रश्नशास्त्रे दक्षः।

१४. द्विविधा व्यक्ताव्यक्तस्वरूपा (अंकगणितबीजगणितविद्या)

१५. गुरुशुश्रूषानिरतः।

१६. शुद्धात्मा।

१७. प्रेमभावेन।

१८. यथाशक्तिः, हिरण्यम्, माणिकम्, सत्फलं वा।

१९. राशिचक्रम् समभ्यर्च्य।

२०. प्रश्नमेकमेव कुर्यात्।

२१. कामः, विनाशश्च।

२२. आप्तिः, अपायश्च।

२३. शुभः, बन्धुः।

२४. मंगलः।

२५. बुधः।

२६. सूर्यः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२७. चन्द्रमाः।

२८. बृहस्पतिः।

२९. बुधः।

३०. शुक्रः।

१.१३ अभ्यासप्रश्नाः

१. राशीनामाधिपतयः के?

२. द्वौ-द्वौ राशी केषाम् ग्रहाणाम् स्तः?

३. द्वादशभावेषु प्रथमचतुर्थसप्तमदशमभावानाम् संज्ञा का?

४. सूर्यचन्द्रयोः ग्रहत्वे को विशेषः?

५. राशिस्वामिविषये कः विशेषः?

६. पूर्वं षट्षट्राशीनामधिपती कौ आस्ताम्?

७. वराहोक्तदैवज्ञलक्षणानि कानि?

८. टीकाकारेण श्री दरबारी शर्मणा ग्रन्थारम्भप्रयोजने किं वराहवचनम् निर्दिष्टम्?

९. प्रश्नशास्त्रस्य सहायकग्रन्थेषु चत्वारः ग्रन्थाः के?

१०. ग्रन्थोक्तम् प्रश्नविद्याप्रवीणलक्षणम् प्राश्निकलक्षणञ्च लेख्यम्?

—•—

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयः पाठः (द्वादशभावेभ्यः विचारणीयविषयाः भावविचारविधिश्च)

पाठसंरचना

२.१ प्रस्तावना
२.२ उद्देश्यम्
२.३ द्वादशभावेभ्यः विचारणीयविषयाः
२.४ तनुभावात् विचारणीयविषयाः
२.५ धनभावात् विचारणीयविषयाः
२.६ सहजभावात् विचारणीयविषयाः
२.७ सुहृदभावात् विचारणीयविषयाः
२.८ पुत्रभावात् विचारणीयविषयाः
१.९ रिपुभावात् विचारणीयविषयाः
२.१० जायाभावात् विचारणीयविषयाः
२.११ मृत्युभावात् विचारणीयविषयाः
२.१२ धर्मभावात् विचारणीयविषयाः
२.१३ कर्मभावात् विचारणीयविषयाः
२.१४ लाभभावात् विचारणीयविषयाः
२.१५ व्ययभावात् विचारणीयविषयाः
बोधप्रश्नाः
२.१६ सामान्यतो भावविचारविधिः
२.१६.१ भावेशनिर्णयः
२.१६.२ शुभग्रहाः पापग्रहाश्च
२.१६.३ राहुकेत्वोः विषये विशेषः
२.१६.४ ग्रहदृष्टिविचारः
२.१६.५ शनिभौमगुरुदृष्टौ विशेषः
२.१६.६ भाववृद्धेः उदाहरणम्
२.१६.७ भावनाशस्योदाहरणम्
२.१६.८ मिश्रखगैर्विमिश्रम्
बोधप्रश्नाः
२.१७ फलोपयोगिविषयः
२.१७.१ ग्रहाणाम् तुङ्गनीचराशयः
➢ राहुकेत्वोः उच्चनीचे विशेषः
२.१७.२ ग्रहाणाम् मित्रादिकम्
२.१७.३ शयनाद्यवस्थाविचारः
२.१७.४ बलाबलनिरूपणम्
२.१७.५ ग्रहाणां स्वभावनिरूपणम्
बोधप्रश्नाः
ग्रन्थस्य मूलपाठः
२.१८ सारांशः
२.१९ शब्दावली
२.२० सन्दर्भग्रन्थाः
२.२१ सहायकग्रन्थाः
२.२२ बोधप्रश्नोत्तराणि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२.१ प्रस्तावना

प्रेयांसः पाठकाः भवद्भिः पूर्वस्मिन् पाठे द्वादशभावानाम् संज्ञाः, १२ राशयः, राशीनाम् स्वामिनः ग्रहाः ज्ञाताः। अधुना प्रश्नशास्त्रविद्यायाम् भावफलविचारः कथम् कर्तव्यः इति प्रश्ने समुपस्थिते तावत् प्रथमतया १२ भावेभ्यः विचारणीयविषयाः ज्ञातव्याः, यतो हि प्रश्नकर्ता यत्किमपि प्रश्नं करोति तस्य प्रश्नस्य विचारः केन भावमाध्यमेन कर्तव्यः एष विषयः अतीवसावधानतया निर्धारणीयः। अथ च तस्य विचारणीयप्रश्नस्य भावम् ज्ञात्वा कथम् भावविचारः प्रवर्तनीयः एष विधिरपि प्रश्नशास्त्रसिद्धान्त (तन्त्र) सम्मतो भवेत्, एतत्सर्वमत्रपाठे भवन्तः ज्ञास्यन्ति। केचन सिद्धान्ताः अन्यप्रश्नग्रन्थेभ्यः (सहायकग्रन्थेभ्यश्च) भवद्भिः विज्ञेयाः तेषाम् निर्देशमपि भवन्तः यथास्थलम् पठिष्यन्ति। आचार्यः जीवनाथ झा प्रश्नभूषणस्य संज्ञाध्याये एव भावविचारविधिम्, सामान्यतो फलोपयोगिविषयञ्च श्लोकद्वयेन निरूपिवान्। भवताम् अवबोधाय तस्य भावविचारविधेः फलोपयागिविषयस्य च सामान्यतया विचारः पाठेऽस्मिन् प्रस्तूयते। ये विषयाः विशिष्टाध्ययनस्य अपेक्षाम् धारयन्ति ते सहायकग्रन्थेभ्यः पठनीयाः एष निर्देशोऽपि पाठेऽस्मिन् यथास्थानम् क्रियते।

२.२ उद्देश्यम्

पाठस्यास्य उद्देश्यमस्ति विद्यार्थिषु प्रश्नफलविचारक्षमतायाः विकासः। तदर्थम् ये ये विषयाः प्राथम्येन अवधेयाः सन्ति तेषाम् वर्णनम् अस्मिन् पाठे पाठ्यग्रन्थाधारेण क्रियते। अनेन पाठेन भवन्तः निम्नविषयान् ज्ञास्यन्ति –

- प्रश्नकुण्डल्याम् १२ भावेभ्यः विचारणीयविषयाः।
- भावेशज्ञानम्।
- शुभग्रहपापग्रहनिर्णयः।
- ग्रहाणाम् दृष्टिज्ञानम् (पूर्णदृष्टिः, आंशिकदृष्टिश्च)।
- शनिभौमगुरूणां दृष्टौ विशेषः।
- फलोपयोगिविषयः।
- तुङ्गनीचराशयः।
- शयनाद्यवस्थाज्ञानम्।
- मित्रसमशत्रुकथनम्।
- ग्रहाणां स्वभावनिरूपणञ्च।

२.३ द्वादशभावेभ्यः विचारणीयविषयाः

प्रियपाठकाः द्वादशभावानाम् नामानि भवन्तः ज्ञातवन्त एव। एतेषाम् भावानाम् संज्ञान्तराणि अपि यथास्थानम् भवताम् ज्ञानसंवर्धनाय अस्माभिः निर्दिश्यन्ते। ज्योतिषग्रन्थान्तरान् जातकपारिजातभावकुतूहलभुवनदीपकं – बृहत्पाराशरहोराशास्त्रसारावलीमानसागरीबृहज्जातकादीनधीत्य भवन्तः १२ भावेभ्यः विचारणीयविषयान्तराण्यपि ज्ञातुम् पारयन्ति। भवद्भिः पूर्वम् अधीतम्

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यत् प्रश्नविद्याप्रवीणः दैवज्ञः स एव यो हि " बहुविधविषयाणाम् चातुरीणां धुरीणः" भवेत्। बहुविधविषयाः अनेकग्रन्थाध्ययनेन परिज्ञायन्ते, अतोऽत्र विषये यथासम्भवम् सहायकग्रन्थाध्ययनम् अपि अनवार्यमेव।

अधुनाऽस्माभिः भवताम् पाठ्यग्रन्थम् प्रश्नभूषणम् आधारीकृत्य १२ भावेभ्यः विचारणीयाः विषयाः यथावश्यकम् निर्दिश्यन्ते। स्थाने स्थाने श्लोकानाम् विशिष्टार्थोऽपि भवतां ज्ञानस्य वैशिष्ट्यसम्पादनाय लिखितोऽस्ति। प्रश्नशास्त्रे द्वयोः भावयोः विशिष्टम् महत्त्वम् भवति। एकम् भवति लग्नम् (प्रथमः भावः) अपरञ्च भवति कार्यभावः (यस्य भावस्य विचारणीय विषयेषु भवताम् प्रश्नविषयः अस्ति) अस्य कार्यभावस्य निर्णयः एव अतीव सावधानतया करणीयः यतो हि दैवज्ञस्य बुद्धेः वैशिष्ट्यम् कार्यभावाधीनम्। अथ च भावफलविचारणा- धीनमस्ति। यतो हि पूर्वम् यः उल्लेखः "बहुविधविषयाणाम् चातुरीणाम् धुरीणः" यो हि अस्ति तेनैव प्रश्नविद्याप्रवीणता सिद्धयति। अत्र लग्नम् (तनुभावम्) तु भवन्तः जानत्येव। कार्यभावः कथम् विज्ञेयः अस्य विचाराणार्थमेव द्वादशभावेभ्यः विचारणीयाः विषयाः अत्र प्रस्तूयन्ते –

२.४ तनुभावतः विचारणीयविषयाः

प्रिय पाठकाः तनुभाव एव प्रथमभावः। प्रथमभावस्यैव विशिष्टम् नाम लग्नम्। अतोऽत्र लग्नात् किं किं विचार्यमित्याह –

स्वरूपलक्षणञ्चापि वर्णभेदम् सुखासुखम्।
प्रश्नकर्त्तुर्वयोमानम् लग्नात्सर्वं विचिन्तयेत्॥

पदच्छेदः – स्वरूपलक्षणम्, च , अपि, वर्णभेदम्,सुखासुखम्, प्रश्नकर्तुः, वयोमानम्, लग्नात्, सर्वम्, विचिन्तयेत्।

अन्वयः – प्रश्नकर्तुः, स्वरूपलक्षणम्, च , अपि, वर्णभेदम्, सुखासुखम्, वयोमानम्, (एतत्) सर्वम्, लग्नात् विचिन्तयेत्।

प्रतिपदार्थः – प्रश्नकर्तुः = प्रश्नकर्ता यो हि दैवज्ञपार्श्वे प्रश्नकरणार्थम् समागतः तस्य, स्वरूपलक्षणम् = स्वरूपम् आकृतिः शरीरस्य पुष्टता, कृशता, दीर्घत्वम्, लघुत्वम् आकृतिविशेषता सौन्दर्यम् कुरूपतेत्यादिकम् सर्वमेव स्वरूपान्तर्गतम्, अथ च लक्षणम् तिलमशकादिचिन्हानि अथवा गमनादिकम्, राशिवशात् ज्ञातव्यलक्षणादिकम् सर्वम्, चकारात् आयुः, अपि शब्दाज्जातिः ब्राह्मणक्षत्रियवैश्यशूद्रत्वादिकम्, वर्णभेदम् = वर्णशब्देन शरीरवर्णः अपि गृहयते विप्रादिवर्णस्यापि बोधो भवति अतः वर्णस्य ये भेदाः तस्मिन् विषये समग्रचिन्तनम्, सुखासुखम् = सुखस्य विचारः असुखस्य दुःखस्य च विचारः परन्तु अत्र इदमवधेयम् यत् शरीरसम्बन्धी सुखदुःखयोः विचारः एव अत्र अपेक्षितः, वयोमानम् = वयः अवस्थाविशेषः तस्य मानम् बाल्यावस्थायौवनावस्थावार्धक्यावस्था वा (एतत्सर्वम्) अथ च प्रश्नकर्तुः वर्तमानावस्था च, लग्नात् = प्रश्नलग्नात् (प्रथमभावात्), विचिन्तयेत् = विशेषतया चिन्तयेत्, विचार्य ब्रूयात्।

अत्र विशेषः – प्रियपाठकाः भवन्तः इदम् विशिष्टम् तत्त्वम् मनसि धारयेयुः यत् प्रश्नलग्नस्य प्रश्नकर्तुश्च अस्ति कश्चन विशिष्टः सम्बन्धः प्रश्नलग्नम् तत्र यो हि निर्धारितो राशिः सो हि प्रश्नकाले पूर्वक्षितिजे संलग्नः यतो हि लग्नस्य परिभाषा अस्ति–

"यत्र लग्नमपमण्डलम् कुजे तद्गृहाद्यमिह लग्नमुच्यते" अथवा पाराशरवचनेषु **"राशीनामुदयो लग्नम् ते तु मेषवृषादयः"**

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अत्र लग्नाधिष्ठितराशेःस्वरूम् आकाशे प्रश्नकाले पूर्वक्षितिजे संलग्नम् तस्य च राशेः साक्षात् स्वरूपम् प्रश्नकर्तुः शरीररूपेण दैवज्ञस्य (प्रश्नविद्याप्रवीणस्य) सम्मुखे उपस्थितम् तस्य शरीरवर्णाकृतिलक्षणैः प्रश्नलग्नस्य शुद्धतापि परीक्षणीया। प्राथम्येन एतत् परीक्षणमपि ज्योतिषशास्त्रस्य प्रत्यक्षतासाधने, राशीनां स्वरूपादिप्रायोगिकपरीक्षणे च महत्त्वपूर्णम् तथ्यमस्ति, इति दिक्।

२.५ धनभावात् विचारणीयविषयाः

धनभावात् किं विचार्यमित्याह

रत्नकाञ्चनमुक्तानां लाभालाभौ विचक्षणाः।
धातूनाञ्च धनस्थानाच्चिन्तयेत् क्रयविक्रयौ॥

पदच्छेदः – रत्नकाञ्चनमुक्तानाम्, लाभालाभौ, विचक्षणाः, धातूनाम्, च, धनस्थानात्, चिन्तयेत्, क्रय-विक्रयौ।

अन्वयः – विचक्षणाः, धनस्थानात्, रत्नकाञ्चनमुक्तानाम् धातूनाम्, लाभालाभौ, क्रयविक्रयौ च चिन्तयेत्।

प्रतिपदार्थः – विचक्षणः = प्रश्नविद्याप्रवीणः दैवज्ञः एव विचक्षण अत्र उक्तः, धनस्थानात् = धनम् कोशः तस्मात् स्थानात् द्वितीयभावादित्यर्थः, रत्नकाञ्चनमुक्तानाम् = रत्नानि माणिक्यमौक्तिकविदुममरकतवज्रनीलमणिगोमेदकवैदूर्यादीनि, काञ्चनम् सुवर्णम् मुक्ता प्रसिद्धाः एव एषाम्, धातूनाम् = धातवो ताम्रलौहादयः चकारात् रजतादयः एतेषाम्, लाभालाभौ = लाभः प्राप्तिः अलाभः अप्राप्तिश्च तावेव प्राप्त्यप्राप्ती, चकारात् क्रयविक्रयौ = एतेषाम् समेषाम् व्यापारविचारेण क्रयश्चविक्रयश्च तावेव, विचिन्तयेत् = विशेषचिन्तनम् कुयादित्यर्थः।

अत्र विशेषः – धनसम्बन्धे रत्नादिव्यापारसम्बन्धे, धातूनाम् च व्यापारसम्बन्धे क्रयविक्रयादिकम् लाभहानिर्वा समग्रचिन्तनम् धनस्थानात् (द्वितीयभावात्) कर्तव्यमिति भावः।

२.६ सहजभावाद्विचारणीयविषयाः

भवन्तः पाठकाः जानत्येव यत् तृतीयस्थानं तृतीयभावः तस्य नाम सहोदरः अस्ति। सहोदरः सहजस्य पर्यायः। अत एव अत्र सहजभावाद्विचारणीयविषयाः भवतां पाठयग्रन्थानुसारम् विलिख्यन्ते।

पराक्रमं सहोत्थानाम् सुखं साहसकर्मणाम्।
दासानाञ्च भगिन्यादेस्तृतीयात्परिचिन्तयेत्॥

पदच्छेदः – पराक्रमम्, सहोत्थानाम्, सुखम् , साहसकर्मणाम्, दासानाम्, च , भागिन्यादेः, तृतीयात्, परिचिन्तयेत्।

अन्वयः – तृतीयात्, पराक्रमम्, सहोत्थानाम्, साहसकर्मणाम्, दासानाम्, भगिन्यादेः, च परिचिन्तयेत्।

प्रतिपदार्थः – तृतीयात् = तृतीयभावात् सहजभावात्, सहोदरभावात् वा, पराक्रमम् = सामर्थ्यम् शक्तिम् उद्योगसामर्थ्यादिकं वा?, सहोत्थानाम् = सहजानाम् सहोदाराणाम् भ्रातृणां वा, साहसकर्मणाम् = साहसिककार्याणाम् उत्साहशीलतायाः दण्डनेतृत्वतायाः उग्रकर्मणाम् वा, दासानाम् = सेवकानाम् भृत्यवर्गस्येत्यर्थः, भागिन्यादेः = भगिनी (सजहा) आदि शब्देन भगिनीपरिवारः पितृसम्बन्धित्वात् ग्राह्यः, एतेषाम् समेषाम् विचारः कर्तव्यः इत्यर्थः, चकारात् मार्गस्खलनादिकम् परिचिन्तयेत् विचारयेदित्यर्थः।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विशिष्टार्थः – प्रश्नशास्त्रे एष नियमः वर्तते यत् भवताम् प्रश्नः यस्य भावस्य वर्तते स एव सर्वप्रथमम् सम्यक् विचार्य निर्धारणीयः। अत्र तृतीयभावे येषाम् येषाम् विषयाणाम् विचारः कृत तेषु सर्वप्रथमम् सम्बन्धितभ्रातृभगिनीनाम् विषये यत् किमपि चिन्तनं भवितुमर्हति तत्सर्वम् अथ च **'भगिन्यादेः'** अत्र आदि शब्देन भगिनी परिवारः, सहोत्थानाम् अनेन शब्देन सर्वे भ्रातरः पराक्रमशब्देन भवताम् उद्योगसामर्थ्यम् शक्तिसम्पन्नता बलञ्च सर्वं खलु विचारणीयम्। साहसकर्म शब्देन ये खलु साहसिकाः भवन्ति तेषाम् च समस्तकर्माणि अपि, अथ दासानाम् शब्देन दासकर्म, भृत्यकर्म भृत्यानां वा विषये यत् किमपि तेषाम् सुखं दुःखं वा तत्सम्बन्धि वा सर्वमेव सहजभावात् विचारणीयमिति भावः।

२.७ सुहृदभावाद्विचरणीयविषयाः

प्रिय पाठकाः अत्र ग्रन्थे एकं वैशिष्टम् अस्ति यत् मूलद्वादशभावसंज्ञासु एका संज्ञा, पुनः मूलश्लोके द्वितीया संज्ञा अथ च श्लोकशीर्षके तृतीया संज्ञा तस्य तस्य भावस्य प्राप्यते यस्य यस्य भावस्य विचारः अपेक्षितः। यथा अत्र चतुर्थभावस्य मूलद्वादशभावसंज्ञासु संज्ञा वर्तते "बन्धुः" अत्र निम्नमूलश्लोके वर्तते "सुखात्" अर्थात् सुख संज्ञा, श्लोकशीर्षके संज्ञा वर्तते "सुहृद्भावाद्विचारमाह" अर्थात् सुहृत् संज्ञा। अतोऽत्र सुहृद्भावात् = सुखात् = बन्धुतः = चतुर्थभावाद् वा विचारणीयविषयाः निरूप्यन्ते –

मित्रालयग्रामलाभो वाहनानां सुखं सुखात्।
मातापित्रोः सुखं क्षेत्रवाटिकादि सुखं तथा॥

पदच्छेदः – मित्रालयग्रामलाभः, वाहनानाम्, सुखम्, सुखात्, मातापित्रोः, सुखम्, क्षेत्रवाटिकादि सुखं तथा।

अन्वयः – सुखात् , मित्रालयग्रामलाभः, वाहनानाम्, सुखम्, मातापित्रोः, सुखम् तथा क्षेत्रवाटिकादिसुखम् (विचारणीयम्)।

प्रतिपदार्थः – सुखात् = बन्धुभावात्, सुहृद्भावात्, चतुर्थभावादित्यर्थः, मित्रालयग्रामलाभः मित्रम् बन्धुः सुहृद् वा, आलयो गृहम्, ग्रामः = अभीष्टनगरः ग्रामादिकं वा एतेषाम् लाभः प्राप्तिः, वाहनानाम् = प्राचीनरीत्या अश्वगजादिवाहनम् नवीनरीत्या द्विपदचतुष्पदवाहनानां लाभः प्राप्तिः तेषाम् सुखम्, मातापित्रोः = मातृसुखं पितृसुखं च 'माता च पिता च तयोरिति मातापित्रोः" तयोः द्वयोरेव सुखम्, तथा = एतदतिरिक्तम् तेन प्रकारेण वा क्षेत्रवाटिकादिसुखम् = क्षेत्रम् कृषिः, वाटिका उद्यानम् आदि शब्देन क्षेत्रस्य यावन्तोऽपि भेदाः, वाटिकायाश्च यावन्तोऽपि भेदाः भवितुमर्हन्ति तेषाम् सुखम् = प्राप्तिर्वा प्राप्तस्य सुखं वा सर्वमेव चतुर्थभावात् (सुखात्) विचारणीयमित्यर्थः।

विशिष्टार्थः – प्रायः ग्रन्थेषु मातृभावः चतुर्थभावः भवति, पितृभावश्च दशमभावः भवति परन्तु अत्र प्रश्नशास्त्रे मातापित्रोः द्वयोरेव सुखम् चतुर्थभावात् विचारणीयमिति विशेषः, अथ च मित्रालयग्रामलाभः अत्र ग्रामस्येति उपलक्षणम् अभीष्टग्रामः नगरः देशो वा प्राप्स्यति न वा, प्राप्ते च तस्य ग्रामादिकस्य सुखं भविष्यति न वा, सः ग्रामादिकः सुखकारी दुःखकारी वा भविष्यति, अस्य विचारः चतुर्थभावात् करणीयः यत्किमपि सुखमस्ति तत्सर्वम् सुखभावाधीनमिति विशिष्टार्थः।

२.८ पुत्रभावाद् विचारणीयविषयाः

द्वादशभावनामसु सुतभावः पञ्चमभावस्य संज्ञा। पञ्चमभावः एव पुत्रभावः अथवा सुतस्य पर्याय एव पुत्र इति। अतः पुत्रभावाद्विचारमाह –

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गर्भापत्यनयानां वै मन्त्रसन्धानयोस्तथा।
बुद्धिप्रबन्धशास्त्राणाम् विचारः पञ्चमालयात्॥

पदच्छेदः – गर्भापत्यनयानाम्, वै, मन्त्रसन्धानयोः, तथा , बुद्धिप्रबन्धशास्त्राणाम्, विचारः, पञ्चमालयात्।

अन्वयः – पञ्चमालयात् गर्भापत्यनयानाम् वै, मन्त्रसाधनयोः, तथा, बुद्धिप्रबन्ध शास्त्राणाम्, विचारः, "कर्तव्य" इति शेषः।

प्रतिपदार्थः – पञ्चमालयात् = पञ्चमम् आलयम् भावः तस्मात् पञ्चमालयात् सुतभावात् पुत्रभावाद् वा, गर्भापत्यनयानाम् = गर्भः मातृकुक्षिस्थितः अपरिपक्वः पक्वो वा गर्भः, अपत्यः = जन्मानन्तरम् सन्ततिः पुत्रः पुत्री वा, नयः नीतिः नियमानि वा एतेषाम् समेषाम् चिन्तनम्, वै इति निश्चयेन, मन्त्रसन्धानयोः = मन्त्रः रहसि दीयमानः कस्यापि देवताविशेषस्य मन्त्रः गुप्तवार्ता रहसि कर्तव्यनिर्णयो वा अथ च सन्धानम् अनुसन्धानम् सन्धानम् वा अभीष्टसाधनोपरि ध्यानस्यैकाग्रीकरणमित्यर्थः रहसि यत्कर्म करणीयम् तयोः मन्त्र सन्धानयोः सम्पादयितुम् च दिशानिर्देशः तयोः द्वयोरेव विचारः, तथा बुद्धिप्रबन्धशास्त्राणाम् = बुद्धिः धीः, प्रबन्धः = शोधादिकर्म शोधकार्यानन्तरम् प्रबन्धलेखनसामर्थ्यम् तत्सम्बन्धि-शास्त्रस्य तेषाम् बुद्धिप्रबन्धशास्त्राणाम् अथवा बुद्धिः प्रसिद्धः, प्रबन्धो वाक्यविस्तारः शास्त्रम् दर्शनज्योतिषव्याकरणादिकम् वा एषाम् समेषाम् विचारः पञ्चमालयात् पञ्चमभवनात् कर्तव्यमिति भावः।

विशिष्टार्थः – पञ्चभावस्यैव बुद्धिभावः संज्ञापि प्रसिद्धास्ति अतः बुद्धेः यः कोऽपि व्यापारः, विद्यायाः यः कोऽपि विषयः शास्त्राणि च, उच्चतरविद्यायाम् प्रबन्ध (शोधप्रबन्ध) लेखनसामर्थ्यम्, वा प्रबन्धः कस्यापि संस्थायाः वा प्रबन्धनम् यत्किमपि भवेत् अथ च गर्भपुष्टिः, गर्भपातः, गर्भसंरक्षणम् इत्यादिकम् यत्किमपि गर्भविषये चिन्तनीयम् भवेत् तत्सर्वम् अथ च अपत्यविषये सन्ततिविषये पुत्रपुत्रीविषये यत् किमपि विचारणीयम्, सन्धानस्य विचारः पञ्चमभावादेव करणीय इति विशिष्टार्थः।

२.९ रिपुभावाद्विचारणीयविषयाः

अत्र रिपुभावस्य षष्ठभावस्यैका एव संज्ञा दृश्यते यद्यपि अन्यग्रन्थेषु रोगभाव इति संज्ञापि अस्य भावस्य प्राप्यते। अनेन भावेन विचारणीयविषयाः एते सन्ति।

मातुलानां रिपूणाञ्च महिष्याः क्रूरकर्मणाम्।
रोगातङ्कव्रणादीनां विचारो रिपुभावतः॥

पदच्छेदः – मातुलानाम्, रिपूणाम्, च , महिष्याः, क्रूरकर्मणाम् रोगातङ्कव्रणादीनाम्, विचारो, रिपुभावतः।

अन्वयः – रिपुभावतः, मातुलानाम्, रिपूणाम्, च, महिष्याः, क्रूरकर्मणाम्, रोगातङ्कव्रणादीनाम्, विचारः (कर्तव्यः)।

प्रतिपदच्छेदः – रिपुभावतः = षष्ठभावात्, मातुलानाम् = मातृस्थानम् चतुर्थम् तस्य भ्रातृस्थानम् चतुर्थभावतः तृतीयम् अर्थात् षष्ठस्थानम् तस्मात् स्थानात् मातृभ्रातृणाम् रिपूणाम् = शत्रूणाम्, चकारात्पराश्रयादीनाम्, महिष्याः = पशुविषेषः तस्याः महिषीप्रभृतीनामित्यर्थः, क्रूरकर्मणाम् = क्रूरकर्म हिंसा, वधादिकम् कर्म तेषां क्रूरकर्मणाम्, रोगातङ्कव्रणादीनाम् = रोगः वातपित्तज्वरादिविकारस्वरूपः, आतङ्कः भयम् रोगस्य भयम् शत्रोः भयम्, आतङ्कवादिनाम् आतङ्कविचारश्च, अथ च व्रणः क्षतम्, शरीरे यत्र कुत्रापि व्रणस्य स्फोटकस्य ग्रन्थादेः व्रणादीनाञ्च विचारः विचारणा "रिपुभावादेव" करणीया।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विशिष्टार्थः – वस्तुतः शत्रुः रोगो वा पर्याय एव, अतः समस्तशत्रूणाम्, समस्तरोगानाम्, आतङ्कवादस्य, दुर्घटनादिषु शास्त्रप्रयोगेषु, क्रूरकर्मसु हिंसावधादिकार्ये वा प्रयुक्तस्य कर्मणः विचारः शत्रुभावादेव करणीयः।

२.१० जायाभावतो विचारणीयविषयाः

प्रिय विद्यार्थिनः भवन्तः जानन्ति एव यत् पूर्वनिर्दिष्टद्वादशभावसंज्ञासु सप्तमभावस्य संज्ञा "काम" इति कृता। मानवजीवने स्त्री जाया वा यदागच्छति तदैव कामवर्गस्य विचारः कर्तुम् शक्यते। अतः जायाशब्दः शीर्षकेऽस्मिन् प्रयुक्तः। सप्तमभाव एव जायाभावः अपि उच्यते। अतः जायाभावतो विचार्यमाह –

परैः समं विवादञ्च वाणिज्यं व्यसनं तथा।
गमाऽगमौ कलत्रञ्च चिन्तयेत्सप्तमालयात्॥

पदच्छेदः – परैः, समम्, विवादम्, च, वाणिज्यम्, व्यसनं, तथा, गमाऽगमौ, कलत्रञ्च, चिन्तयेत् सप्तमालयात्।

अन्वयः – सप्तमालयात्, परैः, समम्, विवादम्, च, वाणिज्यम्, तथा व्यसनम्, गमागमौ, कलत्रम् च , चिन्तयेत्।

प्रतिपदार्थः – सप्तमालयात् = सप्तमभावात्, परैः समम् = स्वसम्बन्धीन् त्यक्त्वा अन्यैः शत्रुभिः सह, विवादम् व्यवहारम् परस्परमादानप्रदानादिजन्यम् व्यवहारविशेषम्, वाणिज्यम् = व्यापारादिकम् यत् किमपि वणिक्कर्म, तथा, व्यसनम् = दुर्व्यसनादिजन्यं विपदम्, "व्यसनं विपदि भ्रंशे चेत्यमरः" गमागमौ = गमनम् आगमनञ्चेति गमनागमनरूपा या क्रिया, तत्सर्वम्, कलत्रम् = जायाम् भार्याम् विवाहम् तत्सम्बन्धी कामञ्च सर्वं खलु, च चिन्तयेत् = विचारयेदित्यर्थः।

विशिष्टार्थः – प्रेयांसः पाठकाः भवन्तः जानन्ति यत् सप्तमभावः यो हि प्रश्नभूषणेऽस्मिन् ग्रन्थे द्वादशभावसंज्ञासु "काम" संज्ञया व्यवहृतः। अत्र ग्रन्थे टीकाकारेण विचारणीय– विषयशीर्षके जायाभावनाम्ना दिर्दिष्टः अत्रेदमवधेयम् यत् वस्तुतः एष भावः स्त्रीभावः अस्ति। पारिवारिकजीवने यदि वयम् पश्यामः तर्हि कामस्योद्दीपनम् स्त्रीद्वारा एव भवति। अतः जाया भाव एव कामस्थानम्, तथा संसारस्य समस्तः अपि व्यवहारः स्त्री द्वारा एव प्रवर्तते अथ येऽपि विवादाः ते धनमूलका स्त्रीमूलकाः सुखमूलकाः वा भवन्ति अतः ये विचारणीयाः विषयाः अत्र सप्तमालयात् प्रोक्ताः तत्र वास्तविकता विद्यते। एवञ्च एष भावः यात्रायाः गमागमस्वरूपायाः अपि विद्यते गमनम् अगमनम् द्वावेन यात्रामूलकौ स्तः अथ व व्यसनम् दुर्व्यसनम् भवेत् अथवा विपत्तिमूलकम् कर्म अनयोरपि विचारः सप्तमालयात् एव भवति, इति दिक्।

२.११ मृत्युभावात् विचारणीयविषयाः

भवद्भिः सप्तमभावात् विचारणीयविषयाः अधीताः। अधुना मृत्युभावात् विचारणीयविषयाः विचार्यन्ते। अष्टमभावात् मृत्योः विचारः भवति। यद्यपि आयुषः अपि एतत् स्थानम् अस्ति। वस्तुतः आयुषः समाप्तिरेव मृत्युः, अथ च द्वादशभावसंज्ञासु अस्य भावस्य नाम 'विनाशः' इति कृतः। विनाशः अपि मृत्युसंज्ञकः अतः मृत्युभावात्किं विचार्यमित्याह –

रिपुसंग्रामदुष्टानां मार्गस्यापि गदस्य च।
नद्युत्तारभयानां च छिद्रं छिद्रे विचिन्तयेत्॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पदच्छेदः – रिपुसंग्रामदुष्टानाम्, मार्गस्य, अपि, गदस्य, च नद्युत्तारभयानाम्, च छिद्रं, छिद्रे विचिन्तयेत्।।

अन्वयः – छिद्रे, रिपुसंग्रामदुष्टानाम्, मार्गस्य, अपि , गदस्य, च , नद्युत्तारभयानाम्, छिद्रम्, च विचिन्तयेत्।

प्रतिपदार्थः – छिद्रे = अष्टमे भावे, रिपुसंग्रामदुष्टानाम् रिपुः शत्रुः संग्रामः युद्धम्, दुष्टः परपीडकविचारः, दुष्टताविचारः अनिष्टचिन्तकानाम्, दुष्टता च मार्गस्य = पथः, अपि शब्देन कठिनमार्गानाम् ग्रहणम्, गदस्य = असाध्यरोगस्य, च अनेन सर्वेषाम् कठिनरोगानाम् विचारः, चकारान्मरणस्य च नद्युत्तार भयानाम् नद्युत्तरणम् नद्याः पारे गमनम् अनेन समुद्रपारगमनादिकम् अपि ज्ञेयम् तत्सम्बन्धीभयादिकम् चकारात् नष्टवस्तूनि, छिद्रम् = लक्षणयाऽनर्थप्रदम् सकलम् कार्यम् छिद्रान्वेषिणाम् विचारश्च अस्मिन्नेव विनाशभावे कर्तव्यमिति शेषः।

विशिष्टार्थः – वस्तुतः आयुः स्थानम् मृत्युस्थानम् विनाशस्थानम् एताः संज्ञाः भवन्ति अष्टमालयस्य। अस्मिन्नेव स्थाने अज्ञातविषयानाम् अपि छिद्रत्वात् विचारः अभिप्रेतः, यतो हि नद्याम् भ्रमरवत् एतत् स्थानम् अस्ति, अतः अज्ञातमरणस्य विचारः असाध्यरोगस्य विचारः, नद्याम् समुद्रे वा गतस्य जीवनमरणविचारः जीवनमरणयुद्धविचारः परमदुष्टमनुष्याणाम् च विचारः अनेनैव भावेन कर्तव्यः।

२.१२ धर्मभावाद्विचारणीयविषयाः

प्रियपाठकाः भवन्तः जानन्ति यत् अखिलेऽस्मिन् संसारे धर्म एव शुभपदवाच्यः यतो हि यत् किमपि शुभत्वम् दृश्यते तत्सर्वम् धर्ममूलकमेव। अतः द्वादशभावसंज्ञासु नवमभावस्य संज्ञा "शुभ" इति कृता तथा च धर्म एव शुभपर्यायः। अतः धर्मभावाद्विचारणीयमाह –

वापीकूपतडागानाम् निर्माणं देवतालयम्।
यात्रादीक्षाध्वकर्माणि चिन्तयेन्नवयामालयात्।।

पदच्छेदः – वापीकूपतडागानाम्, निर्माणम्, देवतालयम्, यात्रादीक्षाध्वकर्माणि, चिन्तयेत्, नवमालयात्।

अन्वयः – नवमालयात्, वापीकूपतडागानाम्, निर्माणम्, देवतालयम्, यात्रादीक्षाध्वकर्माणि , चिन्तयेत्।

प्रतिपदार्थः – नवमालयात् = नवमभावात् धर्मभावात् शुभस्थानाद्वा, वापीकूपतडागानाम् = वापीनिर्माणम् कूपनिर्माणम् तडागानाम् = लघ्वाकृतिजलाशयानाम्, निर्माणम् एतेषाम् निर्माणसम्बन्धिप्रश्नाः गर्तखननादिकार्याणि, अथ च, देवतालयम् = देवतानाम् आलयम् देवस्थाननिर्माणम् देवतालयसम्बन्धिनः अनेके प्रश्नाः, यात्रादीक्षाध्वकर्माणि = यात्रा शब्देन विदेशगमनम् तीर्थयात्रादिकमपि, दीक्षायाः तात्पर्यमस्ति मन्त्रग्रहणम् अध्वकर्म मार्गसम्बन्धि कर्म = राजमार्गादिनिर्माणम्, तेषाम् संस्कारः, अथवा यत्किमपि मार्गकर्म नाम्ना विचारयितुम् शक्यते तत्सर्वम् विचारणीयम्।

विशिष्टार्थः – यथा देवालयनिर्माणम् पुण्यकर्म तथैव जलाशयनिर्माणमपि पुण्यकर्म, अथ च तीर्थयात्रा, दीक्षा, मन्त्रोद्धारः जीर्णोद्धारः वा शुभकर्म एतादृशानि यान्यपि शुभकर्माणि, पुण्यकर्माणि वा सन्ति तानि नवमालयात् एव विचारणीयानीति भावः।

२.१३ कर्मभावाद्विचारणीयविषयाः

द्वादशभावसंज्ञासु दशमभावस्य संज्ञा पितृभम् इति कृता। परन्तु प्राचीनैः आचार्यैः

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दशमभावस्य 'कर्म' इति नामकरणमपि कृतम् अतः टीकाकारः – किं विचार्यम् कर्मभावादित्याह–

पितुः सुखं तथा राज्यम् व्यापारं राजकर्म च।
पुण्यं मुद्रासुखं सर्वं चिन्तयेद् दशमालयात्॥

पदच्छेदः – पितुः सुखम्, तथा, राज्यम्, व्यापारम्, राजकर्म, च, पुण्यम्, मुद्रासुखम्, सर्वम्, चिन्तयेद्, दशमालयात्।

अन्वयः – दशमालयात्, पितुः सुखम्, राज्यम्, तथा, व्यापारम्, राजकर्म , च, पुण्यम्, मुद्रासुखम्, सर्वं, चिन्तयेत्।

प्रतिपदार्थः – दशमालयात् = दशमभावात्, पितुः सुखम् = केवलम् पितुः सुखम् पितृसम्बन्धे यत्किमपि सुखप्रदम् वृत्तान्तम् विचारो वा भवितुमर्हति तत्सर्वम्, राज्यम् = राज्यसम्पत्तिम् राज्ये अधिकारविशेषो वा , व्यापारम् = विभिन्नवस्तूनाम् क्रयविक्रयादिकम्, राजकर्म = राजकीयवृत्तिः प्रशासनिकम् कर्म, राज्यमन्त्रिप्रशासनमन्त्रिराष्ट्रपतिप्रशासनिकाधिकारिणाम् वा कर्म, चकाराद् आकाशविद्या व्योमवृत्तान्तादिकम् वा, पुण्यम् पुण्योत्पादकम् परोपकारादिकम् कर्म, मुद्रासुखम् = राज्यमुद्राधिकारविशेषत्त्वम् तस्य सुखम् अथवा मुद्राधनरूप्यकम् रजतमुद्रा स्वर्णमुद्रादिजन्यम् यत्किमपि सुखम् भवितुमर्हति तत्सर्वमेव चिन्तनीयम्।

विशिष्टार्थः – विज्ञाः पाठकाः भवन्तः इदम् सत्यमवगच्छन्तु यत् द्वादशभावेषु सर्वोपरि दशमभावस्य सत्ता। अतः जीवने कर्मणः यथा सत्ता तथैव पुण्यकर्मेणः अपि महत्त्वपूर्णम् स्थानम्, राज्यपक्षस्य प्रशासनस्य वा सर्वोत्कृष्टता, अतः एतेषाम् विचारः सर्वोत्कृष्ट भावात् दशमभावात् एव करणीयः।

२.१४ लाभभावात् विचारणीयविषयाः

एष भावः (एकादशः भावः) आप्ति संज्ञः पूर्वम् कथितः। आप्तिः एव प्राप्तिः लाभो वा वक्तुम् शक्यते, अतः लाभभावाद् विचार्यमित्याह –

कन्याकाञ्चनसस्यानाम् वाहनानाञ्च लाभतः।
विद्याव्यापारवित्तानां कर्तव्या चिन्तना बुधैः॥

पदच्छेदः – कन्याकाञ्चनसस्यानाम्, वाहनानाम्, च, लाभतः, विद्याव्यापारवित्तानाम्, च, चिन्तना, बुधैः, कर्तव्या।

अन्वयः – लाभतः, कन्याकाञ्चन् सस्यानाम्, वाहनानाम् विद्याव्यापारवित्तानाम्, च, चिन्तना, बुधैः,कर्त्तव्या।

प्रतिपदार्थः – लाभतः = एकादशभावतः, आप्तिभावतः प्राप्तिभावतो वा, कन्याकाञ्चन सस्यानाम् = कन्या (सन्ततौ पुत्रविचारः पञ्चमभावात् सुतभावात् वा कृतः) केवलं कन्या सन्ततिविचारः (लाभतः क्रियते), काञ्चनः सुवर्णम्, सस्यम् धान्यविशेषः (कृषेः सम्पन्नता तेन च लाभः) एतेषाम् समेषाम्, वाहनानाम् = गजाश्वादीनाम् प्राचीनमते नवीनमतेन तु द्विपदचतुष्पदादिवाहनानाम् विभिन्नैः पशुभिः युक्तानाम् रथादीनाम् तैश्च लाभविचारः, विद्या व्यापारवित्तानाम् = विद्या शास्त्रशिल्पादयः अर्थकरीविद्याविचारः, व्यापारः तत्सम्बन्धी व्यापारः क्रय-विक्रयादिकम् अर्थोत्पत्तौ विद्याप्रयोगः वित्तानाम् शब्देन एतादृशाः अर्थाः येषाम् प्रयोजनेन निरन्तरम् अर्थप्राप्तिः अर्थवृद्धिः वा स्यात् एतादृशम् चिन्तनम् विद्यायाः व्यापारस्य वित्तस्य च यत्किमपि भवितुमर्हति तत्सर्वम् तेषाम् च चिन्तना = विचार सरणिः बुधैः = पण्डितैः प्रश्नविद्याप्रवीणैः लाभतः कर्त्तव्या, इति भावः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विशिष्टार्थः – प्रेयांसः पाठकाः भवद्भिः पूर्वं पठितम् यत् गर्भापत्यादीनाम् विचारः पञ्चमभावात् भवति, अत्र अपत्यः पुत्रपुत्रीवाचकःपरन्तु केवलम् कन्यार्थे एकादशभावोऽपि विचारणीयः। वाहनानाम् सुखम् चतुर्थभावात् विचारितम् परन्तु लाभदायकवाहनानाम् व्यापारविचारः लाभात् करणीयः, बुद्धिप्रबन्धशास्त्राणाम् विचारः पञ्चमात् कृतः परन्तु विद्याव्यापारवित्तानाम् अर्थात् अर्थकरी विद्यायाः व्यापारादिविचारः अथ च "वित्तात् वित्तम् अर्जयेत्" इत्यस्य अर्थ (वित्त) शास्त्रस्य विचारः लाभभावतः एव करणीयः इति दिक्।

२.१५ व्ययभावात् विचारणीयविषयाः

द्वादशभावसंज्ञासु यस्य द्वादशतमस्य भावस्य 'अपाय" इति संज्ञा कृता तस्य व्यय संज्ञापि अन्वर्थकरी एव अतः व्ययभावात् विचारणीयमाह –

विवादत्यागभोगानाम् दानादिकृषिकर्मणाम्।
व्ययं व्यये निरोधञ्च रिपूणां प्रविलोकयेत्॥

पदच्छेदः – विवादत्यागभोगानाम्, दानादिकृषिकर्मणाम्, व्ययम्, व्यये, निरोधम्, च, रिपूणाम् प्रविलोकयेत्।

अन्वयः – व्यये , विवादत्यागभोगानाम्, दानादिकृषिकर्मणाम्, व्ययम्, रिपूणाम्, च, निरोधम्, प्रविलोकयेत्।

प्रतिपदार्थः – व्यये = द्वादशभावे अपायनाम्ना प्रसिद्धे, एतत्सर्वम् विलोकयेत् किं किं? तद्यथा – विवादत्यागभोगानाम् = विवादः कलहः = क्लेशो वा, त्यागः त्यागवृत्तिः भिक्षुकाद्यर्पणम्, भोगः सम्पत्तिभोगः सम्भोगः रतिभोजनादिकम् सर्वम्, एतेषाम् विवादत्यागभोगानाम्, दानादिकृषिकर्मणाम् = दानम् नाम देशकालादिकम् गोत्रादिकमुच्चार्य सुपात्राय कृतम् दानम्, आदि शब्देन पारितोषिकादिकम्, कृषिकर्म अर्थात् क्षेत्र-कर्षणादिना क्षेत्रे धान्यादीनामुत्पादन सम्बन्धि कर्म तेषाम् च समेषाम् दानादिकृषिकर्मणामित्यर्थः, व्ययम् = शुभकार्ये धनव्ययः अशुभकर्मणि हानिश्च, रिपूणाम् = शत्रूणाम् विरोधिनाम् च निरोधम् = अवरोधनार्थे कृतम् कर्म शत्रुनिरोधनार्थम् कृतोपायादिकम् सर्वम् द्वादशभावे एव विलोकयेत् = पश्येत् सम्यक् विचारयेदित्यर्थः।

विशिष्टार्थः – वस्तुतः द्वादशभावेषु अन्तिमोऽयम् भावः अपायभावः। व्ययभावनाम्नापि जातकग्रन्थेषु प्रश्नग्रन्थेषु च अस्य प्रसिद्धिः। अनेन भावेन त्यागः, विवादः, भोगः, दानम्, कृषिकर्म, व्ययम्, रिपूणाम् निरोधश्च एते विषयाः विचारणीयाः भवन्ति। एषु विषयेषु त्यागवृत्तेः मुख्यतमः विचारणीयः भावोऽयमेव। जीवनपर्यन्तम् भोगसामग्री संकलिता परन्तु तस्य भोगः कर्तुम् शक्यते न वा अनेन भावेन एव विचारणीया। दानशब्दस्य वास्तविकोऽर्थः शास्त्रविधिमनुसृत्य कृतम् दानम् तस्य विधिवदनुसरणम् भविष्यति न वा अस्य विचारः। कृषियोग्या भूमिस्तु चतुर्थभावाधीना परन्तु कृषिकर्म व्ययभावाधीनम्। शत्रुविचारस्तु षष्ठभावात् भवति परन्तु शत्रोः निरोधः कर्तुं शक्यते न वा अस्य विशिष्टः विचारः द्वादशभावादेव करणीयः, इति दिक्।

बोधप्रश्नाः

१. प्रश्नकर्तुः स्वरूपबोधकभावः कः?

.....

.....

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२. क्रयविक्रयोः विचारणीयभावः कः?

.....

.....

३. मातापित्रोः उभयोः सुखं कस्माद् भावाद् विचार्यते?

.....

.....

४. मन्त्रसाधनायाः विचारणीयभावः कः?

.....

.....

५. आतङ्कवादस्य विचारः केन भावेन कर्तव्यः?

.....

.....

६. पाराशरमतेन लग्नपरिभाषा का?

.....

.....

७. दुर्व्यसनानाम् विचारणीयभावः कः?

.....

.....

८. छिद्रनाम्ना को भावः गृह्यते?

.....

.....

९. मन्त्रदीक्षायाः विचारः केन भावेन भवति?

.....

.....

१०. केवलं पितृसुखम् कुतः विचारणीयम्?

.....

.....

११. केवलं कन्यासन्ततेः काञ्चनस्य च विचारणीयभावः कः?

.....

.....

१२. कृषिकर्म, शत्रूणां निरोधश्च केन भावेन विचार्यते।

.....

.....

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२.१६ सामान्यतो भावविचारविधिः

प्रिय छात्राः भवद्भिः इदम् तु ज्ञातम् यत् कस्य कस्य विषयस्य विचारः कस्मात् कस्मात् भावात् क्रियते। परन्तु एतत् ज्ञेयमस्ति यत् भावविचारः कथम् करणीयः, केन विधिना भावः वृद्धिमेति, केन च योगेन भावफले वृद्धिः ह्रासो वा भवति। अस्यैव विधिम् मनसि विचार्य ग्रन्थकर्ता श्री जीवनाथः भावविचारविधिं व्यनक्ति –

भावो हि यः स्वपतिना शुभखेचरेण।
दृष्टो युतो भवति वा परिवर्धतेऽसौ।
नष्टेन्दुमङ्गलपतङ्गपतङ्गपुत्रै-
र्नाशं प्रयाति किल मिश्रखगैर्विमिश्रम्॥

पदच्छेदः – भावो, हि, यः, स्वपतिना, शुभखेचरेण, दृष्टो, युतो, भवति, वा, परिवर्धते, असौ, नष्टेन्दुमङ्गल-पतङ्ग-पतङ्गपुत्रैः, नाशम्, प्रयाति, किल, मिश्रखगैः, विमिश्रम्।

अन्वयः – यः, भावः, स्वपतिना, शुभखेचरेण, दृष्टो, युतो, वा, भवति, हि, असौ, परिवर्धते। नष्टेन्दु-मङ्गल-पतङ्ग-पतङ्गपुत्रैः, नाशम्, प्रयाति, किल, मिश्रखगैः, विमिश्रम्।

प्रतिपदार्थः – यः भावः = यस्य भावस्य विचारः अपेक्षितः सो हि तन्वादि द्वादशभावेषु अभीष्टः भावः, स्वपतिना = स्वस्वामिना भावेशेनेत्यर्थः, शुभखेचरेण = शुभग्रहणे (पूर्णचन्द्रशुभयुतबुधगुरुशुक्रेणेत्यर्थः) एतेषु एकेन वा अनेकशुभग्रहैर्वा, दृष्टः = पूर्णदृष्टया दृष्टः स्यात्, युतो वा = यदि दृष्टः न स्यात् तर्हि अभीष्टभावेशः शुभग्रहेण शुभग्रहैर्वा युक्तः स्यात्, एतादृशः यो भावः भवेत् असौ सः भावः हि इति निश्चयेन परिवर्धते = वृद्धिम् प्राप्नोतीत्यर्थः।

एतद्विपरीतं विचारणीयः भावः, नष्टेन्दु-मङ्गल-पतङ्ग-पतङ्गपुत्रैः इत्युक्त्या एते पापग्रहाः अत्र प्रोक्ताः नष्टेन्दुः अर्थात् नष्टचन्द्रः क्षीणचन्द्रमा इत्यर्थः "कृष्णपक्षस्य अष्टमीमारभ्य शुक्लपक्षाष्टमी पर्यन्तम् चन्द्रः क्षीणो भवति, केचन आचार्याः सूक्ष्मविचारेण कथयन्ति यत् कृष्णपक्षाष्टम्यर्धात् शुक्लपक्षाष्टम्यर्धम् यावत् चन्द्रः क्षीणो भवति " इति नियमेन नष्टेन्दुः = क्षीण चन्द्रः, अत्र नष्टपदम् क्षीणतावाचकम् क्षीणचन्द्रस्यैव पापत्वात्, मंगलः भौमः, पतंगः सूर्यः, पतंगपुत्रः शनिः एतैः ग्रहैः सर्वैः, वा एकेन पाग्रहेण, युक्तो वा दृष्टः यो हि भावः स नाशम् प्राप्नोति। यदि च शुभेनापि दृष्टो वा युतः, पापेनापि दृष्टो वा युतो भवेत् अर्थात् मिश्रखगैः = शुभैः पापैश्च उभयतोऽपि दृष्टो युतो वा भवति इत्यस्य उभयत्र सम्बन्धः काकाक्षिगोलकवत् तदा विमिश्रम् = भाववृद्धिरपि भावनाशोऽपि, शुभपापयोः आधिक्यवशात् आधिक्यम् समवशाच्च विमिश्रम् फलम् = शुभाशुभम् फलम् वक्तव्यम्।

विशिष्टार्थः – अत्र ग्रन्थकारेण भावफलविचारार्थम् एका विशिष्य सरणिः जातकग्रन्थवत् स्वीकृता। षट्पञ्चाशिका प्रश्नशास्त्रस्य विशिष्टः ग्रन्थः वर्तते, यस्य रचयिता पृथुयशाः तत्र लिखति –

यो यो भावः स्वामिदृष्टो युतो वा सौम्यैर्वा स्यात्तस्य तस्यास्ति वृद्धिः
पापैरेवं तस्य भावस्य हानिः निर्देष्टव्या पृच्छतां जन्मतो वा॥

अनेनैव नियमेन अत्रापि प्रश्नभूषणग्रन्थकारः कस्यापि भावस्य शुभफलनिर्धारणे भाववृद्धौ वा कारणम् शुभयुतिम्, शुभदृष्टिम्, भावपत्युः ग्रहस्य तत्तद्भावोपरि दृष्टिम् युतिं वा स्वीकरोति।

अत्र शुभग्रहाः पूर्णचन्द्रः, बुधः, गुरुः, शुक्रः वा स्वीकृतः। अथ च कस्यापि भावस्य

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विनाशकारकाः ग्रहाः पापग्रहाः स्वीकृताः। पापग्रहाः के सन्ति? ते सन्ति नष्टचन्द्रमा, (क्षीणचन्द्रमा), मंगलः, सूर्यः, सूर्यपुत्रश्च। एते ग्रहाः कस्यापि भावस्योपरि दृष्ट्या युत्या वा तस्य विनाशे कारणानि भवन्ति।

२.१६.१ भावेशनिर्णयः

अत्र भवताम् पाठकानाम् कृते एतत् तु पूर्वज्ञानमस्त्येव यत् भावाः 12 सन्ति, तेषाम् संज्ञाः "तनुकोशसहोदरबन्धुसुता" इत्यादिश्लोके पठिता एव। तेषु भावेषु ये द्वादशराशयः लग्नादिक्रमेण स्थाप्यन्ते तेषाम् स्वामिनः ग्रहा एव भावेशाः कथ्यन्ते, यथा कल्प्यते मेषलग्नम् अस्ति तर्हि भावेशाः निम्नक्रमेण भवन्ति यथा–



अत्र लग्ने मेषराशिः अतः लग्नेशः भौमः

अत्र कोशे वृषराशिः अतः कोशेशः शुक्रः

अत्र सहोदरभावे मिथुनराशिः अतः सहोदरेशः बुधः

अत्र बन्धुस्थाने कर्कराशिः अतः बन्धुभावेशः चन्द्रः

अत्र सुतभावे सिंहराशिः अतः सुतेशः सूर्यः

अत्र रिपुस्थाने कन्याराशिः अतः रिपुभावेशः बुधः

अत्र कामस्थाने तुलाराशिः अतः कामेशः शुक्रः

अत्र विनाशस्थाने वृश्चिकराशिः अतः विनाशेशः भौमः

अत्र शुभस्थाने धनुराशिः अतः शुभस्थानेशः गुरुः

अत्र पितृभे मकरराशिः अतः पितृभेशः शनिः

अत्र आप्तिस्थाने कुम्भराशिः अतः आप्तिभावेशः शनिः

अत्र अपायस्थाने मीनराशिः अतः अपायेशः गुरुः

अनेन क्रमेण वृषलग्नम् यदि स्यात् तर्हि निम्नक्रमेण द्वादशभावानामीशाः भवन्ति यथा –

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



अत्र उदाहरणचक्रे लग्नादि द्वादशभावानाम् संज्ञाः अस्माभिः भवताम् कृते संज्ञान्तरज्ञानार्थम् लघुजातकग्रन्थोक्ताः[1] "तनुधनसहजसुहृत्सुतरिपुजायामृत्युधर्मकर्मायव्ययाः" द्वादशभावसंज्ञाः विलिखिताः तेन वृषराशिः लग्नस्थः तर्हि क्रमेण क्रमशः तन्वादिद्वादश भावेशाः निम्नक्रमेणावगन्तव्याः। यथा –

अत्र लग्ने वृषराशिः अतः लग्नेशः (तनुभावेशः) शुक्रः

अत्र धनभावे मिथुनराशिः अतः धनभावेशः बुधः

अत्र सहजभावे कर्कः राशिः अतः सहजभावेशः चन्द्रः

अत्र सुहृदभावे सिंहराशिः अतः सुहृद्भावेशः सूर्यः

अत्र सुतभावे कन्याराशिः अतः सुतेशः बुधः

अत्र रिपुभावे तुलाराशिः अतः रिपुभावेशः शुक्रः

अत्र जायाभावे वृश्चिकराशिः अतः जायाभावेशः भौमः

अत्र मृत्युभावे धनुराशिः अतः मृत्युभावेशः गुरुः

अत्र धर्मभावे मकरराशिः अतः धर्मभावेशः शनिः

अत्र कर्मभावे कुम्भराशिः अतः कर्मभावेशः शनिः

अत्र आयभावे मीनः राशिः अतः आयभावेशः गुरुः

अत्र व्ययभावे मेषराशिः अतः व्ययभावेशः भौमः

इत्थम् भवद्भिः मिथुनादिलग्नेषु क्रमशः बुधादयः तन्वादीनाम् भावानामधीशाः परिकल्प्याः।

अन्येषु ज्योतिषग्रन्थेषु 12 भावानां संज्ञान्तराण्यपि प्राप्यन्ते यथा बृहज्जातके द्वादशभावानां नामानि[2]

"होरादयस्तनुकुटुम्बसहोत्थबन्धुपुत्रारिपत्निमरणानि शुभास्पदायाः रिष्फाख्यम्"

तत्रैव संज्ञान्तराण्यपि[3]

कल्पस्वविक्रमगृहप्रतिभाक्षतानि चित्तोत्थरन्ध्रगुरुमानभवव्ययानि।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लग्नाच्चतुर्थनिधने चतुरस्रसंज्ञम् द्यूनं च सप्तमगृहं दशमं खमाज्ञा॥

एवमेव भुवनदीपके 12 भावानां विचारणीयविषयविवेचने प्रत्येकस्मिन् श्लोके 12 भावानां नामानि एवम् सन्ति –[4]

तनुः, धनम्, दुश्चिक्यम्, पातालः, सुतः, रिपुः, कलत्रम्, छिद्रम्, धर्मः, व्योमः, लाभः, व्ययः।

इत्थमन्येष्वपि प्रश्नशास्त्रजातकशास्त्रग्रन्थेषु 12 भावानाम् संज्ञान्तराणि अधीत्य भवद्भिः पाठकैः राशीनामधिपतिवशात् भावाधिष्ठितराशिवशेन भावेशाः अवगन्तव्याः तदनन्तरम् शुभपापग्रहाणानां ज्ञानेन भावपरिवृद्धिः भावविनाशस्य लक्षणानि निश्चेतव्यानि। तत्र प्रथमम् तावत् शुभग्रहपापग्रहनिर्णयः क्रियते।

२.१६.२ शुभग्रहाः पापग्रहाश्च

ग्रहाणाम् शुभग्रहपापग्रहनिर्णये जातकज्योतिषे प्रश्नविद्यायाम् वा अनेकैः आचार्यैः वराहमिहिरभट्टोत्पलकल्याणवर्मा जीवनाथवैद्यनाथदैवज्ञमन्त्रेश्वरवेंकटेश्वरादिभिः स्वस्वग्रन्थेषु उल्लेखः कृतः। सर्वेषु जातकग्रन्थेषु ग्रहाणाम् नैसर्गिकम् शुभाशुभम् निर्दिष्टमस्ति यथा – जातकपरिजाते –

क्षीणेन्दुमन्दरविराहुशिखिक्षमाजाः पापास्तु पापयुतचन्द्रसुतश्च पापः।

तेषामतीव शुभदौ गुरुदानवेज्यौ क्रूरौ दिवाकरसुतक्षितिजौ भवेताम्॥[5]

तत्रार्कभौनशनयो राहुकेतुनिशाधिपः।

क्षीणश्चैते सदा पापाः पापः पापयुतो बुधः।

शेषाः सौम्यग्रहाः सन्ति सौम्याऽसौम्याः शुभाऽशुभाः॥

बृहज्जातके

क्षीणेन्द्वर्कमहीसुतार्केतनयाः पापाःबुधस्तैर्युतः

एवमेव भुवनदीपके (प्रश्नशास्त्रग्रन्थे) [6]

भौमन्दार्कभोगीन्द्राः प्रकृत्याः दुःखदा नृणाम्।

ज्ञगुरुश्वेतकिरणशुक्राः सुखकराः सदा॥

अत्र प्रश्नभूषणकर्ता श्री जीवनाथः पूर्ववर्तिश्लोकेप्रश्नशास्त्रग्रन्थानुकरणम् विधाय केवलम् "नष्टेन्दुमङ्गलपतङ्गपतङ्गपुत्र" कथनेन पापग्रहान् निर्दिशति–

शुभग्रहाणां नामनिर्देशम् न कृत्वा केवलम् "शुभखेचरेण .....परिवर्धते" एतादृशम् निर्देशम् करोति। अनेन स्पष्टम् यत् येषां पापग्रहाणाम् निर्देशः "नाशं प्रयाति" एतत्फलनिर्धारणार्थम् कृतः त एव पापग्रहाः तदतिरिक्ता ग्रहाः एव शुभग्रहाः।

अर्थात् नष्टचन्द्रः (क्षीणचन्द्रः) मंगल, पतंगः (सूर्यः) पतङ्गपुत्रः सूर्यपुत्रः (शनिः) पापः एतदतिरिक्तम् पूर्णचन्द्रः, बुधः, गुरुः, शुक्रश्च एते ग्रहाः शुभग्रहाः भवन्ति। बुधविषये विशेषः – शुभग्रहयुतः बुधः शुभः, पापयुतः, बुधः (पापः) एष विशेषोऽपि यथासम्भवम् यथास्थलम् योजनीयम् पाठकैरिति दिक्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२.१६.३ राहुकेत्वोः विषये विशेषः

प्रायः ज्योतिषग्रन्थकाराः राहुकेत्वोः विषये स्पष्टतया उल्लेखं न कृतवन्तः परन्तु जातकपारिजाते बैद्यनाथदैवज्ञः **"क्षीणेन्दुमन्दरविराहुशिखिक्षमाजाः पापास्तु पापयुत चन्द्रसुतस्तु पापः"** अत्र राहुशिखिनौ (राहुकेतू) पापग्रहौ स्तः। भुवनदीपकप्रश्नग्रन्थेऽपि श्री पद्मप्रभूसूरिः "भौममन्दार्कभोगीन्द्राः प्रकृत्या दुःखदाः नृणाम्" अत्र भोगी (राहुः) प्रकृत्या दुःखदः पापग्रहः उल्लिखितः अतः राहूकेतूपापग्रहौस्तः।

२.१६.४ ग्रहदृष्टिविचारः

प्रियपाठकाः भवद्भिः १२ भावेभ्यः विचारणीयाः विषयाः ज्ञाताः। परन्तु भावफलवृद्धिः अथवा **"शुभखेचरेण दृष्टो युतो वा भावः परिवर्धते ऽसौ"** इति भावफलवृद्धिप्रसंगे ग्रहाणां दृष्टिः अपि कथम् भवति इत्यस्यापि अध्ययनम् अनिवार्यम्, अतः अन्यग्रन्थाधारं स्वीकृत्य ग्रहदृष्टिज्ञानम् प्रदर्श्यते। भुवनदीपकप्रश्नशास्त्रीयग्रन्थकर्ता श्रीपद्मप्रभुसूरिः स्वग्रन्थे गृहदृष्टिविचारः एवम् करोति– [5]

दशम तृतीयनवपञ्चमे चतुर्थाष्टमे कलत्रं च।
पश्यन्ति पादवृद्धया फलानि चैवं प्रयच्छति॥

पूर्णम् पश्यति रविजस्तृतीयदशमे त्रिकोणमपि जीवः।
चतुरस्रम् भूमिसुतः सितार्कबुधाः हिमकराः कलत्रं च॥

कथनस्य तात्पर्योऽयं विद्यते यत् यस्मिन् कस्मिन्नपि स्थाने स्थिताः ग्रहाः तस्मात् स्थानात् त्रिदशादीनि स्थानानि तत्र तत्र स्थितान् ग्रहाश्च चरणाभिवृद्धया अवलोकयन्ति। ग्रहो यस्मिन् राशौ स्थितः तस्मात् तृतीयो दशमो यो ग्रहः भावो वा भवति तौ एकचरणेन पञ्चदशकलातुल्येन चतुर्थभागदृष्टया अवलोकयन्ति। एवं करमादपि ग्रह्यात् त्रिकोणस्थौ (नवमपञ्चमस्थौ) यौ भावौ च तयोः भावयोः ये ग्रहाः स्थिताः तं तं भावं तांश्चग्रहान् सर्वेग्रहाः चरणद्वयात्मिकया दृष्टया अर्धदृष्टया त्रिंशत् कलातुल्यदृष्ट्या पश्यति। अथ च अष्टमचतुर्थस्थानस्थितराशीन् (भावान्) ग्रहांश्च सर्वे ग्रहाः त्रिचरणदृष्टया १५ x ३ = ४५ कला दृष्टया पश्यन्ति। एवमेव कलत्रस्थितराशीन् (भावान्) ग्रहांश्च सर्वे ग्रहाः पूर्णदृष्टया (चतुः चरणदृष्टया १५ x ४ = ६० कला) पश्यन्ति।

२.१६.५ शनिभौमगुरूणां विशेषदृष्टिः

लघुजातकग्रन्थकारो ऽपि कथयति – **"पश्यन्ति सप्तमम् सर्वे शनिजीवकुजाः पुनः विशेषतश्च त्रिदशत्रिकोणचतुरष्टमान्"**। अत्रापि भुवनदीपककारः "पूर्णं पश्यति रविजः" इत्यादि वाक्यैः कथयति यत् शनिः तृतीयदशमस्थानम्, गुरुः नवमपञ्चमस्थानम्, भौमः चतुर्थमष्टमस्थानञ्चापि पूर्णया दृष्टया (६०कला) मितया पश्यति।

इत्थम् निम्नेन दृष्टिचक्रेण सर्वम् स्पष्टम् भवति –

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ग्रहाः	सूर्यः	चन्द्रः	भौमः	बुध	गुरुः	शुक्रः	शनिः
पूर्ण दृष्टिस्थानम्	7 –	7 –	7 4-8	7 –	7 5-9	7 –	7 3-10
१ चरण दृष्टिस्थानम्	3-10	3-10	3-10	3-10	3-10	3-10	पूर्णम्
२ चरण दृष्टिस्थानम्	5-9	5-9	5-9	5-9	पूर्णम्	5-9	5-9
३ चरण दृष्टिस्थानम्	4-8	4-8	पूर्णम्	4-8	4-8	4-8	4-8

२.१६.६ भाववृद्धेः उदाहरणम्

पूर्वश्लोके भवान् पठितवान् यत् **"भावो हि यः स्वपतिना शुभखेचरेण दृष्टो युतो भवति वा परिवर्धतोऽसौ"** अधुना अस्योदाहरणम् भवन्तः ज्ञास्यन्ति। कल्पिता कुण्डली –

कल्पितकुण्डली



अत्र प्रश्नकुण्डल्याम् लग्नम् सिंहः अस्ति। एष तनुभावः अर्थात् शरीरभावः अस्ति। अत्र लग्ने सिंहराशिः अतः लग्नस्थराशेः सिंहस्य स्वामी सूर्यः वर्तते। सूर्यः सप्तमभावे विद्यमानः। अतः पश्यन्ति सप्तमं सर्वे इति नियमेन प्रथमभावः स्वपतिना दृष्टः, अथ च गुरुः शुभग्रहः पञ्चमभावे स्थितः सन् नवमदृष्टया (विशेषपूर्णदृष्टया) लग्नम् पश्यति अतोऽत्र लग्नभावः स्वपतिनापि दृष्टः शुभखेचरेण गुरुणा अपि दृष्टः अतः असौ तुनभावः परिवर्धते इति सिद्धः। अत्र **"भावपरिवर्धनम्"** अस्य शब्दस्य अर्थः भवति तत्तद्भावस्य तस्य फलस्य च वृद्धिः शुभत्वम् वा। एतद्विपरीतम् पापग्रहैः, दृष्टः युतो वा भावः हानिम् प्राप्नोति यथा अग्रे उदाहरण द्वारा भवन्तः ज्ञास्यन्ति।

२.१६.७भावनाशस्योदाहरणम्

नष्टेन्दुमङ्गलपतङ्गपतङ्गपुत्रैर्नाशं प्रयाति – अत्र ग्रन्थकारः कथयति यत्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पापग्रहैः (नष्टेन्दुमङ्गलपतङ्गपुत्रैः) दृष्टो युतो वा भावः नाशं प्रयाति। अत्र अन्वयः एवम् भविष्यति – भावो हि यः ..."नष्टेन्दुमंगलपतङ्गपतङ्गपुत्रैः दृष्टो युतो वा भवति" सः नाशम् प्रयाति। अस्योदाहरणम् –



अत्र कर्कलग्नम् अस्ति। धनभावे सिंहराशिः वर्तते। चन्द्रमा सूर्यनिकटस्थता वशात् नष्टेन्दुः वर्तते। धनभावोपरि नष्टेन्दुचन्द्रस्य दृष्टिः, शनेः विशेष पूर्ण दृष्टिः (तृतीय दृष्टिः), भौमस्य विशेष पूर्णदृष्टिः चतुर्थदृष्टिः वर्तते। अतः अत्र प्रश्नकुण्डल्याम् धनभावः नष्टेन्दुमंगल पतङ्गपतङ्गपुत्रैः दृष्टः वर्तते अतः एष भावः **"नाशम् प्रयाति"** इति लक्षणत्वात् धनभावहानिकारकयोगः वर्तते।

अत्र विशेषः – अस्मिन् प्रश्नांगे धनेशः सूर्यः वर्तते अत्र धनेशः सूर्यः स्वभावम् धनभावम् पश्यति अतः धनभाव परिवर्धनम् सूर्यः करिष्यति। अत्र यदि शुभग्रहाणाम् युतिः दृष्टिरपि योगे स्यात् तर्हि एष योगः **"मिश्रयोगः"** अर्थादत्र परिवर्धनम् अपि हानिरपि भविष्यतीति वक्तव्यम्। अग्रे एतत् स्पष्टं क्रियते।

२.१६.८ मिश्रखगैर्विमिश्रम् (मिश्रफलोदाहरणम्)

भवद्भिः पठितम् यत् शुभग्रहाः भावपतेश्च दृष्टया युत्या वा' भावपरिवर्धनम् कुर्वन्ति। तत्रैव पापग्रहाः दृष्टया युत्या वा भावहानिम् कुर्वन्ति तत्रैव यदि भावोपरि पापग्रहाणाम् दृष्टिः युतिर्वा स्यात् परन्तु भावपतिः शुभग्रहश्च अपि दृष्टिकारकः युतिकारको वा भवेत् सः शुभफलकारकः अपि भविष्यति अर्थात् मिश्रखगैः शुभैः पापैश्च उभयविधैः ग्रहैः दृष्टो युतो-वा यो हि भावः स मिश्रफलम् करोति यथोदाहरणम् –



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अत्रोदाहरणे – मकरलग्नमस्ति सुखभावे भौमराशिः अतः सुखेशः भौमः सुखभावम् पूर्णदृष्ट्या (विशेषदृष्टया) पश्यति। अतः अयं भावः भावेशेन (भावपतिना) दृष्टः, अतः भावोऽसौ परिवर्धते। शुभखेचरः गुरुः अपि पूर्णदृष्टया शुक्रश्च पूर्णदृष्टया सुखभावं पश्यति अतः भावोऽसौ परिवर्धते। सहैव नष्टेन्दुः, शनिः सूर्यश्च सुखभावम् पश्यन्ति अतः नष्टेन्दुमंगलपतङ्गपतङ्गपुत्रैः दृष्टत्वात् नाशं प्रयाति अस्यापि प्रभावः स्पष्टमेव। एतादृशेषु योगेषु मिश्रैः मिश्रफलम् प्रदिष्टम्, अर्थात् मिश्रफलम् शुभम् अशुभम्, भावपरिवर्धनम् भावहानिः सुखवृद्धिः सुखविनाशनञ्च उभयमपि भविष्यति, इति दिक्।

बोधप्रश्नाः

१३. शुभग्रहाः के सन्ति?

.....

.....

१४. पापग्रहाः के भवन्ति?

.....

.....

१५. को भावः परिवर्धते?

.....

.....

१६. को भावः नाशं प्रयाति?

.....

.....

१७. चतुरस्रसंज्ञा कयोः भावयोः भवति?

.....

.....

१८. द्यून नाम्ना आज्ञा नाम्ना च कयोः भावयोः ग्रहणम् भवति?

.....

.....

१९. मीनलग्ने दशमभावेशः कः?

.....

.....

२०. शनिभौमगुरूणाम् विशेषदृष्टिः लिख्यताम्।

.....

.....

२.१७ फलोपयोगिविषयः

प्रिय पाठकाः भवद्भिः इदम् अधीतम् यत् कस्यापि भावस्य कृते भावृद्धिकरत्वम्,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भावहानिकरत्वञ्च पूर्वम् विचारणीयम्। पूर्वश्लोके एतदेव भवद्भिः अधीतम्। अधुना यथा भावफलनिर्धारणे शुभाशुभग्रहाणाम् भावस्वामिनश्च दृष्टेः युतेः वा महती भूमिका भवति तथैव ग्रहाणाम् फलनिर्धारणे ग्रहाणाम् अवस्थाविशेषस्य, उच्चनीचादिराशौ स्थितेः, मित्रसमशत्रूणाम् च विचारस्य, ग्रहबलस्य स्वभावादिकस्य च महती उपयोगिता भवति। एतस्य आवश्यकत्वम् विचार्य आचार्यः जीवनाथः कथयति –

तुङ्गमित्रादिकं ज्ञात्वा ग्रहाणां शयनादिकम्।
बलाबले स्वभावञ्च प्रश्नकाले फलं वदेत्॥

पदच्छेदः – तुङ्गमित्रादिकं ज्ञात्वा ग्रहाणां, शयनादिकम्, बलाबले, स्वभावम्, च , प्रश्नकाले, फलम् वदेत्।

अन्वयः – प्रश्नकाले, ग्रहाणाम्, तुङ्गमित्रादिकम्, शयनादिकम्, बलाबले , स्वभावम्, च ज्ञात्वा, फलम् वदेत्।

प्रतिपदार्थः – प्रश्नकाले = यस्मिन् काले प्रश्नकर्ता प्रश्नम् कुर्यात् सः कालविशेष एव प्रश्नकालः, तस्मिन् ग्रहाणाम् = सूर्यचन्द्रभौमबुधगुरुशुक्रशनिराहुकेतूनाम् नवग्रहाणाम् इत्यर्थः, तुङ्गमित्रादिकम् = तुङ्गम् उच्चम्, आदि शब्देन नीचम्, मूलत्रिकोणम्, स्वगृहादिकम् च, मित्रशब्देन मित्रसमशत्रुकथनम् आदि शब्देन अधिमित्रअधिशत्रुविचारसहितम् पञ्चधामैत्रीविचारम्, शयनादिकम् = शयनादिद्वादशअवस्थाः, जाग्रदादिअवस्थात्रयम्, बालाद्यवस्थापञ्चकेत्यादिकम्, बलाबले = ग्रहाणाम् स्थानबलकालबलदिग्बलचेष्टाबलग्रहदृष्टि-बलादिकम्, निर्बलत्वम् अस्तंगतनीचस्थानादिजन्यनिर्बलत्वम् विचार्य, स्वभावम् = क्रूरसौम्यादिग्रहाणाम् स्वाभाविकम् स्वभावम् स्थानानुगुण्येन परिवर्तनीयस्वभावम् च, ज्ञात्वा = अन्यग्रन्थानामध्ययनेन अन्यपाठ्यसामग्रीमाध्यमेन वा परिज्ञाय, प्रश्नविद्याप्रवीणः दैवज्ञः फलम् वदेत् कथयेदिति दिक्–

विशिष्टार्थः – प्रश्नशास्त्रे फलादेशार्थम् ग्रहाणाम् भावानाम् च विषये किञ्चित् विशिष्टम् ज्ञानम् अपि भाव्यम्। तत् ज्ञानमपि अन्यग्रन्थेभ्यः आकृष्य अत्र भवताम् कृते निर्दिश्यते। वस्तुतः संज्ञाध्याये एष अन्तिमः श्लोकः। श्लोकेऽस्मिन् ग्रन्थकारः निर्दिशति यत् ग्रहाणाम् उच्चनीचादिकम्, ग्रहाणां स्वभावम्, शयनादि अवस्थादिकम् बलाबलम् च पूर्वम् ज्ञातव्यम्। तदनन्तरम् एव प्रश्नविद्याप्रवीणाः फलादेशार्थम् अधिकारी, अन्यथा तु अनधिकारचेष्टा एव। अतः अस्माभिः अत्र ग्रहाणाम् तुङ्गमित्रादिकम् क्रमशः निरूप्यते। यतो हि एषाम् ज्ञानं विना कस्यापि प्रश्नस्य उत्तरं दातुम् न शक्यते।

२.१७.१ ग्रहाणाम् तुङ्गनीचराशयः

जातकशास्त्रस्य प्रायः सर्वेषु ग्रन्थेषु ग्रहाणाम् उच्चनीचराशयः परमोच्चांशाश्च पठिताः सन्ति यथा – बृहज्जातके –

अजवृषभमृगाङ्गनाकुलीरा झषवणिजौ च दिवाकरादितुङ्गाः।
दशशिखिमनुयुक्तिथीन्द्रियांशैस्त्रिनवक विंशतिभिश्च तेऽस्तनीचाः।

अस्य श्लोकस्य भावः निम्न चक्रेण स्पष्टम्

ग्रहाणामुच्चनीचचक्रम्

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ग्रहाः	सूर्यः	चन्द्रः	भौमः	बुध	गुरुः	शुक्रः	शनिः
उच्च राशयः	अजः (मेष)	वृषभः (वृषः)	मृगः (मकरः)	अङ्गना (कन्या)	कुलीरः (कर्कः)	झषः (मीनः)	वणिजः (तुला)
नीच राशयः	तुला	वृश्चिकः	कर्कः	मीनः	मकरः	कन्या	मेषः
परमोच्च परमनीचांशाः	(दश) 10	(शिखि) 03	(मनुयुक्) 14X14= 28	(तिथि) 15	(इन्द्रिय) 05	(त्रिनवकः) 3X9= 27	(विंशतिः) 20

अस्य उच्चनीचनिर्धारणस्य विषये आचार्यः पद्मप्रभुसूरिः भुवनदीपके प्रश्नशास्त्रग्रन्थे स्पष्टम् कथयति –

रवेर्मेषतुले प्रोक्ते चन्द्रस्य वृषवृश्चिकौ
भौमस्य मृगककौं च कन्यामीनौ बुधस्य च।
जीवस्य कर्कमकरौ कन्यामीने सितस्य च
तुलामेषौ च मन्दस्य उच्चनीचे उदाहृते॥

➢ **राहुकेत्वोः उच्चनीचविषये विशेषः**

प्रश्नशास्त्रीयग्रन्थे भुवनदीपके एव आचार्यपद्मप्रभुसूरिः निर्दिशति–

कन्या राहूगृहम् प्रोक्तम् राहूच्चम् मिथुनं स्मृतम्।
राहुर्नीचम् धनुर्वर्णादिकम् शनिवदस्य च॥

केतुविषये विशेषः

राहुच्छाया स्मृतः केतुर्यत्र राशौ भवेदयम्

तत्स्मात्सप्तमके केतुः राहुः स्याद् यत्र चांशके।
तस्मादंशे सप्तमे स्यात्केतो रंशः नवांशकः॥

ग्रहौ	राहुः	केतुः
उच्चराशिः	मिथुनम्	धनुः
नीचराशिः	धनुः	मिथुनम्
स्वराशिः	कन्या	मीनः

केतोः विषये – **"तस्मात् सप्तके केतुः राहुः स्याद्यत्र चांशके"** अनेन नियमेन राहुतः केतुः सप्तमराशौ भवति।

विशेषः – यद्यपि राहुकेतोः उच्चादिविषये आचार्येषु कश्चन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मतभेदोऽपि दृश्यते यथा – पराशरः कथयति।

राहोस्तु वृषभं केतोः वृश्चिकस्तुङ्गसंज्ञकम्।
मूलत्रिकोणकम् युग्मम् चापं वेद्यम् यथाक्रमम्॥
घटाली अपि वा कन्यामीनौ कैश्चित् गृहे स्मृते॥[2]

२.१७.२ ग्रहाणाम् मित्रादिकम्

ग्रहाणाम् परस्परम् मित्रादिकम् अपि नैसर्गिकमैत्री –तात्कालिकमैत्री –पञ्चधामैत्री रूपे जातकग्रन्थेषु प्रायः निर्दिष्टमस्ति। प्रश्नशास्त्रग्रन्थे भुवनदीपके मित्रादिकम् (नैसर्गिकमैत्री रूपे) एवम् विचारितम् –[2]

रवीन्द्रभौमगुरवो ज्ञशुक्रशनिराहवः।
स्वस्मिन् मित्राणि चत्वारि परस्मिन् शत्रवः स्मृताः॥

राहुरव्योः परम् वैरं गुरुभार्गवयोरपि।
हिमांशुबुधयोर्वैरम् विस्वन्मन्दयोरपि॥

ज्ञशनी सुहृदौ मित्राण्यर्ककुजाः सदा पूज्यवर्गौ गुरुसितौ।
स्पष्टतया ज्ञानार्थम् नैसर्गिकमैत्रीचक्रम् निर्दिश्यते॥

विशेषः – एतच्चक्रम् मुहूर्तचिन्तामणिग्रन्थोक्तमैत्रीविचारेण निर्मित्तम्।
स च यथा –[3]

मित्राणि द्युमणेः कुजेन्यशशिनः शुक्रार्कजौ वैरिणौ।
सौम्यश्चास्य समो विधोर्बुधरवी मित्रे न चास्य द्विषत्॥

शेषाश्चास्य समाः कुजस्य सुहृदश्चन्द्रेज्यसूर्याबुधः।
शत्रुः शुक्रशनी समौ च शशभृत्सूनोः सिताहस्करौ॥

मित्रे चास्य रिपुः शशी गुरुशनिक्ष्माजाः समा गीष्पतेः।
मित्राण्यर्ककुजेन्दवो बुधसितौ शत्रू समः सूर्यजः॥

मित्रे सौम्यशनी कवेः शशिरवी शत्रू कुजेज्यौ समौ।
मित्रे शुक्रबुधौ शनेः शशिरविक्ष्माजाः द्विषोऽन्यः समः॥

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ग्रहाणाम् नैसर्गिक मित्रसमशत्रु बोधक चक्रम्

ग्रहाः	सूर्यः	चन्द्रः	भौमः	बुधः	गुरुः	शुक्र	शनि
मित्राणि	च मं. बृ.	सू. बु.	सू. चं. बृ.	सू. शु.	सू. च. मं.	बु. श	बु. शु.
समाः	बु.	मं. बृ. शु. श.	शु. श.	म. बृ. श.	श.	मं. बु.	बृ.
शत्रवः	शु. श.		बु.	च.	बु. शु.	सू. च.	सू. च. मं.

उपर्युक्त भुवनदीपकमतानुसारम् प्रश्नशास्त्रे मित्रादिकत्वमेवमस्ति – तस्य मते समत्वम् नास्ति।

परमवैरविचारः[1]

राहुरव्योः परम् वैरम्
गुरुभार्गवयोः(बृहस्पतिशुक्रयोः) परम् वैरम्
विवस्वन्मन्दयोः (सूर्यशन्योः) परम् वैरम्

सदामित्राणि[2]

ज्ञशनी सुहृदौ सदा भवतः
अर्ककुजौ अपि सदा मित्रौ भवतः।

फूज्यवर्गौ गुरुसितौ (गुरुशुक्रौ)
अत्र विशेषः केतोः मित्रादिकम् राहुवत् बोध्यम्।

भुवनदीपकमतेन मित्रादिकत्वम्

ग्रहाः	सूर्यः	चन्द्रः	भौमः	बुधः	गुरुः	शुक्र	शनि	राहु
मित्राणि	च मं. बृ.	सू. मं. बृ.	सू. चं. बृ.	शु. श. रा.	सू. च. मं.	बु. श रा.	शु. बु. रा.	बु. शु. श.
शत्रवः	बु. शु. श. रा.	बु. शु. श. रा.	बु. शु. श. रा.	सू. च. मं. बृ.	बु. शु. श. रा.	सू. च. मं. बृ.	सू. च. मं. बृ.	सू. च. मं. बृ.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२.१७.३ ग्रहाणाम् शयनादिकम् अवस्थाः

ज्योतिषशास्त्रस्य अनेकग्रन्थेषु ग्रहाणाम् अनेकविधावस्थानिरुपणम् फलादेशे निर्णयार्थम् अनेकैः आचार्यैः कृतमस्ति यथा भावकुतूहले स्वयम् प्रश्नभूषणस्यापि रचयिता श्री जीवनाथः एवम् निर्दिशति – शयनाद्यवस्थासाधनम् –

ग्रहर्क्षसंख्या खगमाननिघ्नी खेटांशसंख्यागुणिता ग्रहाणाम्।
निजेष्टजन्मर्क्षतनुप्रमाणैर्युक्ताऽर्कतष्टा शयनाद्यवस्था॥

भावार्थः – यस्य कस्यापि ग्रहस्य शयनाद्यवस्थाज्ञानम् अभीष्टमस्ति तस्य ग्रहस्य निम्नविषयाः पूर्वम् विज्ञेयाः भवन्ति –

१. ग्रहस्पष्टानुसारम् नक्षत्रज्ञानम्

२. नक्षत्रगणनया नक्षत्रसंख्याज्ञानम्

३. ग्रहसंख्याज्ञानम्

विधिः – प्रश्नकाले यस्मिन् नक्षत्रे ग्रह स्थितः तस्य नक्षत्रस्य संख्या ग्रहसंख्यया, ग्रहस्थराशेः वर्तमानांशस्य संख्यया संगुण्य इष्टघटी इष्टनक्षत्रम् लग्नसंख्याम् संयोज्य द्वादशभक्ते सति शेषतुल्या शयनाद्यवस्था भवति। सूत्ररूपेण इदमवधेयम् – ग्रहाधिष्ठित नक्षत्र संख्या x ग्रहसंख्या x ग्रहांशसंख्या + इष्टकालः + जन्मनक्षत्रम् + लग्नम्) ÷ १२ = शेषम् अवस्थाः। तासाम् नामानि सन्ति –[1]

प्रथमम् शयनम् ज्ञेयम् द्वितीयमुपवेशनम्।
नेत्रपाणिः प्रकाशश्च गमनागमने ततः॥

सभावस्था ततो ज्ञेया चागमो भोजनन्तथा।
नृत्यलिप्सा कौतुकञ्च निद्रावस्था नभः सदाम्॥

अत्रोदाहरणम् –

सूर्यस्य शयनाद्यवस्थासु अवस्था विज्ञेया अस्ति। आवश्यकोपकरणानि निम्नानि सन्ति –

सूर्यस्पष्टम् ५ - ११ नक्षत्रम् (हस्तः)

अश्विनीनक्षत्रगणनावशात् नक्षत्रसंख्या = १३

ग्रहः सूर्यः तस्य संख्या ०१

इष्टकालः १० घटी

जन्मनक्षत्रम् अनुराधा, तस्य संख्या १७

जन्मलग्नम् वृश्चिकः तस्य संख्या ८

ग्रहस्य अंशसंख्या = ११

सूत्रानुसारम् क्रिया –

ग्रहनक्षत्रसंख्या = सूर्याधिष्ठितनक्षत्रसंख्या = हस्त = १३

अभीष्टग्रहः = सूर्यः तस्य संख्या = १ अतः १३ x १ = १३

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ग्रहस्य वर्तमान अंशसंख्या = ११ अतः १३ X ११ = १४३ गुणनफलम्

इष्ट घटी संख्या = १० अतः १४३ + १० = १५३

जन्मनक्षत्रम् अनुराधा तस्य संख्या = + १७ अतः १५३ X १७ = १७० योगफलम्। जन्मलग्नम् = वृश्चिकः तस्य संख्या ८ अतः + ८, १७० + ८ = १७८

अस्मिन् १२ भक्ते सति १७८ ÷ १२ = लब्धिः १४, शेषम् १०

दशमी अवस्था नृत्यलिप्सा जाता अनेन सिद्धम् यत् सूर्यः शयनादिद्वादश-अवस्थासु **"नृत्यालिप्सा"** अवस्थायामस्ति।

एवम् भवद्भिः पाठकैः ग्रहाणाम् शयनादि अवस्थानाम् ज्ञानम् विधेयम्। एतदतिरिक्तम् दृष्टिः, चेष्टा, विचेष्टा एतद् दृष्टयाद्यवस्थात्रयम्, जागत्स्वप्नसुषुप्त्याद्यवस्था त्रितयम्, दीप्ताद्यवस्थानवकम् (दीप्तः, स्वस्थः, मुदितः, शान्तः, दीनः, अतिदुखितः, विकलः, खलः, क्रोधी, बालाद्यवस्था (बालः कुमारः, युवा, वृद्धः, मृतः) पञ्चकम्, प्रवासादि (प्रवासः, नष्टः, मृतः, जयः, हास्यः, रतिः, मुदः, सुप्तः, भुक्तः, ज्वरः, कम्पः, स्थिरः) अवस्था द्वादशकम् अन्य ग्रन्थेभ्यः विज्ञाय प्रश्नफलम् वक्तव्यम्। विषेयऽस्मिन् सहायकग्रन्थाः सन्ति –

१ भावकुतूहलम् (श्री जीवनाथ झा प्रणीतम्) अध्याय 11

२. बृहत्पाराशरहोराशास्त्रम्, ग्रहावस्थाफलाध्यायः 46

३. ग्रहस्वरूपज्ञानार्थम् "भुवनदीपकम्" संस्कृतभाष्यम् लेखकः वासुदेव शर्मा

४. ग्रहबलज्ञानार्थम् "केशवीयजातकपद्धतिः" प्रो. चन्द्रमा पाण्डेय टीकासहितम्।

अधुना भवतां कृते ग्रहाणाम् बलाबलस्य सामान्यप्रकारः निरूप्यते।

२.१७.४ ग्रहाणाम् बलाबलनिरूपणम्

अनेके प्राचीनाचार्याः ग्रहाणां लग्नस्य च बलम् विशेषतया स्वस्वग्रन्थेषु निरूपितवन्तः –

तत्र एकः प्रकारः –

उदितः स्वगृहस्थश्च मित्रगेहे स्थितोऽपि च।
मित्रवर्गेण युक्तश्च स ग्रहः सबलः स्मृतः॥

स्वामिना बलिना दृष्टम् सबलैश्च शुभग्रहैः।
न दृष्टम् न युतं पापैस्तल्लग्नं सबलं स्मृतम्॥

यो ग्रहः उदितः (अस्तंगतः न स्यात्), स्वगृहेऽथवा मित्रगृहे स्थितो भवेत्, मित्रस्य षड्वर्गे (गृहहोराद्रेष्काणनवांशद्वादशांशत्रिंशाशे) स्थितः स्यात् सः ग्रहः बली भवति।

एतद्विपरीतम् यो ग्रहः अस्तंगतः, स्वनीचराशौ अथवा शत्रुगृहे शत्रोः षड्वर्गे वा स्थितः स ग्रहः निर्बलः (अबलः) स्मृतः।

अथ च यल्लग्नम् स्वस्वामिना, बलिना ग्रहेण, सबलैश्च शुभग्रहैः (पूर्वोक्तैः)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दृष्टम्, पापग्रहैः (नष्टेन्दुमंगलपतङ्गपतङ्गपुत्रैश्च) न दृष्टम्, न च युतम् तल्लग्नम् सबलम् स्मृतम्।

२.१७.५ ग्रहाणाम् स्वभावः

प्रिय पाठकाः ग्रहाणाम् स्वभावनिर्णयेऽपि अनेकग्रन्थानाम् अवलोकनम् अपेक्षितम् भवति विषयेऽस्मिन् भवतां कृते सहायकग्रन्थाः सन्ति –

१. ताजिक नीलकण्ठी (राशिस्वरूपम्, ग्रहस्वभावश्च)

२. बृहज्जातकम्

३. लघुजातकम्

४. बृहत्पाराशरहोराशास्त्रम्

५. जातकपारिजातः

६. भुवनदीपकम्

७. प्रश्नचिन्तामणिः

अत्र भवतां कृते ग्रहाणां स्वभावस्य सुरवावबोधाय प्रश्नचिन्तामणिग्रन्थतः ग्रहाणाम् स्वभावबोधकाः श्लोकाः विलिख्यन्ते –

सूर्य स्वभावः

पूर्वं सत्त्वं नृपस्तातः क्षयं ग्रीष्मोऽरुणश्चलः।
मधुदृक् पैत्तिको धातुः शूरः सूक्ष्मकरो रविः।।

चन्द्रस्वभावः

कफी वर्षा मुदुर्माता पयो गौरश्च सात्विकः।
जीवो वैश्यचरो वृत्तो मारुताशा विधुः सुदृक्।।

मंगलस्वभावः

ग्रीष्मः क्षत्रतमो रक्तो याम्यः सेनाग्रणीश्चरः।
युवा धातुश्च पिङ्गाक्षः क्रूरः पित्तं शिखी कुजः।।

बुधस्वभावः

शारदीशो हरिर्दीर्घः षण्ढो मूलं कुमारकः।
लिपिज्ञः उत्तरेशश्च शूद्रः सौम्यस्त्रिधातुकः।।

गुरुस्वभावः

सत्त्वं पित्तो हिमः श्लेष्मा दीर्घो मन्त्री द्विजो नरः।
मध्वैशानी कफो जीवो मधुपिङ्गलदृक् तथा।।

शुक्रस्वभावः

शुक्रः शान्तो द्विजो नारी वैश्यो मन्त्री चरः सितः।
आग्नेयी दिक्कफश्चाम्लः कुटिलासितमूर्धजः।।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शनिस्वभावः

कृष्णस्तमः कृशो वृद्धः षण्ढो मूलान्त्यजोऽलसः।
शिशिरः पवनः क्रूरो पश्चिमो वातुलः शनिः।।

राहुकेतुस्वभावः

राहुर्धातुः शिखीमूलं शेषमन्यच्च मन्दवत्।

विशेषः –

"चिन्तनीयं विलग्नेशात् केन्द्रगाद् वा बलाधिकात्।।

इत्थमन्येभ्योऽपि ग्रन्थेभ्यः ग्रहस्वरूपादिकम् ज्ञात्वा, ग्रहाणाम् तुङ्गनीचादिराशिषु स्थितिं विज्ञाय, मित्रसमशत्रुस्थानस्थितिम् युतिम् दृष्टिं च परिज्ञाय, शयनाद्यवस्थासु स्थितिवशात् उत्पन्नफले वैशिष्ट्यं विचिन्त्य, ग्रहस्य बलादिकं सम्यक् वीक्ष्य प्रश्नकाले प्रश्नकुण्डलीद्वारा फलादेशो विधेयः इति दिक्।

बोधप्रश्नाः

२१. भौमशन्योः उच्चराशी कौ स्तः?

.....

.....

२२. सूर्यचन्द्रयोः नीचराशी कौ स्त?

.....

.....

२३. भौमशन्योः मित्रग्रहाः के?

.....

.....

२४. भुवनदीपकग्रन्थे राहोः उच्चम् स्वगृहम् च किम्?

.....

.....

२५. भुवनदीपके स्वस्मिन् मित्राणि चत्वारि कानि ?

.....

.....

२६. कयोः द्वयोः ग्रहयोः परस्परम् परम् वैरम् अस्ति।

.....

.....

२७. सर्वमित्राणि निर्दिश्यताम्?

.....

.....

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२८. शयनादिद्वादशअवस्थानाम् नामानि कानि?

.....

.....

२९. सूर्यस्वभावः लिख्यताम्?

.....

.....

३०. शनिस्वभावः लिख्यताम्?

.....

.....

ग्रन्थस्य मूलपाठे

स्वरूपलक्षणञ्चापि वर्णभेदम् सुखासुखम्।
प्रश्नकर्त्तुर्वयोमानम् लग्नात्सर्वं विचिन्तयेत्॥

रत्नकाञ्चनमुक्तानां लाभालाभौ विचक्षणाः।
धातूनाञ्च धनस्थानाच्चिन्तयेत् क्रयविक्रयौ॥

पराक्रमं सहोत्थानाम् सुखं साहसकर्मणाम्।
दासानाञ्च भगिन्यादेस्तृतीयात्परिचिन्तयेत्॥

मित्रालयग्रामलाभो वाहनानां सुखं सुखात्।
मातापित्रोः सुखं क्षेत्रवाटिकादिसुखं तथा॥

गर्भापत्यनयानां वै मन्त्रसन्धानयोस्तथा।
बुद्धिप्रबन्धशास्त्राणाम् विचारः पञ्चमालयात्॥

मातुलानां रिपूणाञ्च महिष्याः क्रूरकर्मणाम्।
रोगातङ्कव्रणादीनां विचारो रिपुभावतः॥

परैः समं विवादञ्च वाणिज्यं व्यसनं तथा।
गमाऽगमौ कलत्रञ्च चिन्तयेत्सप्तमालयात्॥

रिपुसंग्रामदुष्टानां मार्गस्यापि गदस्य च।
नद्युत्तारभयानां व छिद्रं छिद्रे विचिन्तये॥

वापीकूपतडागानाम् निर्माणं देवतालयम्।
यात्रादीक्षाध्वकर्माणि चिन्तयेन्नवयामालयात्॥

पितुः सुखं तथा राज्यम् व्यापारं राजकर्म च।
पुण्यं मुद्रासुखं सर्वं चिन्तयेद् दशमालयात्॥

कन्याकाञ्चनसस्यानाम् वाहनानाञ्च लाभतः।
विद्याव्यापरवित्तानां कर्तव्या चिन्तना बुधैः॥

विवादत्यागभोगानाम् दानादिकृषिकर्मणाम्।
व्ययं व्यये निरोधञ्च रिपूणां प्रविलोकयेत्॥

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भावो हि यः स्वपतिना शुभखेचरेण।
दृष्टो युतो भवति वा परिवर्धतेऽसौ।
नष्टेन्दुमङ्गलपतङ्गपतङ्गपुत्रै-
र्नाशं प्रयाति किल मिश्रखगैर्विमिश्रम्॥

२.१८ सारांशः

शस्त्रावगाहिन्याः सेतुपाठयक्रमस्य चतुर्थपत्रे प्रथमे खण्डे द्वितीयेऽस्मिन् पाठे द्वादशभावेभ्यः (तनु धनसहजसुहृदपुत्ररिपुजायामृत्युधर्मकर्मलाभव्ययभावेभ्यः) पृथक् पृथक् विचारणीयाः विषयाः भवद्भिः सम्यगधीताः। दृष्टम् च भवद्भिः यत् कथम् प्रश्नतन्त्रे विचारणीयविषयानां निर्णये प्रश्नविद्याप्रवीणः बहुविधविषयनिर्णये चातुरीणां धुरीणः जायते। इदमपि भवद्भिः अनुभूतम् यत् तनु कोशरसहोदरबन्धुसुता ..... इत्यादि 12 भावसंज्ञाभिः निर्दिष्टाः भावाः एव तनुधनसहज सुहृद आदि नामभिरपि व्यवहियन्ते। यत्र अपत्यविचारः पञ्चमात् भावात् भवति तत्रैव कन्याविचारः एकादशभावात् क्रियते। वाहनानां सुखम् यत्र चतुर्थभावाधीनम् तत्रैव वाहनानां लाभः लाभभावतः विचार्यते। मातपित्रोः (उभयोः सुखं) सुखभावाधीनम् तत्रैव केवलं पितृसुखम् दशमभावाधीनम्। इत्यादयः अनेके विशेषाः 12 भावेभ्यः विचारणीयप्रसङ्गे भवद्भिः पठिताः। सामान्यतो भावविचारप्रसङ्गे भावेशनिर्णयतः भावपरिवर्धनप्रसंगे, भावहानिप्रसंङ्गे, विमिश्रफलप्रसंङ्गे च ग्रहाणाम् तुङ्गादिकम्, मित्रादिकम्, शयनाद्यवस्थानिरूपणम् ग्रहाणाम् बलाबलनिरूपम् ग्रहाणास्वभावनिरूपणञ्च अन्यग्रन्थाधारेण भवद्भिः अत्र अधीतम्।

२.१९ शब्दावली

१.	छिद्रम	–	अनर्थम्
२.	छिद्रे	–	अष्टमभावे
३.	नष्टेन्दुः	–	क्षीणचन्द्रमाः
४.	पतङ्गः	–	सूर्यः
५.	पतङ्गपुत्रः	–	शनिः
६.	मिश्रखगैः	–	शुभाशुभग्रहैः
७.	पृच्छताम्	–	प्रश्नकाले
८.	जन्मतः	–	जन्मकाले
९.	आस्पदः	–	दशमभावः
१०.	स्वः	–	धनभावः
११	प्रतिभा	–	पञ्चमभावः
१२.	क्षतः	–	षष्ठभावः
१३.	चितोत्थः	–	सप्तमभावः
१४.	रन्धः	–	अष्टमभावः
१५.	गुरुः	–	नवमभावः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१६.	मानः	–	दशमभावः
१७.	भवः	–	एकादशभावः
१८.	खम्	–	दशमभावः
१९.	आज्ञा	–	दशमभावः
२०.	चतुरस्रम्	–	चतुर्थाष्टमभावौ
२१.	द्यूनम्	–	सप्तमभावः
२२.	रिष्फम्	–	द्वादशभावः
२३.	दुश्क्यम्	–	तृतीयभावः
२४.	व्योमः	–	दशमभावः
२५.	कलत्रम्	–	सप्तमभावः
२६.	निशाधिपः	–	चन्द्रः
२७.	महीसुतः	–	मंगलः
२८.	भोगीन्द्रः	–	राहुः
२९.	पादवृद्धया	–	चरणवृद्धया
३०	त्रिकोणम्	–	नवमपञ्चमस्थानम्
३१.	मृगः	–	मकरराशिः
३२.	कुलीरः	–	कर्कराशिः
३३.	अङ्गना	–	कन्याराशिः
३४.	झषः	–	मीनराशिः
३५.	वणिजः	–	तुलाराशिः
३६.	शिखि	–	त्रीणि
३७.	मनुयुक्	–	14 X 2 = 28
३८.	तिथि	–	15
३९.	त्रिनवक	–	3 X 9 = 27
४०	अस्तनीचाः	–	सप्तमस्थाः नीचराशयः
४१.	युग्मम्	–	मिथुनराशिः
४२.	चापम्	–	धनुराशिः
४३.	घटाली	–	कुम्भः, वृश्चिकराशिश्च
४४.	हिमांशुः	–	चन्द्रः
४५.	विवस्वान्	–	सूर्यः

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

४६.	ज्ञः	–	बुधः
४७.	कुजः	–	मंगलः
४८.	सितः	–	शुक्रः
४९.	अहस्करः	–	सूर्यः
५०.	गीष्पतेः	–	गुरोः
५१.	ग्रहर्क्षसंख्या	–	ग्रहाधिष्ठितनक्षत्रसंख्या
५२.	खगमान	–	ग्रहसंख्या
५३.	निघ्नी	–	गुणिता
५४.	खेटांशः	–	ग्रहांशः
५५.	निजेष्टः	–	इष्टकालः
५८.	जन्मर्क्षः	–	जन्मनक्षत्रसंख्या
५९.	मित्रवर्गेण	–	मित्रग्रहाणां षड्वर्गेण

६०. वर्गाः गृहहोराद्रेष्काणसप्तांशनवांशद्वादशांशत्रिंशांशादयः।

२.२० सन्दर्भग्रन्थाः

१. षट्पञ्चाशिका

२. वृहज्जातकम्

३. लघुजातकम्

४. जातकपरिजातम्

५. वृहत्पाराशरहोराशास्त्रम्

६. भुवनदीपकम्

७. मुहूर्तचिन्तामणिः

८. भावकुतूहलम्

९. प्रश्नचिन्तामणिः

२.२१ सहायकग्रन्थाः

१. भुवनदीपकम् – ग्रहस्वरूपज्ञानार्थम्

२. जातकपारिजातम् – भावविचारार्थम्

३. केशवीयजातकपद्धतिः (ग्रहवलज्ञानार्थम्)

४. भावकुतूहलम् (शयनाद्यवस्थाज्ञानार्थम्)

५. वृहत्पाराशरोहराशास्त्रम् (शयनाद्यवस्थाफलविशेषज्ञानार्थम्)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२.२२ बोधप्रश्नोत्तराणि

१. प्रथमभावः

२. द्वितीयभावः

३. चतुर्थभावः

५. पञ्चम:भावः

६. षष्ठेन

७. राशीनामुदयो लग्नं ते तु मेषवृषादयः

८. सप्तमभावः

९. अष्टमः भावः

१०. दशमभावः

११. एकादशः

१२. द्वादशभावेन

१३. पूर्णेन्दुः शुभयुतः बुधः, गुरुः, शुक्रश्च

१४. नष्टेन्दुमंगलपतंगपतंगपुत्राः पापयुतो बुधश्च

१५. भावो हि यः स्वपतिना शुभखेचरेण दृष्टो युतो भवति वा परिवर्धते ऽसौ

१६. नष्टेन्दुमंगलपतंगपतंगपुत्रैः " द्रष्टो युतो वा भवति" सः भावः नाशं प्रयाति

१७. चतुर्थाष्टमयोः

१८. सप्तमभावस्य, दशमभावस्य च

१९. शुक्रः, गुरुश्च

२०. शनेः तृतीयदशमे, भौमस्य चतुर्थाष्टमे, गुरोः नवमपञ्चमे

२१. भौमस्य मकरः, शनेः तुला

२२. सूर्यस्य तुला, चन्द्रस्य वृश्चिकः

२३. भौमस्य सूर्यचन्द्रगुरवः, शनेः, बुधः, शुक्रः राहुश्च

२४. राहोः उच्चम् मिथुनम्, स्वराशिः कन्याः

२५. रवीन्दुभौमगुरवः

२६. राहुरव्योः गुरुभार्गवयोः सूर्यशन्योः वा परं वैरम्

२७. मित्राण्यर्ककुजाः सदा

२८. शयनम्, उपवेशनम्, नेत्रपाणिः, प्रकाशः, गमनम्, आगमनम्, सभा, आगमः, भोजनम्, नृत्यलिप्सा, कौतुकम्, निद्रावस्था च (१२)

२९. सूर्य स्वभावः – पूर्वं सत्त्वं नृपस्तातः क्षयं ग्रीष्मोऽरुणचलः। मधुदृक् पैत्तिको धातुः शूरः सूक्ष्मकरो रविः।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३०. शनेः स्वभावः – कृष्णस्तमः कृशो वृद्धः षष्ठो मूलान्त्यजोऽलसः। शिशिरः पवनः क्रूरो पश्चिमो वातुलः शनिः।

२.२३ अभ्यासप्रश्नाः

१. बालादिपञ्चावस्थानाम् नामानि कानि।

२. ग्रहबलत्वज्ञापकोदाहरणानि प्रदर्शयत्।

३. नैसार्गिकमैत्री मुहूर्तचिन्तामणिमते प्रदर्शनीया।

४. भुवनदीपककारमते मित्रादित्वम् प्रदर्श्यताम्।

५. ग्रहाणाम् उच्चराशयः लेख्याः।

६. राहुकेत्वोः उच्चनीचादिकम् प्रदर्श्यताम्

७. राहुग्रहस्य पापग्रहत्वे प्रमाणश्लोको लेख्यः।

८. 'कर्क लग्ने' 12 भावेशाः ग्रहाः लेख्याः।

९. भावहानिप्रदर्शनोदाहरणम् दीयताम्।

१०. भावप्रवर्धनस्योदाहरणम् निर्मीयताम्।

—•—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तृतीयः पाठः (सर्वप्रश्नोपयोगी विचारणा)

पाठसंरचना

३.१ प्रस्तावना

३.२ उद्देश्यम्

३.३ कपटप्रश्नलक्षणम्

३.३.१ प्रश्नकुण्डलीनिर्माणविधिः

३.३.२ कपटप्रश्नयोगः

- कपटप्रश्ने लग्ने शनिचन्द्रयोः परीक्षणम्
- कपटप्रश्ने सूर्यस्य कुंभे स्थितिः, बुधस्य रश्मिहीनता च

३.३.३ अन्यप्रश्नग्रन्थेषु कपटप्रश्नलक्षणानि

- ग्रहदृष्टिविचारः

बोधप्रश्नाः

३.४ सकलप्रश्नेषु कार्यसिद्धियोगः

३.४.१ लग्नेशकार्येशपरिचयः

३.४.२ कार्यसिद्धियोगः प्रथमः उदाहरणञ्च

३.४.३ कार्यसिद्धियोगः द्वितीयः उदाहरणञ्च

३.४.४ कार्यसिद्धियोगः तृतीयः उदाहरणञ्च

३.४.५ कार्यसिद्धियोगः चतुर्थः उदाहरणञ्च

३.४.६ कार्यसिद्धियोगेषु विशेषः

३.४.७ सर्वेषु कार्यसिद्धियोगेषु चन्द्रदृष्टेः प्राधान्यम्, उदाहरणञ्च

बोधप्रश्नाः

३.५ कार्यसिद्धिप्रश्ने योगान्तरविचारः

३.५.१ शुभवर्गनिरूपणम्

३.५.२ अशुभवर्गनिरूपणम्

३.५.३ नरराशिस्त्रीराशिज्ञानम्

बोधप्रश्नाः

३.६ योगान्तरविचारस्योदाहरणानि

३.६.१ शुभवर्गोदाहरणम्

३.६.२ अशुभवर्गोदाहरणम्

३.६.३ "मिश्रे कार्यं विलम्बतः" अस्य उदाहरणम्

ग्रन्थस्य मूलपाठः

३.७ सारांशः

३.८ शब्दावली

३.९ सन्दर्भग्रन्थाः

३.१० सहायकग्रन्थाः

३.११ बोधप्रश्नोत्तराणि

३.१२ अभ्यासप्रश्नाः

३.१ प्रस्तावना

प्रेयांसः छात्राः! सेतुपाठ्यक्रमस्य चतुर्थपत्रे प्रथमखण्डस्य तृतीये पाठे भवताम् स्वागतम्। पूर्वपाठे भवद्भिः १२ भावेभ्यः विचारणीयविषयाः, भावफलविचारप्रविधिश्च पठितः। प्रश्नविद्याप्रवीणस्य पार्श्वे अनेकविधाः प्राश्निकाः समागच्छन्ति, इति मनसि निधाय सर्वप्रथमम्

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्राश्निकलक्षणम् "शान्तो विवेकी शुद्धात्मा" इत्यादिकम् परीक्षणीयम् भवति। कदाचित्तु प्रश्निकेन सह साक्षात्कारे जाते एव दैवज्ञः प्राश्निकविषये पूर्वपरिचितादिलक्षणैः प्रश्नोत्तर-प्रदाने संल्लग्नो भवति। कदाचित् नवीनोऽयं प्राश्निकः शुद्धात्मा वर्तते वा न वा? कपटभावेन तु दैवज्ञपरीक्षार्थम् नागतः? अथ च अस्य प्रश्ने वास्तविकता अस्ति वा न वा इत्यादिकम् विषयम् दैवज्ञानाम् हितकाम्यया ग्रन्थकारः सर्वप्रथमम् कपटप्रश्नलक्षणम् ग्रन्थे व्यनक्ति। सर्वप्रश्नानाम् विचारे कार्यसिद्धियोगानाम् महत्त्वम् सर्वतोऽधिकम् भवति अतः पाठेऽस्मिन् ग्रन्थाधारमनुसृत्य कार्यसिद्धियोगानाम् विचारः भवतां कृते अनिवार्यः। तत्र चत्वारः योगाः प्राधान्येन निरूप्यन्ते, पुनश्च योगान्तरम् अपि पठिष्यन्ति। तत्रावश्यकानाम् शुभवर्गानाम् प्रसंगे षड्वर्गविचारमपि ज्ञास्यन्ति।

३.२ उद्देश्यम्

पाठस्य अस्य प्रधानतमम् उद्देश्मस्ति दैवज्ञेषु प्रश्नोत्तरविधेः विकासः। तत्र प्रायः प्रश्नाः भवन्ति, यत् मदीयमिदम् कार्यम् सिद्धिमेष्यति वा न वा एतादृशानां प्रश्नानां समाधानार्थं प्रत्येकप्रश्नोपयोगिविषयानाम् अवगमनम् एव पाठस्यास्य मूलमुद्देश्यमस्ति। आदौ प्राश्निक-परीक्षणम् अपि अनिवार्यमतः भवन्तः अनेन पाठेन निम्नविषयान् ज्ञास्यन्ति।

- प्रश्नकुण्डलीनिर्माणविधिः।
- प्राश्निकस्य कपटभावपरीक्षणम्।
- कार्यसिद्धियोगचतुष्टयज्ञानम्।
- कार्यसिद्धौ योगान्तरपरिज्ञानम्।
- शुभवर्गनिरूपणम्।

३.३ कपटप्रश्नलक्षणम्

जिज्ञासु पाठकाः! सर्वप्रथमम् कस्यापि प्रश्नस्य समाधाने भवद्भिः प्राश्निकस्य लक्षणानाम् परीक्षणम् अनिवार्यतया करणीयम्। भवताम् पाठयग्रन्थस्य प्रथमेऽध्याये एव –

शान्तो विवेकी शुद्धात्मा हिरण्यमणिसत्फलैः।

दैवज्ञम् प्रेमभावेन सम्पूज्यार्थं निवेदयेत्।।

प्रोक्तेषु एषु लक्षणेषु यदि न्यूनता अस्ति चेत् तर्हि प्राश्निकस्य प्रश्नोत्तरम् न देयम् तत्रापि लक्षणद्वयम् "शुद्धात्मा","प्रेमभाववान् प्रष्टा" एव प्राश्निकलक्षणेषु योग्यः, तत्रापि सर्वं खलु कृत्रिमम् वातावरणम् निर्माय प्रश्नकर्ता प्रश्नम् कुर्यात् तर्हि कथम् प्रष्टुः भावः परीक्षणीयः एतत्सर्वम् मनसि निधाय अत्र प्रश्नकुण्डली द्वारा (प्रश्नांगचक्रद्वारा) अस्य निर्णयः ग्रन्थकर्त्रा कृतः। तदवममनार्थम् प्रथमम् तावत् प्रश्नकुण्डलीनिर्माणम् कथम् भवेत् इत्यपि संक्षेपेण भवद्भिः विज्ञेयम्।

३.३.१ लग्नसारिणीद्वारा प्रश्नकुण्डलीनिर्माणविधिः

यथा जन्मसमयानुसारम् जन्मलग्नचक्रम् निर्मीयते तथैव प्रश्नसमयानुसारम् प्रश्नकुण्डलीचक्रम् निर्मेयम् भवति। पञ्चाङ्गेषु प्रत्येकमासस्य लग्नसारिण्यः भवन्ति। तेषु लग्नारम्भसमयः लग्नसमाप्तिकालः वा निर्दिश्यते। यस्य स्थानस्य प्रश्नः स्यात् तस्यैव स्थानस्य लग्नसारिणी प्रयोज्या अर्थात् यथा जन्मस्थानद्वारा जन्मसमये गणितेन जन्मलग्नपरिज्ञानम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तथैव प्रश्नस्थानद्वारा प्रश्नसमये प्रश्नलग्नपरिज्ञानम् विधेयम्। गणितेन प्रश्नलग्नकुण्डली, प्रश्नकालिकग्रहस्पष्टाः, षड्वर्गादिकम् सहायकग्रन्थैः भवद्भिः शिक्षणीयम्, यतो हि प्रश्नकुण्डली-निर्माणानन्तरमेव ग्रन्थेनानेन प्रश्नशास्त्रोपयोगिविषयानाम् ज्ञानम् भवितुमर्हति। भवताम् कृते सारल्येनावगमनार्थम् पञ्चाङ्गस्य लग्नसारिणी द्वारा प्रश्नलग्नम् परिज्ञाय ग्रहस्पष्टसारिणी द्वारा ग्रहस्पष्टादयः अत्र निर्दिश्यन्ते। तत्रोदाहरणम्–



यथा अत्र ४ मार्च २००९ दिनाङ्के प्रातः ५.३० समये कस्यचित् प्रश्नः जातः। प्रश्नकुण्डली निर्मेया। सर्वप्रथमम् मार्च मासस्य लग्नप्रवेशसारिणीचक्रे दृष्टम् यत् ४ मार्च २००९ दिनाङ्के प्रातः ५.३० समये मकरलग्नम् अस्ति। अतः मकरलग्नेन प्रश्नकुण्डली निर्मिता। लग्नसारण्याम् लग्नप्रवेशः कालः प्रदत्तः ३ मार्च प्रकोष्ठे रात्रौ (AM) ४-११तः ५-५५ यावत् मकरलग्नम् अस्ति प्रातः ५.३० वादने जयपुर प्रश्नस्थाने इयम् प्रश्नकुण्डली जाता यतो हि अत्र जयपुरस्थानीयपञ्चाङ्गे लग्नसारिणी अपि जयपुरे एव लग्नप्रारम्भकालम् सूचयति। अत्र ४ मार्च पंक्त्याम् ग्रहस्पष्टचक्रद्वारा ग्रहाः लिखिताः। तत्र ग्रहस्पष्टे राशिस्थाने योऽङ्कः सो हि राशिः गतराशिः। अग्रिमराशेः अंशादयः गताः सन्ति। अतः ग्रहः गतराशितः अग्रिम (वर्तमान) राशौ स्थाप्यः इत्थम् प्रश्नकुण्डलीनिर्माणम् भवितुम् अर्हति। परन्तु ज्योतिषग्रन्थोक्तलग्नानयनविधिना अपि लग्नस्पष्टीकरणम् भवद्भिः शिक्षणीयम् तदर्थम् सहायकग्रन्थाः अपि अध्येयाः।

३.३.२ कपटप्रश्नयोगः

भवताम् पाठग्रन्थस्य सर्वप्रश्नाध्यायसंज्ञके द्वितीयेऽध्याये प्राप्तावसरतया प्रश्नविषया उच्यन्ते, तत्राऽदौ कपटप्रश्नलक्षणमाह –

प्रश्नलग्नौपगौ चन्द्रमन्दौ यदा
वासरेशो घटे रश्मिहीनो बुधः।
पृच्छकस्त्वागतो दुष्टभावादसौ
प्रश्नमित्थम् विचिन्त्याऽत्र धीरो वदेत्॥१॥

पदच्छेदः

प्रश्नलग्नोपगौ, चन्द्रमन्दौ, यदा, वासरेशो, घटे, रश्मिहीनो, बुधः, पृच्छकः तु, आगतो, दुष्टभावात्, असौ, प्रश्नमित्थम्, विचिन्त्य, अत्र धीरो, वदेत्।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अन्वयः

यदा, चन्द्रमन्दौ, प्रश्नलग्नोपगौ, वासरेशः, घटे, बुधः, रश्मिहीनो, (तदा) असौ, पृच्छकः, दुष्टभावात्, आगतः अत्र (उत्तरावसरे) इत्थम्, प्रश्नम्, विचिन्त्य, धीरो, वदेत्।

प्रतिपदार्थः

यदा = यस्मिन् काले प्रश्नः स्यात् तदा तस्मिन् काले निर्मिते प्रश्नकुण्डलीचक्रे, चन्द्रमन्दौ = चन्द्रः मन्दः शनिः अर्थात् शनिचन्द्रौ द्वावपि ग्रहौ, प्रश्नलग्नोपगौ = प्रश्नकालिक-लग्ने सम्प्राप्तौ इत्यर्थः, वासरेशः = वासरस्य दिनस्य ईशः स्वामी दिनकर्ता सूर्य इत्यर्थः, घटे = कुम्भराशौ (स्थितः), बुधः = सौम्यग्रहः, रश्मिहीनः = रश्मिभिः किरणैः हीनः रहितः अस्तंगतः। सूर्यकिरणैर्लुप्त इत्यर्थः (तदा इदं विज्ञेयम्) यत् असौ पृच्छकः = यो हि प्रश्नकर्ता एतादृशे प्रश्नलग्ने प्राश्निकरूपेण दैवज्ञपार्श्वे समागतः सः, दुष्टभावात् = कपटभावात् असत्यप्रश्नम् कर्तुम्, आगतः = समागतः, कुटिलोऽयं प्राश्निक इत्यर्थः, अत्र = प्रश्नोत्तर-प्रदानावसरे इत्थम् = अनेनोपर्युक्तप्रकारेण, प्रश्नम् = प्राश्निककृतम् प्रश्नम् विचिन्त्य पूर्वम् विचार्य (पश्चात्), धीरः = प्रश्नविद्याप्रवीणः वदेत् = प्रश्नोत्तरम् कथयेदि भावः।

विशिष्टार्थः

ग्रन्थकारस्यायमभिमतः यत् प्रश्नकर्ता अनेकभावनाभिः युक्तो भूत्वा प्रश्नम् करोति। प्राश्निकः इदमपि विचारयति यत् तत्र दैवज्ञः विद्वान् प्रश्नविद्याप्रवीणः अस्ति वा न वा इति मनसि निधाय कपटभावेन प्राश्निकः कस्मिन् योगे समागच्छति तत्सर्वम् प्रश्नलग्नचक्रद्वारा ज्ञातुं शक्यते इति धिया ग्रन्थकारः कथयति यत् प्रश्नलग्नोपगौ यदि शनिचन्द्रौ भवेताम्, सूर्यः कुम्भे भवेत् बुधश्च अस्तंगतः स्यात् तर्हि इदम् विज्ञेयम् यत् प्राश्निकः दुष्टभावेन (कपटभावेन) प्रश्नम् करोति। एतत्सर्वं मनसि पूर्वम् शतशः विचिन्त्य प्रश्नोत्तरं प्रदेयम् यतो हि प्राश्निकभावम् अज्ञात्वा ये दैवज्ञाः प्रश्नोत्तरम् कुर्वन्ति ते हास्यताम् यान्तीत्यर्थः।

➢ कपटप्रश्ने लग्ने शनिचन्द्रयोः परीक्षणम्

प्रियपाठकाः चन्द्रः प्रश्नकर्तुः मनः विद्यते। चन्द्रेण सह शनेः योगः मनसि विकारम् द्योतयति। लघुजातके वराहमिहिरः सूर्यादिग्रहाणाम् आत्मादिविभागम् कुर्वन् कथयति–

आत्मा रविः शीतकरस्तु चेतः सत्त्वं धराजः शशिजोऽथवाणी।
ज्ञानं सुखं चेन्द्रगुरुर्मदश्च शुक्रः शनिः कालनरस्य दुःखम्॥

अत्र **"शीकरस्तु चेतः"** इत्यादि क्रमे चन्द्रमा मनः वर्तते। प्रश्नकुण्डल्याम् चन्द्रमा द्वारा प्राश्निकस्य मनः स्थितेः विचारः भवति, अतः उपर्युक्तश्लोके **"प्रश्नलग्नेपगौ चन्द्रमन्दौ यदा"** इत्यस्मिन् प्रश्नलग्नम् प्राश्निकस्य तनुः (शरीरम्), चन्द्रमा प्राश्निकस्य मनः, शनिः एक पापग्रहः, प्रश्नलग्ने शनिचन्द्रयोः स्थितिरेव मनसि दुष्टतायाः जनकत्वं द्योतयति। अतोऽत्र प्रश्नलग्ने प्रथमभावे (न तु सन्धौ) शनिचन्द्रयोः स्थितिस्तावत् प्रथमतया परीक्षणीया, तदनन्तरम् अग्रे योगः विचारणीयः।

यथा अग्रे प्रश्नाङ्कम्

अत्र लग्नस्पष्टम् राश्यादिकम् अस्ति ५-१०-२०-२० अर्थात् कन्या लग्नमस्ति तत्र शनिस्पष्टम् ५-१२-००-०० अर्थात् कन्याराशौ शनिः वर्तते चन्द्रस्पष्टम् –५-१७-१०-१० अर्थात् चन्द्रोऽपि कन्यालग्ने विद्यते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



अस्मिन् योगे सूर्यस्य कुम्भे स्थितिः बुधस्यास्तंगतत्वमपि यदि भवेत् तर्हि पूर्णरूपेण प्रष्टुः कपटभावः सिद्धयति।

➢ **सूर्यस्य कुंभे स्थितिः बुधस्यास्तंगतत्वम् च कपटभावलक्षणम्**

प्रेयांसः छात्राः भवन्तः जानन्ति यत् सूर्यः एकैकराशौ एकैकमासं यावत् प्रचलति। अतः सूर्यस्य घटे (कुंभराशौ) स्थितिः केवलम् प्रायः १४ फरवरीतः १४ मार्च मासं यावत् भविष्यति अर्थात् एतस्मिन् काले विशेषतया कपटप्रश्नकर्तृणाम् प्राश्निकानाम् आगमन संभावनाकालः। तत्रापि बुधग्रहः यो हि ज्योतिषशास्त्रस्य दैवज्ञस्य च अधिष्ठाता ग्रहः अस्ति तस्य अस्तंगतत्वम् रश्मिहीनता प्रभावहीनता अपि ज्योतिषप्रभावक्षीणतायाः द्योतकः।

सूर्यः कुंभे (शनिराशौ) पापराशौ तत्रापि शत्रुराशौ विद्यमानः अर्थात् उपर्युक्त प्रश्नकुण्डल्याम् सूर्यस्पष्टः १०-२-२०-३० बुधश्च १०-४-१०-११ सूर्य-सान्निध्यादस्तङ्गतः कुंभराशावेव वर्तमानः प्राश्निकस्य पूर्णकपटभावं व्यनक्ति, अर्थात् **"प्रश्नलग्नोपगौ चन्द्रमन्दौ यदा वासरेशो घटे रश्मिहीनो बुधः। पृच्छकस्त्वागतो दुष्टभावादसौ"** इति निश्चयः। एतादृशे कपटप्रश्नयोगे प्रश्नाङ्गे कस्यापि प्रश्नस्य उत्तरम् प्राश्निकम्प्रति प्रश्नविद्याप्रवीणेन न वक्तव्यम्।

विशेषः

अत्र एकः प्रश्नः समुदेति यत् यदि एतादृशः एक एव योगः, यो हि सूर्यस्य कुंभराशौ स्थिते, शनिचन्द्रयोगे लग्ने सति बुधेचास्तङ्गते एव भवितुमर्हति अथवा अन्येऽपि केचन योगाः अनेन दिग्दर्शनेन भवितुमर्हन्ति। अत्र मूलरूपेण चन्द्रेण पापयुतिः, सूर्यस्य कुंभे स्थितिः शत्रुराशौ वा पापराशौ वा स्थितिः, बुधस्य रश्मिहीनता पृथक पृथक अपि विचारयितुम् शक्यते तेन आंशिकरूपेण प्रष्टुः कपटभावनायाः निर्णयोऽपि कर्तुम् शक्यते, यतो हि शुद्धात्मा प्रष्टा तदैव यदा सूर्यः प्रबलः, प्रेमभावः तदैव यदा मनसि विकारो न भवेत् अर्थात् चन्द्रः शुभयुतः स्यात्, ज्योतिषविद्यायाः गणितशास्त्रस्य वा प्रतीकः बुधः यदि रश्मियुतः तदैव तस्य प्राश्निकम्प्रति आदेशे साफल्यम् भविष्यतीति दिक्। भवताम् विषये ऽस्मिन् ज्ञानसंवर्धनाय अन्यग्रन्थोक्तानि कपटप्रश्नलक्षणान्यपि विचार्यन्ते।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३.३.३ अन्यप्रश्नग्रन्थेषु कपटप्रश्नलक्षणानि

ताजिकनीलकण्ठीग्रन्थे श्री नीलकण्ठदैवज्ञः प्रश्नतन्त्रे अनेकग्रन्थेभ्यः संगृह्य प्राश्निकस्येतिकर्तव्यताम्, प्रश्नविधानम्, प्रश्नशास्त्रनियमानि च इत्थम् निर्दिशति –

तत्र प्रश्नविधानम् –

तस्मान्नृपः कुसुमरत्नफलाग्रहस्तः प्रातः प्रणम्य वरयेदपि प्राङ्मुखस्थः।
होराङ्गशास्त्रकुशलान् हितकारिणश्च संहृत्य दैवगणकान् सकृदेव पृच्छेत्॥

तत्र प्रष्टुः परिचयमाह –

ऋजुरयमनृजुर्वाऽयं प्रष्टा पूर्वं परीक्ष्य लग्नबलात्।
गणकेन फलं वाच्यम् दैवं तच्चित्तगं स्फुरति॥

तत्र कपटप्रश्नलक्षणम् –

लग्नस्थे शशिनि शनौ केन्द्रस्थे ज्ञे दिनेशरश्मिगते।
भौमज्ञयोः समदृशा लग्नगचन्द्रे ऽनृजुः प्रष्टा॥

लग्ने शुभग्रहयुते सरलः क्रूरान्विते भवेत्कुटिलः।
लग्नेऽस्ते सौम्यदृशा विधुगुरुदृष्ट्या च सरलोऽयम्
यदि गुरुबुधयोरेकः पश्यत्यस्ताधिपञ्च रिपुदृष्टया
तत्कुटिलः प्रष्टा खल्वनयोरेकस्तयोः साधुः॥

एतेषाम् स्पष्टार्थेन अनृजु (कुटिल) प्रष्टा योगः –

१. प्रश्नलग्नस्थः चन्द्रमा, शनिः केन्द्रस्थः (१-४-७-१० भावस्थः) बुधोऽस्तंगतः, लग्नगतः चन्द्रः मंगलबुधयोः समानदृष्टया दृष्टः स्यात्।

२. लग्ने पापयुते (पापग्रहे युक्ते) प्रष्टा कुटिलः।

३. बृहस्पतिबुधयोरेकः ग्रहः शत्रुदृष्टया (१-४-७-१०) दृष्टया सप्तमेशं पश्येत् तदा कुटिलः प्रष्टाः

ऋजु (सरल) प्रष्टायोगः –

१. लग्ने शुभग्रहयुते प्रष्टा सरलः।

२. लग्नसप्तमभावौ बुधचन्द्रगुरुभिः दृष्टौ भवेतां तदा प्रष्टा सरलः।

३. गुरुवुधयोरेकः मित्रदृष्टया (५-९ दृष्टया) सप्तमेशम् प्रपश्येत् चेत् सज्जनः प्रष्टा

इत्थम् अपि अन्यप्रश्नग्रन्थेभ्यः सरलकुटिलप्राश्निकानां लक्षणानि निश्चित्य दैवज्ञः प्रश्नफलं ब्रूयात्।

➢ ग्रहदृष्टिविचारः

प्रेयांसः छात्राः ग्रहाणां दृष्टिविचारः अत्र विशेषतया अभ्यसनीयः सामान्यतया अत्रापि दृष्टिज्ञानं जातकशास्त्रवत् क्रियते यथा लघुजातके –

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दशमतृतीये नवपञ्चमे चतुर्थाष्टमे कलत्रञ्च।
पश्यन्ति पादवृद्धया फलानि चैवं प्रयच्छन्ति।
पूर्णम् पश्यति रविजस्त्रिकोणमपि जीवः
चतुरस्रं भूमिसुतः सितार्कबुधहिमकराः कलत्रम् च॥

लघुपाराशर्यामपि पाराशरः कथयति –

पश्यन्ति सप्तमं सर्वे शनिजीवकुजाः पुनः।
विशेषतश्च त्रिदशत्रिकोणचतुरष्टमान्॥

एतदतिरिक्तम् भवद्भिः उपर्युक्तश्लोके शत्रुदृष्टिमित्रदृष्टिविषयेऽपि कपटप्रश्न- निर्धारणे प्रष्टुः ऋजुत्व-अनृजुत्वनिर्धारकप्रसंगे पठितम्। तदर्थम् भवद्भिः तजिकोक्तदृष्टि- विचारोऽप्यवधेयः। तद्यथा –

दृष्टिस्यान्नवपञ्चमे बलवती प्रत्यक्षतः स्नेहदा।
पादोना ऽखिलकार्यसाधनकरी मेलापकाख्योच्यते॥

गुप्तस्नेहकरी तृतीयभवने कार्यस्य संसिद्धिदा।
त्र्यंशोना कथिता तृतीयभवने षड्भागदृष्टिर्भवे।
दृष्टिः पादमिता चतुर्थदशमे गुप्तारिभावा स्मृता।
अन्योऽन्यम् सप्तमभे तथैकभवने प्रत्यक्षवैराखिला॥

दुष्टम् दृक्त्रितयम् क्षुताह्वयमिदम् कार्यस्य विध्वंसदम्।
सङ्ग्रामादिकलिप्रदम् दृश इमाः स्युर्द्वादशांशान्तरे॥

एतद् दृष्टिज्ञानम् चक्रेण स्पष्टम् – तत्र पूर्वम् दृष्टेः मित्रदृष्टिः शत्रुदृष्टिरूपेण भेदः ज्ञेयः –

मित्रदृष्टिः ३ - ५ - ९ - ११ (५-९ प्रत्यक्षस्नेहा, ३ - ११ गुप्तस्नेहा दृष्टिः)

शत्रुदृष्टिः १ - ४ - ७ - १० (१-७ प्रत्यक्षवैरा, ४ - १० गुप्तारिभावा) दृष्टिः)

स्पष्टतायै ताजिकोक्तम् दृष्टिज्ञानचक्रम् –

राशयः	1	2	3	4	5	6	7	8	9	10	11	12
दृष्टिमानम्												
कलात्मकम्	**60**	**0**	**40**	**15**	**45**	**0**	**60**	**0**	**45**	**15**	**10**	**0**

अत्र २ - ६- ८ - १२ स्थानेषु दृष्टिः न भवति। एषा तजिकशास्त्रोक्ता दृष्टिः प्रश्नतन्त्रेऽपि विचार्यते। जातकशास्त्रोक्ता दृष्टिस्तु विचारणीया एव।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

बोधप्रश्नाः

१. कपटप्रश्नज्ञाने लग्ने कौ ग्रहौ भवतः।

.....

.....

२. कपटप्रश्नज्ञाने सूर्यस्य कस्मिन् राशौ स्थितिः अपेक्ष्यते।

.....

.....

३. कपटप्रश्नज्ञाने बुधः कीदृशो भवेत्।

.....

.....

४. चन्द्रमा आत्मादिकारकेषु कस्य प्रतिनिधिः।

.....

.....

५. शनिः आत्मादिकारकेषु कस्य प्रतिनिधिः।

.....

.....

३.४ सकलप्रश्नेषु कार्यसिद्धियोगाः

प्रेयांसः छात्राः भवन्तः जानन्ति एव प्रश्नलग्नम् एव तनुभावः। तन्वादिद्वादशभावेषु विचारणीयविषयानुसारम् यः कोऽपि भावः कार्यभावः भवितुमर्हति। अत्र लग्नभावकार्यभावयोः अस्ति महत्त्वपूर्णम् स्थानम्। अनयोरेव भावयोः माध्यमेन कार्यसिद्धियोगः विचार्यते। तत्र तावत् प्रथमम् लग्नेशकार्येशयोः निर्णयम् विधाय तदनुसारमेव कार्यसिद्धियोगः विचारयितुम् शक्यते।।

३.४.१ लग्नेशकार्येशनिर्णयः

पूर्वपाठे भवद्भिः लग्नमारभ्य द्वादशभावपर्यन्तम् भावेशनिर्णयोऽपि पठितः। तत्र लग्नस्य स्वामीग्रह एव लग्नेशः भवति। पूर्वपाठे कृतविवेचनानुसारम् द्वादशभावेभ्यः विचारणीयविषयेषु यः कोऽपि प्रश्नः स्यात् सो हि येन भावेन विचारणीयम् भवेत् स एव कार्यभावः। तस्य भावस्य स्वामी (भावेशः) ग्रह एव कार्यभावेशः। इत्थम् लग्नेशकार्येशयोः ज्ञानम् भवति। यथोदाहरणम् – केनचित् मेषप्रश्नलग्ने प्रश्नः कृतः यत् वाणिज्यार्थम् मया प्रयत्नः क्रियते कार्यसिद्धिर्भविष्यति वा न वा – अत्र विचारे कृते द्वादशभावेभ्यः विचारणीयविषयेषु सप्तमभावतः विचारणीयविषयाः सन्ति –

परैः समं विवादम् च वाणिज्यं व्यसनम् तथा।
गमाऽगमौ कलत्रञ्च चिन्तयेत् सप्तमालयात्॥

वाणिज्यविचारः सप्तमालयात् क्रियते अतः निम्नप्रश्नाङ्गानुसारम् कार्यभावेशः सप्तमेशः जातः अत्र लग्ने मेषराशिः अतः लग्नेशः (मेषराशेः स्वामी) भौमः जातः। कार्यभावः वाणिज्यविचारभावः सप्तमः तत्र तुलाराशिः, अतः सप्तमेशः (तुलायाः स्वामी) शुक्रः जातः। अर्थात् लग्नेशः भौमः, कार्यभावेशः, शुक्रः इति निश्चयः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



एवमेव वृषलग्नम् स्यात् धनसम्बन्धी कोशसम्बन्धीकार्यविषये प्रश्नो भवेत् तर्हि वृषराशेः स्वामी लग्नेशः, तथा च कोशस्य धनस्य द्वितीयभावे विचारणीयत्वात् धनभावे मिथुनराशेः स्थितिवशात् मिथुनस्य स्वामी बुधः धनेशः, स एव कोशेशः इत्थम् प्रश्नानुसारम् विचिन्त्य **"बहुविधविषयानाम् चातुरीणाम् धुरीणः"** यो हि दैवज्ञः स एवमेव लग्नेशकार्येशयोः निर्णयम् विधाय कार्यसिद्धियोगम् विचारयेत्।। तत्र ग्रन्थकारकृतौ श्लोकौ कार्यसिद्धियोग-चतुष्टयात्मकौ यथा –

प्रश्नलग्नाधिपो लग्नगेहम् यदा
कार्यनाथोऽपि कार्यालयं पश्यति।
कार्यमङ्गाधिपः कार्यपोऽङ्गन्तदा।
सर्वथा कार्यसिद्धिर्जनानां भवेत्॥२॥

चेन्मिथो वीक्षणम् लग्नकार्येशयो-
रात्मभावस्थयोः कार्यसिद्धिस्तदा।
पूर्णबिम्बेन चन्द्रेण दृष्टाविमौ
सत्त्वरं कार्यसिद्धिः प्रयासं विना॥३॥

पदच्छेदः – प्रश्नलग्नाधिपो, लग्नगेहम्, यदा , कार्यनाथः, अपि, कार्यालयम्, पश्यति, कार्यम्, अङ्गाधिपः, कार्यम्, अङ्गम्, तदा ,सर्वथा कार्यसिद्धिः जनानाम् भवेत्।

चेत् , मिथः, वीक्षणम्, लग्नकार्येशयोः, आत्मभावस्थयोः, कार्यसिद्धिः, तदा, पूर्णबिम्बेन, चन्द्रेण, दृष्टौ, इमौ, सत्त्वरम्, कार्यसिद्धिः प्रयासं , विना।

अन्वयः – यदा , प्रश्नलग्नाधिपः, लग्नगेहम्, कार्यनाथः, अपि, कार्यालयम्, पश्यति (तदा कार्यसिद्धिरित्येको योगः)। कार्यपः, अङ्गम्, कार्यम् अङ्गाधिपः (पश्यति) तदा,च (द्वितीयो योगः)। (एतयोः द्वयोः योगयोः) सर्वथा, जनानाम्, कार्यसिद्धिः, भवेत्। चेत् आत्मभावस्थयोः लग्नकार्येशयोः, मिथः वीक्षणम् (भवेत्), तदा, (कार्यसिद्धिः योगद्वयम्) (एषु चतुर्थर्ष्वपि योगेषु) इमौ, पूर्णबिम्बेन चन्द्रेण, दृष्टौ (तर्हि) प्रयासं, विना, सत्त्वरं कार्यसिद्धिः।

प्रतिपदार्थः

यदा = यस्मिन् प्रश्नकाले, प्रश्नलग्नाधिपः = प्रश्नलग्नस्य अधिपः स्वामी अर्थात् प्रश्नलग्नेशः, लग्नगेहम् = लग्नगृहम् तनुभावम् पश्येत् (स्वगृहमेव) (पश्येदित्यर्थः)

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(तथा च) कार्यनाथः = कार्यस्य कार्यभावस्य नाथः स्वामी अर्थात् कार्यभावेशः, अपि शब्देन द्वयोः दृष्टेः आवश्यकत्वम् ध्वनितम्, कार्यालयम् = कार्यस्य विचारणीयप्रश्नस्य यो हि आलयः स्थानम् कार्यभावः इत्यर्थः तम् , पश्यति = पूर्णादिदृष्टया विलोकयतीत्यर्थः (इत्थमेकः कार्यसिद्धियोगः जातः) अथवा कार्यपः = कार्यभावस्वामी, अङ्गम् = लग्नम्, कार्यम् = कार्यभावम् (च) अङ्गाधिपः = अङ्गस्य लग्नस्य अधिपः स्वामी लग्नेशः (पश्येत्) तदा = तस्मिन् काले = एतादृशे प्रश्नकाले प्रश्ने जाते इत्यर्थः, सर्वथा = सर्वतो भावेन, जनानाम् = प्राश्निकानाम् प्राश्निकोपदिष्टजनानां वा, कार्यसिद्धिः = यस्य कार्यस्य विषये सिद्धिः (सफलता) ज्ञानार्थं प्रश्नः कृतः सः चिन्तित कार्यः सिद्धिमेतीत्यर्थः। (द्वितीयोऽयं योगः)

चेत् यदि = पूर्वनिर्दिष्टयोगप्रोक्तस्थितिः लग्नेशकार्येशयोः न स्यात् अपि तु, आत्मभावस्थयोः = स्वस्वभावस्थयोः , लग्नकार्येशयोः = लग्नेशः लग्ने कार्येशः कार्यभावे स्थितः तयोः एतादृशयोः लग्नेशकार्येशयोः, मिथः = परस्परम्, वीक्षणम् = दृष्टिः (भवेत्), तदा = एतादृशी ग्रहस्थितिः प्रश्नलग्नकुण्डल्यां यदि भवेत् अर्थात् लग्नेशः लग्ने, कार्येशः कार्ये स्थितः तदा तृतीयोऽयं कार्यसिद्धियोगः। लग्नेशः लग्ने कार्यभावेशः कार्ये भवेत् (आत्मभावस्थयोः) तदा चतुर्थः कार्यसिद्धियोगः परन्तु तौ स्वस्वभावस्थावपि परस्परं दृष्टिसम्बन्ध युतौ भवेताम् तर्हि, कार्यसिद्धिः = चिन्तितकार्यस्य साफल्यम्, (भवति)। एतेषु कार्यसिद्धियोगेषु इमौ एतौ द्वौ लग्नेशकार्येशौ, पूर्णविम्बेन चन्द्रेण = पौर्णमास्याः चन्द्रेण अथवा पूर्णचन्द्रोपलक्षित शुक्लपक्षाष्टमीमारभ्य कृष्णाष्टमीपर्यम् चन्द्रः पूर्णो भवति इति नियमसिद्धपूर्णचन्द्रेण, दृष्टौ = पूर्ण-दृष्टया विलोकितौ, स्याताम् तदा, प्रयासम् विना = परिश्रमम्, विना, सत्त्वरम् = शीघ्रम्, कार्यसिद्धिः = प्रष्टा द्वारा पृष्टस्य प्रश्नस्य सम्बन्धे सफलता भवतीति शेषः।

अत्र विशेषः-

एतेषु योगेषु ग्रन्थकर्ता ग्रन्थकारः सकलप्रश्नेषु कार्यसिद्धित्वं व्यनक्ति यतो हि लग्नेशकार्येशयोरेव विभिन्नस्थितिभिः एते योगाः अत्र निर्दिष्टाः। परन्तुतः अत्र योगत्रयम् दृष्टिप्रधानम् चतुर्थश्च स्थितिप्रधानः। एतेषाम् स्पष्टतार्थम् पृथक् पृथक् एतेषाम् चतुर्ण्णाम् योगानाम् सोदाहरणं विवेचनम् प्रस्तूयते।

३.४.२ कार्यसिद्धियोगः प्रथमः

"प्रश्नलग्नाधिपो लग्नगेहम् यदा कार्यनाथोऽपि कार्यालयम् पश्यति" अर्थात् प्रश्नलग्नेशः लग्नम् पश्येत्, कार्यभावेशः कार्यभावम् यत्र कुत्रापि स्थित्वा पश्येत् तदा जनानां कार्यसिद्धिर्भवति।

यथा उदाहरणम् – अत्र कर्कलग्ने गृहप्राप्तियोगः विचार्यते। गृहप्राप्तिः तावत् चतुर्थभावतः विचार्यते। **"मित्रालयग्रामलाभो"** सुखात् विचार्यते' अतः लग्नस्वामी चन्द्रः, कार्यस्वामी शुक्रः लग्नस्वामी लग्नम् सप्तमदृष्टया पूर्णदृष्ट्या पश्यति कार्यनाथः शुक्रोऽपि कार्यालयम् चतुर्थभावम् पूर्णदृष्ट्या पश्यति अतः सर्वथा कार्यसिद्धिदायको योगः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



३.४.३ कार्यसिद्धियोगः द्वितीयः

"कार्यमङ्गाधिपः कार्यपोऽङ्गन्तदा सर्वथा कार्यसिद्धिर्जनानाम् भवेत्।" अर्थात् प्रथमयोगात् विपरीतम् कार्यभावम् लग्नेशः पश्येत्, कार्यपः लग्नम् पश्येत् तदा सर्वथा कार्यसिद्धिर्भवतीति द्वितीयो योगः। उदाहरणम् यथा –



अत्र लग्नमस्ति सिंहः लग्नाधीशः सूर्यः लग्नेशः। प्रश्नः अस्ति भ्रातृसुखं भविष्यति न वा अतः कार्यभावोऽस्ति तृतीयभावः तत्र तुलाराशिः अतः कार्यभावेशः शुक्रोऽस्ति अत्र लग्नेशः सूर्यः कार्यभावम् पश्यति, कार्यभावेश शुक्रः लग्नम् पश्यति अतः **"सर्वथा कार्यसिद्धिर्जनानाम् भवेत्"** इति नियमेन प्रश्नाङ्गानुसारम् भ्रातृसुखप्राप्तिसम्बन्धि कार्यसिद्धि र्भविष्यतीति सिद्धम्।

३.४.४ कार्यसिद्धियोगः तृतीयः

"चेन्मिथो वीक्षणम् लग्नकार्येशयोः" तदा कार्यसिद्धिः अर्थात्लग्नेशकार्येशौ

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

परस्परम् यत्र कुत्रापि स्थानस्थितौ परस्परम् अन्योन्यम् वीक्षतः तदा कार्यसिद्धियोगः तृतीयः भवति। अस्योदाहरणम् –



अत्र प्रश्नां गे अभीष्टग्रामे नगरे वा गृहनिर्माणसम्बन्धी प्रश्नः अस्ति। अत्र लग्नम् मीनः अतः लग्नेशः गुरुः वर्तते। मित्रालयग्रामलाभसम्बन्धी प्रश्नः तस्य विचारः आलपः (गृहम्) ग्रामलाभश्च इत्यादीनां चतुर्थभावे विचारत्वात् चतुर्थेशः बुधः। एतौ द्वौ ग्रहौ क्रमशः नवमभावतृतीयभावस्थौ स्तः तथा च परस्परम् (मिथः) सप्तमदृष्टया (पूर्णदृष्टया) अन्योन्यम् वीक्षतः। एषः कार्यसिद्धियोगः गृहनिर्माणे सफलता, गृहप्राप्तौ वा सफलतादायकोऽयं योगः।

३.४.५ कार्यसिद्धियोगः चतुर्थः

"आत्मभावस्थयोः" लग्नकार्येशयोः तदा कार्यसिद्धिः। एष चतुर्थो योगः। अस्योदाहरणम् –



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अत्रोदाहरणम् – कृषिकर्मविषये प्रश्नः। लग्नम् मिथुनम्। तत्र लग्नेशः बुधः। **"दानादिकृषिकर्मणाम्"** विचारः व्ययभावतः क्रियते अतः व्ययभावः कार्यभावः तस्य स्वामी शुक्रः-कार्यभावेशः अत्र लग्नेशः कार्येशः उभौ अपि बुधशुक्रौ आत्मभावस्थौ स्वस्व भावस्थौ, अतः कार्यसिद्धियोगः चतुर्थः।

३.४.६ कार्यसिद्धियोगेषु विशेषः

अत्र एकः विचारः समुदेति यत् लग्नकार्येशयोः आत्मभावस्थयोः मिथः वीक्षणम् स्यात् स एव तृतीयः कार्यसिद्धियोगः अर्थात् त्रय एव कार्यसिद्धियोगाः अत्र सन्ति। केवलं आत्मभावस्थौ एव लग्नेकार्येशौ मिथः वीक्षणम् न कुरुतौ तदा कार्यसिद्धिर्न। अत्र योगद्वयम् भवितुमर्हति अथवा एक एव योगः? लग्नेकार्येशविषयेऽस्मिन् अन्य प्रश्नग्रन्थोक्तविचारः प्रस्तूयते, यथा भुवनदीपके चत्वारः कार्यसिद्धियोगाः प्रोक्ताः तत्र यथा –

आद्यो लग्नपतिः कार्ये लग्ने कार्याधिपो यदि।
द्वितीयो लग्नपो लग्ने कार्ये कार्याधिपो भवेत्॥

लग्नपः कार्यपश्चापि लग्ने यदि तृतीयकः।
चतुर्थगः कार्यगौ स्याताम् यदि लग्नपकार्यपौ॥

चतुर्षूतूभयत्रापि चन्द्रदृग्दर्शनम् मिथः।
कार्यसिद्धिस्तदा ज्ञेया मित्रे चेदधिकम् शुभम्॥

उपरि प्रश्नभूषणकारेण दृष्टिवशात् (दृष्टेः प्राधान्यवशात्) योगाः प्रोक्ताः। भुवनदीपककारः स्थितिवशात् चत्वारः कार्यसिद्धियोगाः भवन्तीति निर्दिष्टवान्।

यथा प्रथमः – लग्नपतिः कार्यस्थाने कार्यधिपश्च लग्ने भवेदित्येकः।
द्वितीयः – लग्नपतिः लग्ने कार्याधिपः कार्ये भवेदिति द्वितीयः।
तृतीयः – लग्नपतिः कार्येशश्च लग्ने एव भवेताम् इति तृतीयः।
चतुर्थः – लग्नपतिः कार्येशश्च उभावपि कार्यभावे स्यातामिति चतुर्थः।

अत्रापि चतुर्षु योगेषु चन्द्रदृग्दर्शनम् मिथः उभयत्रापि भवेत् तदा कार्यसिद्धिः। एते योगाः मित्रराशौ भवेयुः, अर्थात् मित्रराशिस्थितेषु लग्नकार्येशेषु (चतुर्षु) तदा अधिकम् शुभं फलम् भवतीति विशेषः। अत्र प्रश्नभूषणकारः चन्द्रदृष्टिविषये कथयति –

३.४.७ सर्वेषु कार्यसिद्धियोगेषु चन्द्रदृष्टेः प्राधान्यम्, उदाहरणञ्च

प्रियछात्राः भवन्तः कार्यसिद्धियोगान् ज्ञातवन्तः परन्तु एषु योगेषु चन्द्रदृष्टेः प्राधान्यम् भवति यतो हि प्रोक्तमस्ति **"पूर्णबिम्बेन चन्द्रेण दृष्टाविमौ सत्त्वरं कार्यसिद्धिः प्रयासं विना"** अत्र चतुर्ष्वपि उपर्युक्तयोगेषु लग्नकार्येशयोरुपरि पूर्णबिम्बस्य चन्द्रस्य दृष्टिर्यदि भवेत्तदा प्रयासं विना सत्त्वरं कायसिद्धिर्भवतीति विशेषः। यथोदाहरणम् –

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



प्रथमकार्यसिद्धियोगे चन्द्रदृष्टिविचारः, अत्र गृहप्राप्तिविषयकप्रश्ने लग्नेशः चन्द्रः कार्येशः शुक्रः अत्र स्वयं लग्नेशः पूर्णः चन्द्रः शुक्रम् चतुर्थदृष्टया (तृतीयचरणदृष्टया) पश्यति, लग्नमपि पश्यति अतः अत्र सत्त्वरं कार्यसिद्धिः प्रयासं विना च कार्यसिद्धि र्भविष्यतीति दिक्।

द्वितीययोगे चन्द्रदृष्टेः उदाहरणम्

भ्रातृसुखप्राप्तियोगे विचार्यमाणे सिंहलग्ने लग्नेशः सूर्यः, कार्यभावेशः शुक्रः, सूर्योपरि पूर्णविम्वचन्द्रस्य पूर्णदृष्टिः, शुक्रोपरि च चन्द्रस्य पञ्चमदृष्टिः आंशिकदृष्टया सत्त्वरं कार्यसिद्धियोगः।



तृतीययोगे चन्द्रदृष्टेः उदाहरणम्

अत्र अभीष्टग्राम (स्थान) लाभप्रश्ने मीनलग्ने कार्यभावेशः बुधः, लग्नेशः गुरु कार्येशलग्नेशयोरुपरि चन्द्रदृष्टिः आंशिकरूपेण विद्यते अतः अत्रापि सत्त्वरं कायसिद्धियोगः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



चतुर्थयोगे चन्द्रदृष्टेः उदाहरणम्

अत्र कृषिकर्मविषयककार्यसिद्धिप्रश्ने मिथुनलग्ने लग्नेशः बुधः कार्येशः (व्यभावेशः) शुक्रः द्वयोः उपरि चन्द्रदृष्टिः कार्येशोपरि कार्यभावे च पूर्णदृष्टिः, लग्नेशोपरि लग्नभावे च चन्द्रस्य अष्टमदृष्टिः आंशिकदृष्टिः अत्र चन्द्रस्य पूर्णत्वमपि अस्ति अतः अत्रापि सत्त्वरं प्रयासं विना कार्यसिद्धिः भविष्यतीति दिक्।



अत्र विशेषः – प्रेयांसः छात्राः भवन्तः जानन्ति यत् चन्द्रः पूर्णः कदा भवति? चन्द्रः पूर्णः पूर्णिमायां भवति। पूर्णिमायां चन्द्रसूर्यौ षड्राश्यन्तरितौ भवतः अतः चन्द्रस्य पूर्णत्वम् सदा तदैव भवितुमर्हति यदा चन्द्रः सूर्यात् षड्राश्यन्तरितः स्यात्। अथ च चन्द्रस्य पूर्णदृष्टिः सदा सप्तमभावे भवति, परन्तु दृष्टिविषये भवद्भिः पूर्वमेव पठितम् यत्–

दशमतृतीये नवपञ्चमे चतुर्थाष्टमे कलत्रञ्च।
पश्यन्ति पादवृद्धया फलानि चैवं प्रयच्छन्ति॥

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पूर्णम् पश्यति रविजस्त्रिकोणमपि जीवः।
चतुरस्रं भूमिसुतः सितार्कबुधाः हिमकराः कलत्रं च॥

चन्द्रः एकचरणदृष्ट्या दशमतृतीयम्, चरणद्वयदृष्टया नवपञ्चमम्, चरणत्रय-दृष्ट्या चतुर्थाष्टमम्, पूर्णदृष्टया कलत्रम् (सप्तमम्) पश्यति। पूर्णचन्द्रविषयेऽपि पूर्णिमायां चन्द्रस्य पूर्णत्वम्, तथा च शुक्लैकादशीतः कृष्णचतुर्थीम् यावत् पूर्णचन्द्रः, कृष्णपञ्चमीतः कृष्णदशमीं यावत् मध्यमचन्द्रः। कृष्णैकादशीतः शुक्लचतुर्थीम् यावत् क्षीणचन्द्रः। अमायां नष्टचन्द्रः। एषा परिभाषा फलदीपिकादिग्रन्थेषु प्राप्यते। एषा व्यवस्था अपि भवद्भिः फलादेशक्रमे परिचन्तनीया। चन्द्रस्य दृष्टिरपि सप्तमे पूर्णा 60 कलामिता, 3-10 स्थाने 1 चरणमिता, 15 कला तुल्या, 5-9 स्थाने चरणद्वयमिता 30 कला तुल्या, 4-8 स्थाने चरणत्रयमिता 45 कला मिता भवतीति। भवद्भिः पाठकैः विचार्य पूर्णादिदृष्टया सत्त्वरं कार्यसिद्धिः , पूर्णचन्द्रेण प्रयासं विना कार्यसिद्धिश्च विचारणीया। चन्द्रदृष्टिद्वारा कार्यसिद्धेः समय सीमा, चन्द्रस्य पूर्णत्वादिना प्रयासविषये विचारो विधेयः, इति दिक्।

बोधप्रश्नाः

६. प्रथमः कार्यसिद्धियोगः कः?

.....

.....

७. द्वितीयः कार्यसिद्धियोगः कः?

.....

.....

८. तृतीयः कार्यसिद्धियोगः कः?

.....

.....

९. चतुर्थः कार्यसिद्धियोगः कः?

.....

.....

१०. चन्द्रस्य आंशिकदृष्टिः पूर्णदृष्टिश्च का?

.....

.....

११. चन्द्रस्य पूर्णविम्बत्वपरिभाषा का?

.....

.....

१२. भुवनदीपकमते चत्वारः कार्यसिद्धि योगाः के?

.....

.....

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३.५ कार्यसिद्धिप्रश्नोत्तरे योगान्तरविचारः

अधुना भवन्तः चतुः कार्यसिद्धियोगान् ज्ञातवन्तः। इतोऽग्रे कार्यसिद्धिः शीघ्रं भविष्यति, विलम्बतः भविष्यति एष विचारः कथं क्रियते विषयेऽस्मिन् प्रश्नभूषणग्रन्थे अन्येऽपि अनेके कार्यसिद्धियोगाः प्रोक्ताः सन्ति यत्र मित्रवर्गादिविचारप्रक्रिया अपि प्रयुक्ता तत्र यथा –

शुभवर्गगते लग्ने सशुभे नरभोदये।
शीघ्रं तद्व्यत्ययेनैव मिश्रे कार्यं विलम्बतः॥

पदच्छेदः – शुभवर्गगते, लग्ने, सशुभे, नरभोदये, शीघ्रम्, तत्, व्यत्यये, न, एव, मिश्रे, कार्यम् विलम्बतः।

अन्वयः – लग्ने, शुभवर्गगते, सशुभे, नरभोदये, शीघ्रम्, तद् व्यत्यये, नैव, मिश्रे, विलम्बतः कार्यम्।

प्रतिपदार्थः – लग्ने = प्रश्नकालिकलग्ने, शुभवर्गगते = शुभग्रहाणाम् वर्गः शुभवर्गः अथवा शुभः वर्ग इति शुभवर्गः षड्वर्गादिविचारक्रमे शुभवर्गाः ये भवेयुः तस्मिन् गते शुभवर्गगते इत्यर्थः, लग्ने शुभग्रहस्य षड्वर्गस्थे वेत्यर्थः, सशुभे = शुभग्रहेण शुभग्रहैर्वा सहिते लग्ने वा, नरभोदये = नराः ये राशयः पुरुषराशयः इत्यर्थः तेषाम् उदये लग्ने सम्प्राप्ते अर्थात् पुरुषराशीनाम् लग्नम् स्यात्, तदा शीघ्रम् = सत्त्वरं कार्यसिद्धिर्भवतीति शेषः। तद्व्यत्यये = एतद्विपरीते ऽर्थात् अशुभवर्गगते लग्ने स्त्रीराशिगते उदये वा, नैव = कार्यम् एव न भवतीत्यर्थः।

मिश्रे = लग्ने शुभवर्गः अपि भवेत् पापवर्गः अपि भवेत्, अथ च लग्ने शुभग्रहोऽपि स्यात् पापग्रहोऽपि स्यात् तदा कार्यम् विलम्बतः = कार्यसिद्धिः विलम्बेन किञ्चित्कालानन्तरम् भवतीत्यर्थः।

विशिष्टार्थः – अस्मिन् योगान्तरे ग्रन्थकर्ता कार्यसिद्धियोगज्ञानार्थम्, तत्रापि शीघ्रकार्यसिद्धियोगविषये विलम्बतः कार्यसिद्धिविषये अथवा कार्यसिद्धेः अभावविषये विचारम् करोति। भवन्तः इदमवगच्छन्तु यत् ज्योतिषशास्त्रे विशिष्टफलादेशज्ञानार्थम् ग्रहबलनिर्धारणम् वा षड्वर्गाः सप्तवर्गाः दशवर्गाः, षोडशवर्गादयः इत्यादिवर्गान् प्रयुज्यन्ते। तेषु षड्वर्गादिषु लग्नस्पष्टवशात् लग्ने तेषाम् सत्ता ज्ञातुम् शक्यते। तत्र षड्वर्गाः सन्ति – लग्नम् होरा, द्रेष्काणः, नवांशः द्वादशांशः, त्रिंशाशश्च। सप्तवर्गाः – सप्तमांशसहिताः षड्वर्गा एव सप्तवर्गाः भवन्ति।

दशवर्गाः सन्ति – गृहम्, होरा, द्रेष्काणः, सप्तांशः, नवांशः, दशांशः, द्वादशांशः, षोडशांशः, त्रिंशांशः, षष्टंयशश्च। अर्थात् – दशांश षोड़शांशषष्टयंशयुताः सप्तवर्गा एव दशवर्गा भवन्ति। षोडशवर्गाः सन्ति- गृहम्, होरा, द्रेष्काणः चतुर्थांशः सप्तमांशः, नवमांशः, दशांशः, द्वादशांशः, षोडशांशः, विंशाशः, चतुर्विंशाशः, सप्तविंशाशः, त्रिंशांशः, खवेदांशः, अक्षवेदांशः, षष्टयंशश्च।

एतेषु षड्वर्गादिषु लग्ने शुभवर्गाः यदि स्युः, अथ च लग्ने शुभग्रहाः (पूर्णचन्द्रगुरु) शुक्रबुधाः) अपि स्थिताः भवेयुः अथ च लग्ने नरराशयः स्युः अर्थात् पुरुषराशयः भवेयुः तदा शीघ्रकार्यसिद्धिर्भवति। अत्र पाठकैः इदमपि अवधेयम् यत् समराशयः (वृषकर्ककन्या वृश्चिकमकरमीनराशयः) स्त्रीराशयः भवन्ति, विषम (मेषमिथुनसिंहतुलाधनुकुम्भ) राशयः पुरुषराशयः भवन्ति। पुरुषराशीनाम् लग्नेषु अन्यतमंप्रश्नलग्नः स्यात् तदा शीघ्रकार्यसिद्धिः ज्ञेया। एतद्विपरीतम् यदि स्यात् तर्हि कार्यसिद्धिर्न भवतीति विज्ञेयः। अर्थात् लग्ने अशुभवर्गः स्यात् अर्थात् अशुभराशेः गृहम् होरा द्रेष्काणादिकम् स्यात् तथा च अशुभाः ग्रहाः (नष्टेन्दु-

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मंगलपतंगपतंगपुत्राः) भवेयुः, स्त्रीराशीनाम् लग्नम् स्यात् तदा कार्यसिद्धिर्न भवतीति विज्ञेयम्। यदि केचन शुभवर्गाः, केचन चाशुभवर्गाः , केचन शुभग्रहाः केचन अशुभग्रहाः लग्ने भवेयुः। अर्थात् मिश्रग्रहाणाम् वर्गाः मिश्रग्रहाश्च यदि लग्ने स्युस्तदा विलम्बेन कार्य सिद्धिर्भवतीत्यवगन्तव्यम्। अत्रोभयवर्गबलाधिक्येन कार्यस्य सफलता असफलता वा विचारणीया। अर्थात् शुभवर्गाधिक्येन कार्ये साफल्यम् अशुभवर्गाधिक्येन कार्ये असाफल्यम् भवति। अत्र भवन्तः पाठकाः सम्यक्तया शुभवर्गादिविषयान् अवगच्छेयुः इति धिया शुभवर्गादिकम् किञ्चित् अत्र विविच्यते।

३.५.१ शुभवर्गनिरूपणम्

भवन्तः इदम् तु ज्ञातवन्तः एव यत् वर्गशब्देन षड्वर्ग-सप्तवर्ग-दशवर्ग-षोडशवर्गादीनाम् बोधो भवति। तेषु च वर्गेषु लग्ने शुभग्रहाणां राशयः स्युः अर्थात् चन्द्र-बुध-गुरु-शुक्राः तेषां राशयः भवन्ति कर्कः, मिथुनम्, कन्या, धनुः, मीनः, वृषः, तुला च। एताः राशयः लग्ने, होरायाम् लग्नद्रेष्काणे, लग्ननवांशादिषु च स्थिताः स्युस्तत्र लग्ने शुभ-वर्गगते इति वाक्यं संगच्छते।

३.५.२ अशुभवर्गकथनम्

एतद्विपरीतम् अर्थात् अशुभग्रहाः ये सन्ति मंगल-पतंग-पतंगपुत्राः तेषाम् राशयः यदि लग्ने भवेयुः तदा अशुभवर्गगतलग्नम् बोध्यम्। अर्थात् मेषः, वृश्चिकः, सिंहः, मकरः, कुम्भश्च एताः राशयः लग्नरूपेण स्थिताः स्युः, लग्नस्थहोराद्रेष्काणादिषु वा स्युस्तदा अशुभवर्गगतलग्नम् बोध्यम्।

३.५.३ नरराशयः, स्त्रीराशयश्च

उपर्युक्तश्लोकस्य विशिष्टार्थे भवन्तः स्त्रीपुरुषराशयः तु ज्ञातवन्त एव तथापि स्पष्टतायै पुनः पुरुषस्त्रीराशयः प्रोच्यन्ते। राशिक्रमतः पुरुषस्त्रीराशयः भवन्ति अर्थात् मेषः पुरुषः, वृषः स्त्री, मिथुनः पुरुषः, कर्कः स्त्री, सिंहः पुरुषः, कन्या स्त्री, तुला पुरुषः, वृश्चिकः स्त्री, धनुः पुरुषः, मकरः स्त्री, कुंभः पुरुषः, मीनः स्त्री एष क्रमः विज्ञेयः।

३.५.४ "नरभोदये" इत्यत्र विशेषः

उपर्युक्तश्लोके **"नरभोदये"** इत्यस्य पदस्य अर्थः भवति नरराशीनाम् लग्ने। परन्तु टीकाकारः – श्लोकस्य विवृतौ लिखति – अत्र **"नरभोदये"** इति यदुक्तम् तच्चिन्त्यम् प्राचीनैर्विरोधात् – यथाऽऽह वराहात्मजप्रथुयशाः

सौम्ये विलग्ने यदि वाऽस्यवर्गे शीर्षोदये सिद्धिमुपैति कार्यम्।
अतो विपर्यस्तमसिद्धिहेतुः कृच्छ्रेण संसिद्धिकरं विमिश्रम्॥

एवमेव प्रश्नसिन्धौ ताजिकनीलकण्ठयामपि, अतः शीर्षकोदये इति पाठो भवेदिति। अथवा अङ्गाङ्गीभावसम्बन्धेन चैतन्यात् क्षिप्रकार्यकारित्वाप्रयोजनतया लक्षणया **'नर"** शब्देन शीर्षरूपोऽर्थो बोध्यः। अत्र नरभानि = द्विपदराशयो मिथुनकन्यातुलादयः शीर्षोदया एवातो नरभोदये = द्विपदराशेः मिथुनकन्यातुलादयः शीर्षोदया एवातो नरभोदये = "द्विपदराश्युदये" इत्याचार्योक्तम् सर्वसम्मतमेव। टीकाकारस्याक्षेपः प्रमादजनक एवेति (संशोधकः) शीर्षोदयराशीनाम् विषये वराहः बृहज्जातके व्यनक्ति – **"गौजाश्विकर्किमिथुनास्समृगाः निशाख्याः पृष्ठोदयाः विमिथुनाः कथितास्त एव। शीर्षोदया दिनबलाश्च भवन्ति शेषा लग्नं समेत्युभयतः**

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पृथुरोमयुग्मम्" श्लोकेऽस्मिन् रात्रिबलीराशयः दिवाबलीराशयः, उभयोदयः, शीर्षोदयराशयश्च प्रोक्ताः सन्ति।

तत्र वृषमेषधनुकर्कमिथुनमकरराशयः रात्रिबलिनः, वृषमेषकर्कधनुःमकराः पृष्ठोदयाः, सिंहकन्यातुलावृश्चिककुंभाः दिवा बलिनः शीर्षोदयः भवन्ति। मीनः, उभयोदयः दिवा रात्रौ च उभयत्र बली अस्ति।

प्रसंगवशादेश निर्देशः भवतां ज्ञानसंवर्धनाय कृतः इति दिक्।

३.६ शुभवर्गस्योदाहरणम्

शुभवर्गगते लग्ने, सशुभे, नरभोदये शीघ्रकार्यसिद्धिः अत्र शुभग्रहगुरोः वर्गः राशिः लग्ने, गुरुशुक्रौ शुभौ लग्ने तथा नरराशिः विषमराशिः लग्ने अतः शीघ्रकार्यसिद्धियोगः।



अशुभवर्गस्योदाहरणम्

अत्र अशुभग्रहशनेः वर्गः (राशिः) लग्ने अशुभग्रहौ सूर्यराहू लग्ने स्थितौ स्तः। अतः कार्यसिद्धिर्न भविष्यति।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



मिश्रवर्गस्योदाहरणम्

अत्र लग्नस्पष्टम् २-२०°-३०'-४०" लग्ने मिथुन राशिः शुभवर्गः, द्रेष्काणः कुम्भस्य, नवांशः मेषस्य, होरा कर्कस्य वर्तते। इत्थम् लग्नम्, होरा च शुभवर्गस्य, नवांशः द्रेष्काणश्च अशुभवर्गस्य वर्तेते। अतः प्रश्नकुण्डल्याम् मिश्रवर्गः दृश्यते। लग्नेऽपि द्वौ शुभौ गुरुशुक्रौ द्वौ पापौ शनिराहू च स्थितौ स्तः अतः मिश्रग्रहाः सन्ति। अत्र **"मिश्रे कार्यं विलम्बतः"** एष योगः वर्तते।



इत्थम् भवद्भिः पाठकैः सम्यक् विचार्य शीघ्रकार्यसिद्धिः कार्यनाशः, विलम्बतो वा कार्यसिद्धिः विचारणीया।

बोधप्रश्नाः

१३. षड्वर्गाः के ?

.....

.....

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१४. सप्तवर्गाः के ?

.....

.....

१५. दशवर्गाः के ?

.....

.....

१६. षोडशवर्गाः के ?

.....

.....

१७. नरराशयः, स्त्रीराशयश्च के ?

.....

.....

१८. पृष्ठोदयराशयः के ?

.....

.....

१९. शीर्षोदयराशयः के ?

.....

.....

२०. उभयोदयराशिः कः ?

.....

.....

ग्रन्थस्य मूलपाठः

प्रश्नलग्नौपगौ चन्द्रमन्दौ यदा
वासरेशो घटे रश्मिहीनो बुधः।
पृच्छकस्त्वागतो दुष्टभावादसौ
प्रश्नमित्थम् विचिन्त्याऽत्र धीरो वदेत्॥१॥

प्रश्नलग्नाधिपो लग्नगेहम् यदा
कार्यनाथोऽपि कार्यालयं पश्यति।
कार्यमङ्गाधिपः कार्यपोऽङ्गन्तदा।
सर्वथा कार्यसिद्धिर्जनानां भवेत्॥२॥

चेन्मिथो वीक्षणम् लग्नकार्येशयो-
रात्मभावस्थयोः कार्यसिद्धिस्तदा।
पूर्णबिम्बेन चन्द्रेण दृष्टाविमौ
सत्त्वरं कार्यसिद्धिः प्रयासं विना॥३॥

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शुभवर्गगते लग्ने सशुभे नरभोदये।
शीघ्रं तद्वत्यये नैव मिश्रे कार्यं विलम्बतः॥

३.७ सारांशः

प्रेयांसः विद्यार्थिनः भवद्भिः पाठेऽस्मिन् सर्वप्रथमम् प्रश्नकुण्डलीनिर्माणम् कृत्वा कपटप्रश्नलक्षणम् पठितम्। अस्य लक्षणस्य ज्ञानेन प्राश्निकस्य मनोभावगतवृत्तान्तम् ज्ञात्वैव प्रश्नोत्तरम् प्रश्नविद्याप्रवीणः दद्यात् इति सम्यग्ज्ञातम्। सकलप्रश्नेषु उपयोगिनः कार्यसिद्धियोगाः (चत्वारः योगाः) पठिताः। अत्र चन्द्रदृष्टे विशेषतया वैशिष्ट्यात् एषु योगेषु सत्त्वरं कार्यसिद्धिः कदा भवति, प्रयासं विना च कार्यसिद्धिः कथं भवति एतत्सर्वम् चन्द्रपूर्णतावशात् चन्द्रदृष्टिवशाच्च ज्ञातम्। अनेन इदमपि भवद्भि पाठेऽस्मिन्नधीतम् यत् लग्नकार्येशयोरुपरि पूर्णचन्द्रदृष्टेः कार्यसिद्धेः सत्त्वरत्वसाधने प्रयासं विनापि कार्यसाधने कियत् महत्त्वमस्ति। कार्यसिद्धियोगेषु योगान्तरप्रतिपादने भवद्भिः अधीतम् यत् प्रश्नलग्ने शुभवर्गस्य, शुभग्रहस्थितेः, तथा च नरराशिस्थितेः अतिशीघ्रकार्यसिद्धौ महत्त्वपूर्णम् स्थानम्। तत्रैव प्रश्नलग्ने अशुभवर्गस्थितेः, अशुभग्रहस्थितेश्च कार्यनाशे प्रभावोऽपि ज्ञातः। तत्रैव मिश्रग्रहस्य प्रभावेण मिश्रवर्गप्रभावेन च कार्यसिद्धौ विलम्बज्ञानम् अपि ज्ञातम्। तत्रैव प्रसंगवशात् षड्वर्गसप्तवर्गदशवर्गषोडशवर्गानाम् नामानि, शीर्षोदयपृष्ठोदय-उभयोदय-नरस्त्री-राशीनपि भवन्तः ज्ञावतन्तः।

३.८ शब्दावली

१.	घटे	=	कुम्भराशौ
२.	रश्मिहीनः	=	अस्तंगतः
३.	चेता	=	मनः
४.	सत्त्वम्	=	बलम्
५.	धराजः	=	भौमः
६.	शशिजः	=	बुधः
७.	इन्द्रगुरुः	=	बृहस्पतिः
८.	कालनरस्य	=	कालपुरुषस्य (ब्रह्माण्डस्य)
९.	कार्यालयम्	=	कार्यभावम्
१०.	कार्यपः	=	कार्यभावेशः
११.	आत्मभावस्थयोः	=	स्वस्वभावस्थयोः
१२.	नरभोदये	=	पुरुषराशीनां लग्ने
१३.	गो	=	वृषराशिः
१४.	अजः	=	मेषराशिः
१५.	अश्वि	=	धनुराशिः
१६.	मृगः	=	मकरराशिः
१७.	निशाख्याः	=	रात्रिबलिनः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१८. पृथुरोमयुग्मम् = मीनराशिः

३.९ सन्दर्भग्रन्थाः

१. भुवनदीपकम्।

२. बृहज्जातकम्।

३.१० सहायकग्रन्थाः

१. प्रश्नकुण्डलीनिर्माणप्रक्रियावगमनार्थम् – तजिकनीलकण्ठी।

२. ग्रहस्पष्टादिज्ञानार्थम् – जन्मपत्रदीपकम्।

३. षड्वर्गाद्यानयनप्रक्रियावगमार्थम् – बृहत्पाराशरहोराशास्त्रम्।

३.११ बोधप्रश्नोत्तराणि

१. कपटप्रश्ने लग्ने चन्द्रमन्दौ भवतः

२. सूर्यस्य कुम्भराशौ स्थितिः अपेक्षते

३. बुधः रश्मिहीनो भवेत्

४. चन्द्रमा मनः उक्तः

५. शनिः दुःखस्य प्रतिनिधिः

६. प्रश्नलग्नाधिपः लग्नम् कार्याधिपः कार्यम् पश्यति चेत् प्रथमो योगः।

७. कार्यभावम् लग्नेशः, कार्यभावेशश्च लग्नम् पश्येच्चेत् द्वितीयो योगः।

८. लग्नेशकार्येशौ परस्परम् पश्यतश्चेत् तृतीयो योगः।

९. लग्नेशः लग्ने कार्यभावेशश्च कार्यभावे स्याच्चतुर्थो योगः।

१०. चन्द्रस्य पूर्णदृष्टिः (चतुःपाद) सप्तमे, त्रिपाददृष्टिः चतुर्थाष्टमे, द्विपाददृष्टिः नवमपञ्चमे, एकपाददृष्टिश्च तृतीयदशमे भवति।

११. चन्द्रमा पूर्णिमायामेव पूर्णबिम्बो भवति।

१२. आद्यः लग्नपतिः कार्ये कार्याधिपः लग्ने भवेत् –

द्वितीयः लग्नेशः लग्ने कार्येशः कार्यभावे भवेत् –

तृतीयः लग्नेशकार्येशौ उभावपि लग्ने भवेताम् –

चतुर्थः लग्नेशकार्येशौ उभावपि कार्यभावे भवेताम् –

१३. षड्वर्गाः लग्नम्, होरा, द्रेष्काणः, नवांशः, द्वादशांशः, त्रिंशाशश्च

१४. सप्त वर्गाः – लग्नम्, होरा, द्रेष्काणः, सप्तमांशः, नवमांशः, द्वादशांशः, त्रिंशाशश्च।

१५. दशवर्गाः – गृहम्, होरा, द्रेष्काणः, सप्तांशः , नवांशः, दशांशः, द्वादशांशः, षोडशांशः त्रिंशांशः, षष्टंयशश्च।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१६. षोडशवर्गाः – गृहम्, होरा, द्रेष्काणः, चतुर्थांशः, सप्तमांश्चः, नवमांशः, दशमांशः, द्वादशांशः, षोडशांशः, विशांशः, चतुर्विंशाशः, सप्तविंशाशः, त्रिंशांशः, खवेदांशः, अक्षवेदांशः, षष्टंयशश्च।

१७. विषमराशयः – मेषः, मिथुनम्, सिंह, तुला, धनुः, कुंभाः – नरराशयः।

१८. समराशयः – वृषः, कर्कः, कन्या, वृश्चिकः, मकरः, मीनः – स्त्रीराशयः।

१९. पृष्ठोदयराशयः – वृषः, मेषः, कर्कः, धनुः, मकरः।

२०. शीर्षोदयराशयः – सिंहः, कन्या, तुला , वृश्चिकः कुंभः।

२१. उभयोदयराशिः – मीनः।

३.१२ अभ्यासप्रश्नाः

१. कपटप्रश्नज्ञापिका प्रश्नकुण्डली सिंहलग्ने निर्मेया।

२. प्रथमकार्यसिद्धियोगम्प्रदर्श्य तत्र सत्त्वरं कार्यसिद्धिः प्रदर्शनीया।

३. स्त्रीप्राप्तिविषयकप्रश्नानुसारम् लग्नेशकार्येशौ आत्मभावस्थौ कथम् भवतः।

४. प्रयासं विना कार्यसिद्धियोगज्ञाने तृतीयः कार्यसिद्धियोगः कथम् भविष्यतीति भाग्योन्नतिविषये प्रदर्श्यताम्।

५. द्वितीयः कार्यसिद्धियोगः लाभविषयककार्यसिद्धिज्ञानप्रश्ने प्रदर्शनीयः।

६. शुभावर्गगतलग्नम् शुभग्रहयुतम् नरराशौ प्रदर्श्यताम्।

७. अशुभवर्गगतलग्नम् अशुभग्रहयुतम् स्त्रीराशौ प्रदर्श्यताम्।

८. मिश्रवर्गगतलग्नम् कथम् भविष्यति इति उदाहरणम् देयम्।

९. कार्यसिद्धः कदा न भवतीति व्याख्यायताम्।

१०. भुवनदीपककारमते को विशेषः।

—◆—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पाठसंरचना
४.१ प्रस्तावना
४.२ उद्देश्यम्
४.३ मौष्टिकादिप्रश्नविचारः
४.३.१ धातुमूलजीवेषु नवांशानां व्याप्तिः [illegible]
४.३.२ [illegible] धातुमूलजीवविभागः
४.३.३ नवांशज्ञानविधिः
४.३.४ द्वादशांशज्ञानविधिः
४.३.५ देष्काणज्ञानविधिः
४.३.६ त्रिकोणादिभावसंज्ञापरिचयः
४.३.७ धातुचिन्ता योगः
४.३.८ जीवचिन्तायोगः
४.३.९ मूलचिन्तायोगः
बोधप्रश्नाः
४.४ प्रकारान्तरेण धातुमूलजीवचिन्तानिरूपणम्
४.४.१ विषमराशिषु नवांशक्रमेण धातुमूलजीवप्रश्नज्ञानम् (उदाहरणम्)
४.४.२ समराशिषु नवांशक्रमेण जीवमूलधातुप्रश्नज्ञानम् (उदाहरणम्)
बोधप्रश्नाः
४.५ मुष्टिप्रश्नविचारः, हृदयगतप्रश्नविचारश्च
बोधप्रश्नाः
ग्रन्थस्य मूलपाठः
४.७ सारांशः
४.८ शब्दावली
४.९ सन्दर्भग्रन्थाः
४.१० सहायकग्रन्थाः
४.११ बोधप्रश्नोत्तराणि
४.१२ अभ्यासप्रश्नाः

४.१ प्रस्तावना

प्रेयांसः पाठकाः प्रथमखण्डस्य चतुर्थपाठे भवतां स्वागतम्। भवद्भिः प्राश्निकस्य हृदयगतकपटभावलक्षणम्, कार्यसिद्धियोगाश्च पठिताः। इतोऽग्रेऽपि दैवज्ञानाम् कृते प्राश्निकानाम् मनोगतप्रश्नपरिज्ञानविधौ सर्वेषाम् प्रश्नानाम् त्रयः विभागाः प्रश्नग्रन्थेषु आचार्यैः निर्दिष्टाः, अर्थात् त्रिष्वेव क्षेत्रेषु प्रायः प्राश्निकानाम् प्रश्नाः भावितुमर्हन्ति। तेषु धातुमूलजीवचिन्तनमेव सर्वेषाम् प्रश्नानाम् मूलमिति मत्वा पाठेऽस्मिन् प्राश्निकानाम् मनोगतप्रश्नपरीक्षणविधिः निर्दिश्यते। भवताम् पाठ्यग्रन्थस्य प्रश्नभूषणस्य मौष्टिकप्रश्नाध्यायः अत्र विचार्यमाणोऽस्ति।

४.२ उद्देश्यम्

दैवज्ञानाम् कृते इदमस्ति आवश्यकम् तत्त्वम् यत् ते प्राश्निकानाम् भावगतमनोगत-हृदयगतानाम् च सर्वेषाम् लक्षणानाम् विचाराणां वा सम्यक् परीक्षणम् निरीक्षणम् च कृत्वा प्रश्नोत्तरविधौ संलग्नाः भवेयुः। यावत्कालपर्यन्तम् एष निश्चयो न भवेत् यत् प्रश्नकर्ता केन

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भावेन दैवज्ञपार्श्वे समागतः तावत् कालपर्यन्तम् तस्य प्रश्नोत्तरम् प्रश्नविद्याप्रवीणः न वदेत् एष आदेशः वर्तते प्रश्नशास्त्रस्य। यथा एतत् शास्त्रविषये आचार्यः भास्करः लिखति सिद्धान्तशिरोमणिग्रन्थे –

ज्योतिषशास्त्रफलं पुराणगणकैरादेश इत्युच्यते
नूनं लग्नबलाश्रितः स पुनरयं तत्स्पष्टखेटाश्रयः।
ते खेटाश्रयिणोऽन्तरेण गणितं गोलो ऽपि न ज्ञायते
तस्मात् यो गणितं न वेत्ति स कथं गोलादिकं ज्ञास्यति॥

अतः गणितविधिना प्राश्निकस्य मुष्टिगतवस्तूनाम् परीक्षणविधिज्ञानम् हृद्गतप्रश्नस्य च त्रिषु भेदेषु धातुमूलजीवाख्येषु परिज्ञानविधीनां निदर्शनमेव पाठस्यास्य उद्देश्यमस्ति। अनेन पाठेन भवन्तः ज्ञास्यन्ति –

- नवांशविधिना धातुमूलजीवप्रश्नज्ञानम्।
- समविषमराशिषु नवांशक्रमेण मुष्टिगतधात्वादिकथनम्।

४.३ मौष्टिकादिप्रश्नविचारः

भवन्तः पाठकाः जानन्त्येव यत् ज्योतिषशास्त्रम् चमत्कृतिकरम् शास्त्रम् अस्ति। अस्य शास्त्रस्य प्रसिद्धिः जनेषु मूकप्रश्नानाम् परिज्ञाने, मुष्टिगतवस्तूनां परिज्ञाने, हृदयगतप्रश्नानाम् परिज्ञानेऽपि वर्तते। प्रश्नकर्ता द्वारा दैवज्ञानाम् परीक्षाऽपि भवति, इत्यपि श्रूयते समाजे दृश्यते च। प्रश्नकर्ता दैवज्ञपार्श्वे गत्वा शुद्धात्मना प्रेमभावेन प्रश्नम् कुर्यात् यावत्कालपर्यन्तम् प्राश्निकः प्रश्नं न करोति तावत् प्रश्नोत्तरम् न दीयते, वस्तुतः एष वर्तते नियमः प्राश्निकानाम् कृतेऽपि दैवज्ञानां कृतेऽपि। परन्तु एकः प्रश्नः समुदेति यत् शास्त्रस्य सत्यतापरीक्षाविधौ दैवज्ञैः किं कर्तव्यम् अतः दैवज्ञानाम् कृते सन्तोषार्थम् ज्योतिषशास्त्रस्य आचार्यैः प्रश्नकाले मौष्टिकादिप्रश्नविचारः कृतः। प्रश्नकुण्डलीद्वारा पूर्वम् प्रश्नस्य सत्यासत्यतापरीक्षणम् विधेयम्। प्रश्नकर्ता शान्तो विवेकी शुद्धात्मादिगुणैः युक्तोऽपि स्यात् तदापि तेन कृतस्य प्रश्नस्य सत्यासत्यता परीक्षणम् विधायैव प्रश्नोत्तरः देय। अथ च प्राश्निकस्य मुष्टिकायाम् किम् वस्तु अस्ति, अथवा मम मनसि कः प्रश्नः वर्तते इति पूर्वम् वदन्तु एतादृशेषु प्रश्नेषु चमत्कारसम्पादनार्थम् अपि अस्य विधेः प्रयोगः दैवज्ञैः क्रियते स्म। अत एव अस्य विधेः नाम मौष्टिकादि-प्रश्नविचारनाम्ना प्रसिद्धः। अनेकैः प्रश्नग्रन्थकारैः एतादृशीनाम् विधीनाम् उल्लेखः स्वस्वग्रन्थेषु कृतः।

अस्य मौष्टिकादिप्रश्नविचारस्य कृते भवतां पाठयग्रन्थे एकोऽध्यायः मोष्टिकादि-प्रश्नाध्यायनाम्ना निधारितः। अधुना भवतां पाठयग्रन्थोक्तमौष्टिकादिप्रश्नविचारः निर्दिश्यते।

स्वांशगः खेचरः स्वांशमङ्के यदा
धातुचिन्ता त्रिकोणे ऽथवा ऽऽलोकयेत्।
अन्यभागस्थितो जीवचिन्ता तदा
मूलचिन्ताऽन्यभागं परांशोपगः॥

पदच्छेदः

स्वांशगः, खेचरः, स्वांशम्, अङ्के, यदा , धातुचिन्ता, त्रिकोणे, अथवा , आलोकयेत्, अन्यभागस्थितो, जीवचिन्ता, तदा, मूलचिन्ता, अन्यभागम्, परांशोपगः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अन्वयः

यदा, स्वांशगः, खेचरः, अंगे, अथवा , त्रिकोणे, स्वांशम् आलोकयेत्, (तदा) धातुचिन्ता, (यदा चोक्तयोगे) अन्यभागस्थितो, तदा, जीवचिन्ता (यदा) परांशोपगः (ग्रहः) अन्यभागम् (पश्येत्) तदा मूलचिन्ता (कार्या)।

प्रतिपदार्थः

यदा = यस्मिन् काले प्रश्नकाले, स्वांशगः = स्वकीये अंशे नवांशे गतः ग्रहः अर्थात् स्वनवांशगः आत्मीयनवांशस्थ इत्यर्थः, खेचरः = ग्रहः, अंगे = प्रश्नलग्ने अथवा त्रिकोणे = लग्नात् पञ्चमे नवमे वा वर्तमानम् = स्वांशम् = आत्मीयनवांशम्, आलोकयत् = पश्येत् (तदा) धातुचिन्ता = धातूनाम् स्वर्णरजतताम्रलौहादिधातूनाम् चिन्ता तत्सम्बन्धी प्रश्नः भवतीति निश्चयः। (तथा चोक्तयोगे) अन्य भागस्थितौ अन्यस्य परस्य भागे (अंशे) नवांशे वा स्थितः वर्तमानः इति अन्यभागस्थः परभागस्थः (ग्रहः) (लग्नत्रिकाणौ यदि पूर्वोक्तसदृशमेव स्यात् अर्थात् परनवांशस्थः ग्रहः स्वभागस्थम् लग्नं त्रिकोणं वा पश्येत्, तदा जीवचिन्ता = मनुष्यादिकीटपतंगान्ताः जीवाः तेषाम् चिन्ता तत्सम्बन्धी प्रश्नो वा (मनसि वर्तते इति वक्तव्यम्) (एतदतिरिक्तम्) परांशोपगः = परस्य अन्यस्य भागे नवांशे गतः परनवांशस्थः ग्रहः अन्यभागम् = परनवांशम् लग्ने त्रिकोणे वा वर्तमानम् अन्यग्रहनवांशम् पश्येत्, तदा मूलचिन्ता = वृक्षादारभ्य तृणान्तम् यावत् सर्वम् मूलम् तस्य चिन्ता तत्सम्बन्धी प्रश्नो वा मनसि निधाय प्राश्निकः समागतः इति विज्ञेयम्।

विशिष्टार्थः

प्रेयांसः पाठकाः अतिगम्भीरोऽयं विषयः। भवद्भिः इदम् अवधेयम् यत् प्राश्निकानाम् मनसि येऽपि प्रश्नाः भवितुमर्हन्ति ते सर्वे एव धातुमूलजीवेषु वर्गीकृताः सन्ति। अर्थात् धातुमूलजीवेषु सर्वं जगत् व्याप्तमस्ति। अत एव प्राश्निकानाम् सर्वेऽपि प्रश्नाः धातुमूलजीवेषु व्याप्ताः भवन्ति। अत्र धातुः नाम स्वर्णतः मृत्तिकान्तम् यावत् व्याप्तम् धातुमयम् जगत्, जीवो नाम मनुष्यतः कीटपतंगान्तम् यावत् जीवसमूहः। मूलम् नाम वृक्षादितृणान्तम् यावत् परिव्याप्तम् वनस्पतिजगत् स्थलजम् जलजं वा सर्वमेव। एतेषाम् समेषाम् धातुमूलजीवानाम् विषये प्राश्निकमनसि कीदृशः प्रश्नः एतत्सर्वमेषु चिन्तनीयम्। भवन्तः जानन्ति यत् प्रश्नकुण्डल्याम् नवग्रहाः स्पष्टाः, नवांशादिरहिताः पूर्वम् विज्ञेयाः। तदनन्तरम् अनेन श्लोकोक्तविधिना प्रथमम् तावत् धातुमूलजीवविषये प्रश्नः विज्ञेयः। तद् यथा - प्रश्नकुण्डल्याम् आत्मीयनवांशस्थः (नवांशकुण्डल्याम्) स्वराशिस्थः ग्रहः यदि प्रश्नलग्ने अथवा त्रिकोणे (नवमपञ्चमे) स्थितम् आत्मीयनवांशमवलोकयेत् तदा धातुचिन्ता ज्ञेया। एतदुक्तं भवति यदा स्वनवमांशस्थो ग्रहः स्वनवमांशकयुक्तम् लग्नपञ्चमनवमानामन्यतमम् पश्यति तदा धातुचिन्ता अर्थात् सुवर्णादिमृत्तिकान्तं धातवस्तेषां विचारः प्रश्नकर्तुः मनसि वर्तते अथवा मुष्टिकायां धातुमयं किमपि वर्तते इति वक्तुं शक्यते। यदा च उक्तयोगे विचारणीयग्रहः अन्यभागस्थितः परनवांशगतः भवेत् अथ च सः ग्रहः स्वनवमांशकयुक्तम् लग्नपञ्चमनवमानामन्यतमम् पश्यति तदा जीवचिन्ता प्राश्निकस्य मनसि वक्तव्या अथवा तस्य मुष्टिकायां कश्चन लघुकाय कोऽपि जीवः अस्ति जीवः कीटपतंगादिकमस्तीति वक्तुम् शक्यते। अत्र जीवशब्देन मनुष्यादिकीटपतंगान्ताः तेषां चिन्ता वक्तव्या। अत्रेदमवधेयम् यत् प्राश्निकस्य मनसि तु कस्यापि जीवस्य मनुष्यादिकीटपतंगपर्यन्तस्य मनुष्यादिकस्य प्रश्नः भवितुमर्हति परन्तु तस्य मुष्टिकायाम् तु कश्चन एतादृशः जीव एव भवितुमर्हति यो हि तस्य मुष्टिकायाम् आगच्छेत्, इत्थं मनसि विनिश्चित्य जीवविषयः वक्तव्यः। अथ च यदा परांशोपगः परनवांशस्थः ग्रहः, अन्यभागम् परनवांशम् पश्येत् तदा मूलचिन्ता। एतदुक्तम् भवति- पराशंस्थो ग्रहः परनवांशकयुक्तम् लग्नपञ्चमनवमानामन्यतमम् पश्यति तदा मूलचिन्ता प्राश्निकस्य प्रश्नाधारः। मूलञ्चात्र वृक्षादितृणान्तम्।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एवमत्र ग्रहयुतनवांशकवशात् स्थलजलजत्वम् अपि धातुमूलजीवानां वक्तव्यम्। एतत्सर्वम् ज्ञातुम् जलचरस्थलचरनभचरादिराशीनाम् विभागानुसारम् वर्णनमपि विज्ञेयम्। तदर्थम् सर्वप्रथमम् ग्रहाणां धातुमूलजीवादिविषयः प्रश्नशास्त्रीय ग्रन्थ भुवनदीपकमतानुसारम् अपि विविच्यते। ततः आवश्यकनवांशज्ञानविधिः, त्रिकोणादिस्थानान्यपि यथावसरम् निर्दिश्यन्ते।

४.३.१ धातुमूलजीवेषु सर्वप्रश्नानां व्याप्तिः, प्रश्नविचारश्च

अये विद्यार्थिनः भवन्तः जानन्ति यत् पञ्चमहाभूतेषु परिव्याप्तमिदम् जगत् धातुमूलजीवेषु वर्गीकर्तुम् शक्यते। यदि वयम् परितः पश्यामस्तर्हि समग्रम् जगत् धातुमूलजीवस्वरूपी वर्गत्रये विभक्तम् दृश्यते। वस्तुतः भूगर्भतः प्राप्ताः समस्तपदार्थाः स्वर्णरजतपित्तलताम्रकांस्यपाषाणमृत्तिकादिखनिजपदार्थाः धातुसंज्ञया व्यवह्रियन्ते। एवमेव मूलवर्गे तृणदूर्वातः वृक्षवनस्पत्यादिपर्यन्तम् सर्वम् वनस्पतिजगत् स्वीक्रियते। अत्र मूलस्यापि द्विविधत्वम् जलजम् स्थलजञ्च मूलम्। जलजमूलेषु शृंगाटकवराटकादयः नदीसमुद्रसरोवरादिषु च समुत्पन्नाः सर्वे फलपुष्पादयः स्वीक्रियन्ते। तथा च स्थलजेषु मूलेषु कृषिमाध्यमेन समुत्पादितम् धान्यम्, पर्वतोपत्यकादिषु समुत्पन्नम् वनस्पत्यौषधादिकम् विज्ञयेम्। इत्थम् जीवजगत् अपि त्रिविधम् अण्डजाः जीवाः, स्वेदजाः, जरायुजाश्च जीवाः। अण्डजाः कुक्कुटचटकादिपक्षिणः, स्वेदजाः जूकादयः, जरायुजाः पशवः मनुष्यादयश्च। अत्रापि जीवानाम् त्रिविधत्वम् द्विपदचतुष्पदसरीसृपरूपेण समस्तजगति व्याप्तम् दृष्टिपथमायाति।

वस्तुतः अस्मिन् त्रिविधे धातुमूलजीवात्मकविभागे एव सर्वे ग्रहाः विभिन्नराशिषु नवांशादिषु वा स्वस्थित्या, दृष्ट्या युत्या वा तत्र तत्र स्वसत्ताम् साधयन्ति यथा ग्रहाणां धातुमूलजीवत्वज्ञानं विना **"स्वांशगः खेचरः"** अस्य पदस्य व्याख्या कर्तुम् न शक्यते। अत एव ग्रन्थान्तरादाकृष्य भवताम् ज्ञानसंवर्धनाय विषयोऽयं क्रमशः उपस्थाप्यते।

४.३.२ ग्रहाणां धातुमूलजीवविभागः

प्रश्नशास्त्रे मूलप्रश्नविचारे मुष्टिगतवस्तुज्ञानप्रसंगे एव ग्रहाणाम् धातुमूलजीवत्वविचारः नैव अपेक्षितः अपितु अपहृतवस्तुविचारे, चोरितद्रव्यादिनिर्णये नष्टप्राप्तिप्रसंगे, आजीविकादिविषयनिर्धारणेऽपि एष महत्त्वपूर्णः विषयः। भुवनदीपककारः ग्रहाणाम् धातुमूलजीवत्वम् कथयति –

मन्देन्दूरगभौमाः स्युः धातू सवितृभार्गवौ।
मूलं जीवश्च सौम्यश्च जीवं प्राहुर्महाधियः॥

स्पष्टार्थः

अत्र धातूनामधिपाः मन्देन्दूरगभौमाः चत्वारः ग्रहाः सन्ति। अत्र शनि-राहू, चन्द्रभौमौ पृथक्-पृथक् वर्गद्वये विभक्तधातूनामधिपौ। यथा चन्द्रभौमौ धाम्यधातूनाम् स्वर्णरजतताम्र-रत्नशीशकादीनाम् अधिपौ। शनिराहू मृत्तिकापाषाणकृष्णपाषाणादीनामधिपौ विज्ञेयौ। अर्थात् चत्वारः ग्रहाः शनिराहूचन्द्रभौमाः धातूनामधिपाः। सूर्यशुक्रौ मूलसंज्ञकौ तत्र मूलमपि द्विविधम् स्थलजम् जलजञ्च। स्थलजम् मूलम् सूर्याधीनम्, जलजम् मूलम् च शुक्राधीनम्। जीवः सौम्यश्च जीवसंज्ञकौ।

अत्र केवलम् प्राश्निकानाम् हृदयगतधातुमूलजीवचिन्तस्य एव विचारः अपेक्षितः। तेषाम् सूक्ष्मवर्गीकरणम् तु विशेषाध्ययनस्य अपेक्षाम् विभर्ति। केवलम् एकैकस्य (धातोः, मूलस्य, जीवस्य वा) चिन्तनेऽपि ज्योतिषग्रन्थेषु विशिष्टाः विचाराः सर्वेषाम् ग्रहाणाम् प्रभावम् सत्ताम् च सर्वत्र परिलक्ष्य आचार्यैः कृताः। तेषु केचन भवतां ज्ञानसवर्धनाय अत्र उद्धियन्ते। उपरिनिर्दिष्टश्लोकानुसारम् –

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शनिचन्द्रराहुभौमाः	धातुप्रतिनिधयः
सूर्यशुक्रौ	मूलप्रतिनिधी
गुरुबुधौ	जीवप्रतिनिधी

यद्यपि धातुमूलजीवेषु एतत्वर्गीकरणम् ग्रहाणामस्ति, परन्तु सूक्ष्मदृष्टया सर्वे ग्रहाः सर्वेषाम् प्रतिनिधयः सन्ति यथा बृहज्जातके ग्रहाणाम् धातुत्वम् (१)–

ताम्रं स्यान्मणिहेमयुक्तिरजतान्यर्कार्त्तु मुक्तायसी।
अर्कस्य ताम्रम् मणयो हिमांशोर्भौमस्य हेमेन्दुसुतस्य युक्तिः॥

आचार्यबादरायणः अपि ग्रहाणाम् पृथक् पृथक् धातुषु आधिपत्यम् कथयति, तत्र स्वगृहे स्थितस्य ग्रहस्यापि वैशिष्टयम् धातुनिर्णये सिद्धयति यथा (२)–

जीवस्य रौप्यम् स्वगृहे स्थितस्य तस्यैव हेमोशनसश्च मुक्ता।
तीक्ष्णांशुदेवप्रभवस्य सीसम् कृष्णायसं च प्रवदन्ति तज्ज्ञाः॥

सूक्ष्मजातकेऽपि स्वस्थाने स्थितानाम् ग्रहाणां वशेन बलवद्भिः ग्रहैश्च धातुनिर्णयः प्रोक्तः यथा (३)-

अर्कादिताम्रमणिहेमयुक्तिरजतानि मौक्तिकं लौहम्।
वक्तव्यम् बलवद्भिः स्वस्थाने हेमजीवो ऽपि॥

वस्तुतः प्रश्नलग्नेन सह धात्वधीशग्रहाणाम् सम्बन्धेन अपि धातुसम्बन्धी प्रश्नानाम् निर्णयः निर्देश्यः। तत्र एकाधिकग्रहाणाम् सम्बन्धे स्वस्थानादौ नवांशे च स्थित्या अधाम्यधातुचिन्ता प्रश्नो वा वाच्यः।

एवमेव सूर्यशुक्रौ मूलप्रतिनिधिग्रहौ स्तः। अर्थात् मूलाधीशयोः सूर्यशुक्रयोः प्रश्नलग्नेन सह सम्बन्धवशात् मूलचिन्ता प्रश्नो वा वाच्यः तत्र जलचरराशेः (कर्कवृश्चिकमकरकुंभमीनानाम्) सम्बन्धेन नवांशस्थित्या वा जलजमूलप्रश्नः। स्थलजराशेः (मेषवृषमिथुनसिंहकन्यातुलाधन्विनाम्) सम्बन्धेन नवांशादिवशाच्च स्थलजमूलप्रश्नः चिन्ता वा वाच्या। यतो हि बृहज्जातके उक्तिरस्ति (४) –

होरेन्दुसूरिरविभिर्विबलेस्तरूणां ताये स्थले तरुभवोंऽशकृतप्रभेदः।
लग्नाद् ग्रहः स्थलजलर्क्षपतिस्तु यावांस्तावन्त एव तरवः स्थलतोयजाताः॥

अस्य श्लोकस्य स्पष्टार्थः एवमस्ति यत् प्रश्नकाले लग्नचन्द्रगुरुरवयः निर्बलाः स्युस्तदा वृक्षाणां जन्म ज्ञायते। परन्तु वृक्षः जलजः अथवा स्थलजः अस्य ज्ञानार्थम् प्रश्नलग्ने जलचरराशेः नवांशः स्यात्तर्हि जले वृक्षजन्म विज्ञेयम् अथ च स्थलराशेः नवांशः प्रश्नलग्ने स्यात्तदा स्थले वृक्षजातम् इति वक्तुं शक्यते, एष प्रयोगः बृहज्जातके वियोनिजन्माध्याये वियोनिनाम् जन्म ज्ञातुम् वराहमिहिरेण कृतः परन्तु प्रश्नलग्ने अनेनैव मूलचिन्ता वक्तुम् शक्यते। अत्र लग्नतः उक्तनवांशस्वामी यावन्मिते स्थाने भवेत् तावती एव संख्या वृक्षाणाम् वक्तुम् शक्यते। यदि च उक्तनवांशेशः उच्चादिस्थानेष्ववस्थितः तर्हि वृक्षाणाम् उक्तसंख्या द्विगुणिता त्रिगुणिता अपि वक्तुं शक्यते। एष निर्णयः आयुर्दायप्रकरणोक्तनियमेन कर्तुं शक्यते तदर्थम् बृहज्जातके आयुर्दायप्रकरणे उक्तमस्ति

(१) "**स्वतुङ्गवक्रोपगतैस्त्रिसङ्गुणम् द्विरुत्तमस्वांशकभत्रिभागगैः।**" इत्यादि श्लोकोक्त प्रक्रियायाः अभ्यासः करणीयः। आचार्यः कल्याणवर्मा सारावलीग्रन्थेऽपि मूलविचारे एवमेव व्यनक्ति–(२)

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लग्नार्कजीवचन्द्रैर्विबलैः शेषैश्च सबलैः मूलयोनिः स्यात्।
स्थलजलभवनविभागा वृक्षादीनाम् प्रभेदकराः॥
स्थलजलग्रहयोर्लग्ना द्यावति राशौ तु तेऽपि तावन्तः
द्वित्रिगुणत्वम् तेषामायुदार्यप्रकारोक्तम्।

इत्थम् लग्ने नवांशपतीनां सूर्यादीनां वशात् मूलचिन्तायाम् पृथक् पृथक् वृक्षानाम् विचारः कर्तुम् शक्यते यथा –

अन्तः साराञ्जनयति रविर्दुर्भगान् सूर्यसुनुः।
क्षीरोपेतांस्तुहिनकिरणः कण्टकाढयांश्च भौमः॥
वागीशज्ञौ सफलविफलान्पुष्पवृक्षांश्च शुक्रः।
स्निग्धानिन्दुः कटुकविटपान्भूमिपुत्रश्च भूयः॥

अत्र स्पष्टार्थः एवमस्ति – उक्तनवांशस्वामी सूर्यः स्यात् तर्हि अन्तः साराः शिंशपवृक्षाः चन्दनाः नालिकेरादयः मूलचिन्तायाम् वक्तव्याः। नवांशेशः शनिश्चेत् दुर्भगाः कुशकाशशरविषप्रियङ्गुवृक्षाः, चन्द्रश्चेत् क्षीरयुक्ताः इक्षुवटाश्वत्थोदुम्बराद्याः वृक्षाः, भौमश्चेत् कण्टकाकीर्णाः अपामार्गबिल्वकिंशुकाद्याः तालवेणुभल्लाटादयश्च अथ च कटुकविटपाः मरीचिसर्षपाद्याः, नवांशेशः गुरुश्चेत् सफलाः आम्रदाडिमपनसदेवदारुकदरी कदम्बाद्याः, बुधश्चेत् विफलाः कन्दसूरणपत्रवल्ली प्रधानाः, नवांशेशः शुक्रश्चेत् पुष्पवृक्षाः (पादपाः) मन्दारादयः चकारात् फलपत्राधिकाः स्नेहवृक्षादयः, चन्द्रश्चेत् स्निग्धाः देवदारुश्रीगन्धचन्दनाद्याः वृक्षाः मूलचिन्तायाम् वक्तुम् शक्यन्ते। एतदतिरिक्तम् उक्तनवांशस्वामी शुभग्रहः स्यात् पापगृहे यदि अवस्थितः तर्हि अशुभभूमौ शुभवृक्षचिन्ता, उक्तनवांशेशः अशुभग्रहश्चेत् शुभग्रहराशौ अवस्थितः तर्हि शुभभूमौ कुस्सितवृक्षजनितचिन्तानिर्देशः कर्तुं शक्यते यथोक्तं तत्रैव –

शुभो ऽशुभर्थे रुचिरं कुभूमिजम् करोति वृक्षं विपरीतमन्यथा।
परांशके यावति विच्युतः स्वकाद्भवन्ति तुल्यास्तरवस्तथाभिधाः॥

अनेनेदमपि सिद्धयति पापग्रहः पापग्रहगृहे ऽवस्थितश्चेत् कुभूमौ कुस्सित वृक्षजनितचिन्ता वक्तव्या। तत्र सारावल्याम् वृक्षसंख्याज्ञानविषयेऽपि कथयति –

स्वांशात्परांशगामिषु यावत्संख्या भवन्ति तावन्तः।
स्थलजा वा जलजा वा तरवः प्राक् संख्यया प्रवदेत्॥

अत्र एतेषाम् समेषामुद्धरणानामुल्लेखस्य तात्पर्योऽयं विद्यते यत् यस्य मौष्टिकादिप्रश्नविचारस्य वर्णनम् भवतां पाठ्यग्रन्थे केवलं श्लोकद्वयेन कृतम् तस्य सम्यक् अध्ययनार्थम् प्रचुरसामग्री अन्यग्रन्थेषु उपलभ्यते। अधुना भवन्तः जीवविषयेऽपि अन्यान्यज्योतिषग्रन्थेषु किमुक्तम् तम् पश्यन्तु तत्र यथा –

जन्मकालिकलग्नात् प्रश्नकालिकलग्नाद्वा वियोनिजन्मज्ञानप्रकारः

वराहोक्तः –

क्रूरग्रहैस्तु वलिभिः विबलैश्च सौम्यैः क्लीवे चतुष्टयगते तदवेक्षणाद्वा।
चन्द्रोपग द्विरसभागसमानरूपम् सत्त्वं यदि भवेत्स वियोनि संज्ञः॥

तत्र स्पष्टार्थः – (१)

प्रश्नकालिकलग्ने सर्वे पापग्रहाः (सूर्यमंगलशनिक्षीणचन्द्रपापयुतबुधाः) बलिनः स्युः, शुभग्रहाः (गुरुशुक्रपूर्णचन्द्रपापवियुतबुधाः) निर्बलाः स्युः नपुसंकौ ग्रहौ (शनिबुधौ) केन्द्रस्थाने (१.४.७.१० स्थानेषु) भवेताम् तदा मनुष्येतरप्राणिनः जन्म तत्सम्बन्धीप्रश्नो वा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चिन्ता वा प्राश्निकस्य मनसि वाच्या। अथवा चन्द्रः पापग्रहद्वादशांशे भवेत्, शुभग्रहाः निर्बलाः बुधः शनिर्वा लग्नलग्नम्श्येत्तदा वियोनिचिन्ता वाच्या। अत्र चन्द्रस्य द्वादशांशचक्राधिष्ठितराशिवशात् जीवानाम् (वियोनीनाम्) विभागाः अपि श्री कल्याणवर्मणा विचारिताः यथा – (२)

क्रूरैः सुबलसमेतैर्निर्बलैः सौम्यैर्वियोनिभागगते।
चन्द्रे ज्ञशनी केन्द्रे तदीक्षिते चोदये वियोनिः स्यात्॥

मेषे शशी तंदशे छायादिप्रसवमाहुराचार्याः।
गोमहिषीणां गोंऽशे नररूपाणाम् तृतीयोंऽशे॥

तत्र चतुर्थे भागे कूर्मादीनाम् भवेदुदकजानाम्।
व्याघ्रादीनाम् परतः परतो ज्ञेयं नराणाञ्च॥

वणिगंशे नररूपा वृश्चिकभागे तथा भुजङ्गाद्याः।
खरतुरगाद्या नवमे मृगशिखिनां स्यात्तथा दशमे॥

ज्ञेयाश्च तत्र विविधाः वृक्षास्तृणजातयश्चित्राः।
एकादशे च पुरुषा जलजा नानाविधाश्चान्त्ये॥

अत्र स्पष्टार्थः - चन्द्रमा मेषद्वादशांशे भवेत्तर्हि छागमेषादिजनितप्रश्नः, वृष द्वादशांशे गोमहिष्यादिजनितप्रश्नः, मिथुनद्वादशांशे नररूपाणां वानरादीनां प्रश्नः, कर्कद्वादशांशे कच्छपादिजलचरजन्तूनां विषये प्रश्नः, सिंहद्वादशांशे व्याघ्रादीनां चिन्ता, कन्याद्वादशांशे नराणास्त्रीणां वा विषये प्रश्नः, तुलाद्वादशांशे चन्द्रे नराकारचिन्ता, वृश्चिकद्वादशांशे चन्द्रे भुजंगवृश्चिकादि विषजन्तूनां चिन्ता, धनुद्वादशांशे खरतुरगादिप्रश्नः, मकरद्वादशांशे मृगादिवन्यजीवप्रश्नः शिखिनः वृक्षास्तृणजातयश्चित्राः मयूरादिचिन्ता च ज्ञेया, कुंभद्वादशांशे मनुष्यविषयकप्रश्नः, मीनद्वादशांशे च जलजजीवाः मीनविशेषाः समुत्पद्यन्ते, तेषाम् च सम्बन्धे प्रश्नो वा वाच्यः। इत्थम् चन्द्रोपगद्विरसभागेन अर्थात् चन्द्राधिष्ठितद्वादशांशेन जीवस्य स्वरूपम् जातिर्वा ज्ञातुं शक्यते

अत्र प्रकारान्तरेण वियोनिजन्मज्ञाने योगान्तरमुच्यते बृहज्जातकात् –

पापाः बलिनः स्वभागगाः पारक्ये विबलाश्च शोभनाः।
लग्नं च वियोनिसंज्ञकम् दृष्ट्वात्रापि वियोनिमादिशेत्॥

स्पष्टार्थः

बलिनः पापग्रहाः स्वनवांशे भवेयुः, निर्बलाः शुभग्रहाः परनवांशे भवेयुः तत्र वियोनिसंज्ञकलग्नेषु (मेषे,वृषे,सिंहे,वृश्चिके,धनुषः उत्तरार्धे, मकरस्य पूर्वार्धे मीने च) किमपि लग्नम् स्यात् चन्द्रश्च यादृशस्य वियोनिसंज्ञकस्य राशेः द्वादशांशे भवेत् तत्सदृशवियोनिजन्म, तज्जनितचिन्ता वा प्रश्ने वक्तुं शक्यते। वियोनि (मनुष्येतरजीवचिन्ताजनितयोगे) वर्णज्ञानम्, चतुष्पदजीवेषु च राशिवशेन अङ्गविभागाः तेषाम् च विभिन्नाङ्गेषुव्रण चिन्हादिनिर्देशोऽपि प्रश्नविद्याप्रवीणेन कर्तुं शक्यते तदर्थम् निम्नविषयाः तत्तद्सहायकग्रन्थेभ्यः भवद्भिः अभ्यसनीयाः-

वियोनि वर्ण निर्देशः -

लग्नांशकाद् ग्रहयोगेक्षणाद्वा वर्णान्वदेद् बलयुक्ताद् वियोनौ।
दृष्टया समानान् प्रवदेच्च संख्यया रेखां वदेत्स्मरसंस्थैश्च पृष्ठे॥

चतुष्पदानाम् जीवानां राशिवशेनाङ्गविभागाः –

क्रियः शिरो वक्त्रगलो वृषो ऽन्ये पदांसके पृष्ठमुरोऽथ पार्श्वे।
कुक्षिस्त्वपानांघ्र्यथमेढ्रमुष्कौ स्फिक् पुच्छमित्याह चतुष्पदाङ्गे॥

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पक्षिजन्मज्ञानम् –

खगे दृक्काणे बलसंयुतेन वा ग्रहेण युक्ते चरभांशकोदये।
बुधांशके वा विहगाः स्थलाम्बुजाः शनैश्चरेन्द्वीक्षणयोगसंभवाः॥

स्पष्टार्थः

मौष्टिकादिप्रश्ने हृद्गतप्रश्नविचारे वा प्रश्नलग्ने यो ग्रहः तस्य यो हि वर्णः, **"वर्णास्ताम्रसितातिरक्तहरितव्यापीतचित्रासिता"** सूर्यादिक्रमेण प्रोक्तः सो हि वर्णः तस्य वियोनिसंज्ञकजीवविशेषस्य वक्तव्यः। लग्ने ग्रहाभावे लग्ने सर्वाधिकदृष्टिवतः ग्रहवर्णः वक्तव्यः। लग्ने ग्रहोऽपि न स्यात् दृष्टिरपि न भवेत् तर्हि लग्ने यस्य राशेः नवांशः तस्य यो हि वर्णः **"रक्तः श्वेतः शुकतनुनिभः पाटलो धूमपाण्डुश्चित्रः कृष्णः कनकसदृशः पिङ्गलः कर्बुरश्च बभ्रुः स्वच्छः प्रथमभवनाद्येषु वर्णाः"** मेषादिक्रमेण प्रोक्ताः वर्णाः जीवविशेषस्य वाच्याः। तत्रापि सर्वाधिकबली ग्रहस्य वर्णः सर्वाधिकः, सप्तमस्थग्रहस्य ग्रहेषु वा बलिनः वर्णस्य रेखा जन्तोः पृष्ठोपरि वक्तव्या। इत्थम् जीवचिन्तायाम् वर्णं विज्ञाय चतुष्पदादिजीवानामङ्गे व्रणोपघातादिजन्यचिन्तायाम् (प्रश्ने) कालपुरुषाङ्गेषु द्वादशराशीनाम् स्थापनावत् चतुष्पदाङ्गेऽपि राशिन्यासं कृत्वा व्रणोपघातादिविचारः कर्तुम् शक्यते। तस्यापि स्पष्टार्थः यथा – चतुष्पदजीवानाम् आकारं निर्माय तस्य शिरसि मेषः, मुखे कण्ठे वा वृषभः, अग्रिमपादे स्कन्धे च मिथुनम्, पृष्ठे कर्कः, उरसि सिंहः, पार्श्वद्वये कन्या, कुक्षिद्वये तुला, गुदायां वृश्चिकः, पृष्ठपादे धनुः, लिङ्गे ऽण्डकोशद्वये च मकरकुम्भौ पुच्छे च मीन राशिः स्थाप्यः। अत्र चतुष्पदाङ्गेषु राशिन्यासः उपलक्षणमात्रमेव, पक्षिजन्मज्ञाने पक्षिजनितचिन्तायामपि एष राशिन्यासः यथाङ्गम् कर्तुं शक्यते। तेन पक्षिजनितचिन्तायाम् प्रश्ने वा तेषामपि अङ्गेषु व्रणोपघातादयः चिन्तयितुम् शक्यन्ते। तत्र **प्रसंगात् पक्षिजन्मज्ञानस्य प्रकारः** – प्रश्नलग्ने पक्षीसंज्ञकद्रेष्काणे (सिंहकुम्भयोः प्रथमः द्रेष्काणः, तुलामिथुनयोः द्वितीयः द्रेष्काणः) स्थिते तत्र शनिचन्द्रयोः युतिः दृष्टिर्वा लग्ने स्यात् पक्षिजन्म, तज्जाचिन्ता वा ज्ञेया।' प्रथमो योगः।

अथवा लग्ने चरराशि (मेषकर्कतुलामकराणाम्) नवांशः भवेत् शनिचन्द्रयोः युतिर्वा दृष्टिः स्यात् तर्हि पक्षिजन्म चिन्ता वा वक्तव्या (द्वितीयो योगः)।

एषु योगत्रयेषु अपि पक्षी जलचरः, स्थलचरो वा अस्य ज्ञानम् लग्ने यदि शनि युतिः दृष्टिर्वा भवेत् तर्हि स्थलचरः पक्षी, चन्द्रयोगेन दृष्टया वा जलचरपक्षिजन्म तज्जनितचिन्ता वा वक्तव्या।

इत्थमस्माभिः अन्य ग्रन्थेभ्यः आकृष्य भवताम् विषयेऽस्मिन् ज्ञानसंवर्धनाय विषयोऽयं विस्तरीकृतः। तत्तद्ग्रन्थानाम् साहाय्येन भवद्भिः ज्ञानमिदम् विस्तरणीयम्। अधुना एषु योगेषु आवश्यकत्वात् नवांशज्ञानविधिः , द्वादशांशज्ञानविधिः द्रेष्काणज्ञानविधिश्च निर्दिश्यते।

४.३.३ नवांशज्ञानविधिः

अये विद्यार्थिन्! भवद्भिः प्रश्नभूषणस्य अस्मिन् मौष्टिकादिप्रश्नाध्याये प्रथमे श्लोके एव **"स्वांशगः खेचरः स्वांशमङ्गे यदा धातुचिन्ता"** अथ च **"अन्यभागस्थितो जीवचिन्ता परांशोपगः अन्यभागे मूलचिन्ता"** इति पठितम्। अस्य प्रायोगिकरूपेण उदाहरणबोध नात्प्राक् नवांशविधिः अवश्यमेव विज्ञेयः। तद्यथा – **"अजमृगतौलिचन्द्रभवनादिनवांशविधिः"** **अस्य स्पष्टार्थः** – मेषादिराशिषु क्रमशः प्रथमनवांशः मेष (अज), (मृग) मकर, तुला (तौलि) कर्क (चन्द्रभवनम्) राशीनाम् भवन्ति। एकः नवांशः = $\frac{\text{एकराशिः}}{9} = \frac{30\text{अंशाः}}{9}$

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

= $(3^0)-20^1$, अंशत्रयम् विंशतिकलाः। इत्थम् मेषराशौ प्रथम नवांशः मेषस्य, द्वितीयः वृषस्य, तृतीयः मिथुनस्य , चतुर्थः कर्कस्य, पञ्चमः सिंहस्य, षष्ठः कन्यायाः, सप्तमः तुलायाः, अष्टमः वृश्चिकस्य, नवमः धनुषः, इत्थम् नवनवांशाः। अत्र मेषराशौ प्रथमः नवांशः मेषराशेः अधिपस्य भौमस्य स्वांश एव। अष्टमः नवांशः वृश्चिकोऽपि वृश्चिकस्य भौमस्य स्वराशिः, अतः एष नवांश अपि स्वांश एव, इत्थमवधेयम्। एवमेव अग्रे वृषराशौ प्रथमः नवांशः मकरस्य यतो हि मेषे अन्तिमः (नवमः) नवांशः धनुषः आसीत् अतः मेषतः अग्रिमराशौ वृषे प्रथमः मकरस्य जातः। द्वितीयः कुंभस्य , तृतीयः मीनस्य, चतुर्थः मेषस्य, पञ्चमः वृषस्य, षष्ठः मिथुनस्य, सप्तमः कर्कस्य, अष्टमः सिंहस्य, नवमः कन्यायाः अग्रे मिथुनराशौ प्रथमः नवांशः तुलायाः, द्वितीयः वृश्चिकस्य ..... नवमश्च मिथुनस्य जातः, इतोऽग्रे कर्कराशौ प्रथमः कर्कस्य, द्वितीयः सिंहस्य, तृतीयः कन्यायाः , ... नवमश्च मीनस्य नवांशो भवति। इत्थमेव अग्रे सिंहकन्यातुलावृश्चिकराशीनामपि नव नव नवांशाः क्रमशः अज मृगतौलिचन्द्रभवनादिनवांशविधि ना विज्ञेयाः, पुनश्च अग्रे धनुमकरकुंभमीनेष्वपि एष विधिः भवति। एकनवांशस्य समाप्तिः प्रतिराशौ 3^0-20^1 पुनः द्वितीयः ६° - ४०, तृतीयश्च १० अंशेषु समाप्यते चतुर्थः १३°-२०' पञ्चमः १६°-४०' षष्ठः २०°-०० सप्तमः २३°-२०' अष्टमः २६°-४० नवमश्च ३०° अंशे समाप्यते अस्य स्पष्टरूपेण ज्ञानम् निम्नचक्रेण भवितुमर्हति।

राशिषु नवांशक्रमस्य स्पष्टरूपेण ज्ञानम् नवांशोदाहरणं चक्रेण भवितुमर्हति।

उदाहरणम् –

लग्नम् २ रा. २० अं. १० क. २० वि. विद्यते। अत्र नवांशज्ञानम् अभीष्टम्। अत्र लग्ने राशिद्वयम् व्यतीतम्, अग्रिम राशेः मिथुनस्य २० अंशे १० कलायाम् २० विकलायाम् लग्नम् वर्तमानम्।

भवन्तः जानन्त्येव यत् एकः नवांशः ३°-२०' भवति अत्र निम्प्रदत्तं लग्नस्पष्टे षड्नवांशाः व्यतीताः सप्तमः नवांशः वर्तमानः यो हि २३°-२०' यावत् चलिष्यति। लग्नस्य वर्तमानराशिमिथुने सप्तमः नवांशः वर्तमानः। मिथुनराशौ नवांशक्रमः तुलाराशितः प्रारभ्यते तुलाराशितः गणनायाम् सप्तमः नवांशः मेषस्य भवति अतः मिथुनलग्ने मेषनवांशः अतो ऽत्र नवांशकुण्डल्याम् लग्ननवांशानुसारम् लग्नस्थाने मेषम् स्थाप्य नवांशकुण्डलीचक्रे अन्ये ग्रहाः ग्रहस्पष्टानुसारम् नवांशान् विज्ञाय स्थाप्याः। तत्र ग्रहस्पष्टाः सन्ति –

ग्रहाः	रा.	अं.	क.	वि.
सूर्यः	१०	१८	२६	१३
चन्द्रः	६	९	२२	०६
भौमः	१०	११	१०	१७
बुधः	१०	०	०	५६
गुरुः	७	१६	२४	२४
शुक्रः	११	१६	३७	४१
शनिः:	६	१०	३४	२४
राहुः	२	७	०	५

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

केतुः	८	७	०	५
लग्नस्पष्टम्	२	२०	१०	२०

नवांशकुण्डलीचक्रम्



विशेषः

स्वांशस्थो ग्रहः केवलं शनिः अन्ये ग्रहाः अन्यभागगाः।

इत्थमवधेयम्। स्वभागगः स्वांशगः खेचरः स्वांशमङ्के न पश्यति। अत्र भौमः एतादृशः ग्रहः यो हि परनवांशे स्थितः परन्तु स्वनवांशयुतलग्नम् पश्यति अतः **"अन्यभागस्थितो जीवचिन्ता तत"** इति नियमेन प्राश्निकस्य मनसि जीवचिन्ता वर्तते ।

४.३.४ द्वादशांशज्ञानविधिः

तत्र भवद्भिः अन्यग्रन्थाधारेण सहायकग्रन्थानामध्यनेन इदम् तु ज्ञातमेव यत् वराहमिहिरः वृहज्जातके अन्ये च कल्याणवर्मादयः आचार्याः जीवम् मूलञ्च वियोनिजन्माध्याये विशेषतया विवेचितवन्तः। अत्र कारणमस्ति यत् वृक्षवनस्पत्यादिषु अपि जीवस्य सत्ता स्वीक्रियते। धात्वादयः जडपदार्थाः जीवो मूलश्च चेतनपदार्थाः सन्ति। अत्र जीवः विशेषरूपेण चैतन्यः। तदपेक्षया मूलः प्रत्यक्षतया जीवान्न्यूनः। परन्तु कल्याणवर्मणा वियोन्यन्तर्गतमेव उभयमपि स्वीकृतम् यथा – वियोनिज्ञाने विशेषकथनम् –

उद्भिज्जरायुजानां तथैव सस्वेदजाण्डजानां च।
प्रसवं व्यस्तसमस्तं ग्रहयोगैर्लक्षणैर्वक्ष्ये॥

तथा च – विशेषरीत्या वियोनिजन्मज्ञाने विशेषोऽपि तत्र निर्दिष्टः –

इह तु द्वादशभागे राशौ राशौ प्रचोदितः पूर्वम्।
जनयन्ति ते वियोनिंयाता बलिभिः शशाङ्करविलग्ने॥

वराहवचनानुसारम् – **"चन्द्रोपगद्विरसभागसमानरूपम् सत्त्वम् वदेत्"**

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इत्यादि पूर्वोद्धृतश्लोके चन्द्रस्य द्वादशांशे स्थितिवशात् जीवचिन्तायाः प्रश्ने सत्त्वस्य (प्राणिनः) निर्णयो भवति। अतः द्वादशांशज्ञानम् भवताम् कृते आवश्यकत्वान्निर्दिश्यते। तत्र सूत्रमस्ति – **"भवनसमांशकाधिपतयः स्वगृहात्क्रमशः"** प्रत्येकस्मिन् राशौ द्वादशद्वादशांशाः भवन्ति। अत्र $\frac{1 \text{ राशि}}{12} = \frac{30 \text{ अंशाः}}{12}$ = 2 अं. 30 क. मानमेकस्य द्वादशांशस्य भवति। क्रमः मेषराशौ मेषतः मीनान्तरम्, वृषराशौ वृषतः मेषान्तम्, मिथुनराशौ मिथुनतः वृषान्तम्, कर्कराशौ कर्कतः मिथुनान्तम् इत्यादि नियमेन द्वादशांशाः विज्ञेयाः शेषम् चक्रेण स्पष्टम् –

उदाहरणम् –

कल्प्यते चन्द्रस्पष्टम् अस्ति १०-२° -१०° - ३०^{११} अत्र चन्द्रमा कुम्भराशौ वर्तते। तत्र एकस्य द्वादशांशस्य मानम् भवति २° - ३०^{१} अतः चन्द्रमा २° - १०^{१} - ३०^{११} वर्तमानत्वात् प्रथमे एव द्वादशांशे वर्तते अतः चन्द्रमा कुम्भराशेः द्वादशांशे विद्यते। पूर्वनिर्दिष्टसारावलीग्रन्थोद्धृतश्लोकानुसारम् "एकादशे (कुंभराशौ) च पुरुषा" इत्युक्त्या जीव चिन्तनेऽपि पुरुषविषये विचारः प्रश्नो वा प्राश्निकस्य मनसि वर्तते इति निश्चतेव्यम्।

अत्र विशेषः – अत्र पूर्वश्लोकानुसारम् **"अन्यभागस्थितो जीवचिन्ता"** इति सूत्रेण परभाग (नवांश) स्थः ग्रहः स्वांशमङ्गं त्रिकोणस्थं पश्येत् तदा जीवचिन्ता अस्तीति निश्चये जाते चन्द्रोपगद्विरसभागसमानरूपम् सत्त्वं दैवज्ञः वदेदिति दिक्।

एवमेव जीवचिन्तानिश्चये जाते द्रेष्काणवशेन पक्षिजन्मविषये चिन्तादिकम् भवतीति पूर्वं निर्दिष्टम् तदर्थम् द्रेष्काणज्ञानमपि भवितव्यमिति द्रेष्काणज्ञानम् निरूप्यते।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नवांशचक्रम्

अंशाः	मेषः	वृषः	मिथुनः	कर्कः	सिंहः	कन्याः	तुला	वृश्चिकः	धनुः	मकरः	कुम्भः	मीनः
३।२०	मेषः	मकरः	तुला	कर्कः	मेषः	मकरः	तुला	कर्कः	मेषः	मकरः	तुला	कर्कः
६।४०	वृषः	कुम्भः	वृश्चिकः	सिंहः	वृषः	कुम्भः	वृश्चिकः	सिंहः	वृषः	कुम्भः	वृश्चिकः	सिंहः
१०।००	मिथुनः	मीनः	धनुः	कन्याः	मिथुनः	मीनः	धनुः	कन्याः	मिथुनः	मीनः	धनुः	कन्याः
१३।२०	कर्कः	मेषः	मकरः	तुला	कर्कः	मेषः	मकरः	तुला	कर्कः	मेषः	मकरः	तुला
१६।४०	सिंहः	वृषः	कुम्भः	वृश्चिकः	सिंहः	वृषः	कुम्भः	वृश्चिकः	सिंहः	वृषः	कुम्भः	वृश्चिकः
२०।००	कन्याः	मिथुनः	मीनः	धनुः	कन्याः	मिथुनः	मीनः	धनुः	कन्याः	मिथुनः	मीनः	धनुः
२३।२०	तुला	कर्कः	मेषः	मकरः	तुला	कर्कः	मेषः	मकरः	तुलाः	कर्कः	मेषः	मकरः
२६।४०	वृश्चिकः	सिंहः	वृषः	कुम्भः	वृश्चिकः	सिंहः	वृषः	कुम्भः	वृश्चिकः	सिंहः	वृषः	कुम्भः
३०।००	धनुः	कन्याः	मिथुनः	मीनः	धनुः	कन्याः	मिथुनः	मीनः	धनुः	कन्याः	मिथुनः	मीनः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्वादशांश ज्ञानचक्रम्

अंशाः	मेषः	वृषः	मिथुनः	कर्कः	सिंहः	कन्याः	तुला	वृश्चिकः	धनुः	मकरः	कुम्भः	मीनः
२।३०	मेषः	वृषः	मिथुनः	कर्कः	सिंहः	कन्याः	तुला	वृश्चिकः	धनुः	मकरः	कुम्भः	मीनः
५।००	वृषः	मिथुनः	कर्कः	सिंहः	कन्याः	तुला	वृश्चिकः	धनुः	मकरः	कुम्भः	मीनः	मेषः
७।३०	मिथुनः	कर्कः	सिंहः	कन्याः	तुला	वृश्चिकः	धनुः	मकरः	कुम्भः	मीनः	मेषः	वृषः
१०।००	कर्कः	सिंहः	कन्याः	तुला	वृश्चिकः	धनुः	मकरः	कुम्भः	मीनः	मेषः	वृषः	मिथुनः
१२।३०	सिंहः	कन्याः	तुला	वृश्चिकः	धनुः	मकरः	कुम्भः	मीनः	मेषः	वृषः	मिथुनः	कर्कः
१५।००	कन्याः	तुला	वृश्चिकः	धनुः	मकरः	कुम्भः	मीनः	मेषः	वृषः	मिथुनः	कर्कः	सिंहः
१७।३०	तुला	वृश्चिकः	धनुः	मकरः	कुम्भः	मीनः	मेषः	वृषः	मिथुनः	कर्कः	सिंहः	कन्याः
२०।००	वृश्चिकः	धनुः	मकरः	कुम्भः	मीनः	मेषः	वृषः	मिथुनः	कर्कः	सिंहः	कन्याः	तुला
२२।३०	धनुः	मकरः	कुम्भः	मीनः	मेषः	वृषः	मिथुनः	कर्कः	सिंहः	कन्याः	तुला	वृश्चिकः
२५।००	मकरः	कुम्भः	मीनः	मेषः	वृषः	मिथुनः	कर्कः	सिंहः	कन्याः	तुला	वृश्चिकः	धनुः
२७।३०	कुम्भः	मीनः	मेषः	वृषः	मिथुनः	कर्कः	सिंहः	कन्याः	तुला	वृश्चिकः	धनुः	मकरः
३०।००	मीनः	मेषः	वृषः	मिथुनः	कर्कः	सिंहः	कन्याः	तुला	वृश्चिकः	धनुः	मकरः	कुम्भः

४.३.५ द्रेष्काणज्ञानविधिः

खगसंज्ञकद्रेष्काणविषये ज्ञानमभीष्टमस्ति – यतो हि **" खगे दृकाणे बलसंयुतेन वा ग्रहेण युक्ते चरभांशकोदये। बुधांशके वा विहगाः स्थलाम्बुजाः शनैश्चरेन्द्वीक्षणयोग संभवाः"** इत्यादि श्लोके लग्ने खगसंज्ञकद्रेष्काणे स्थिते सति पक्षिणां जन्म वाच्यम् , पक्षिजनितप्रश्नो वा मनसि वर्तते एतद् ज्ञानम् भवितुम् अर्हति। तत्र बृहज्जातके पक्षिसंज्ञकद्रेष्काणस्वरूपे उक्तमस्ति –

सिंहराशेः (पक्षिसंज्ञक) प्रथमद्रेष्काणस्वरूपम् –

शाल्मलेरुपरि गृध्रजम्बुकौ श्वा नरश्च मलिनाम्बरावृतः।
रौति मातृपितृविप्रयोजितःसिंहरूपमिदमाद्यमुच्यते॥

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कुम्भराशेः (पक्षि संज्ञक) प्रथमद्रेष्काणस्वरूपम् –
स्नेहमद्य जलभोजनागमव्याकुलीकृतमनाः सकम्बलः।
कोशकारवसनो ऽजिनान्वितो गृध्रतुल्यवदनो घटादिगः॥

मिथुनराशेः (पक्षिसंज्ञक) द्वितीयद्रेष्काणस्वरूपम् –
उद्यानसंस्था कवची धनुष्माम्छूरोऽस्त्रधारी गरुडाननश्च।
क्रीडात्मजालंकरणार्थचिन्तां करोति मध्ये मिथुनस्य राशेः॥

तुलाराशेः (पक्षिसंज्ञक) द्वितीयद्रेष्काणस्वरूपम् –
कलशं परिगृहय विनिष्पतितुम् समभीप्सति गृध्रमुखः पुरुषः।
क्षुधितस्तृषितश्च कलत्रसुतान् मनसैति तुलाधरमध्यगतः॥

एते द्रेष्काणाः पक्षिसंज्ञकद्रेष्काणाः। एतेषाम् स्वरूपम् एकम् विशिष्टम् प्रयोजनम् धारयति। अस्यार्थस्य अत्र प्रयोजनम् नास्ति केवलम् स्वरूपेषु क्रमेशः "गृध जम्बुको" "गृध्रतुल्यवदनो" "गरूडाननश्च" "गृध्रमुखः पुरुषः" इत्यादिपदानाम् प्रयोगात् एते द्रेष्काणाः पक्षिसंज्ञकद्रेष्काणाः सन्तीति निदर्शनार्थम् उद्धरणरूपेण श्लोकाः प्रदत्ताः। एतेषामर्थमवगन्तुम् बृहज्जातकादयः ग्रन्थाः अध्येयाः। अधुना अस्योदाहरणम् प्रदीयते।

द्रेष्काणज्ञाने सूत्रमस्ति – **"स्वर्क्षसुतनवमभेशाः द्रेष्काणानाम्"**

एकराशौ 10 - 10 अंशानाम् द्रेष्काणत्रयम् भवति। प्रथमः द्रेष्काणः स्वर्क्षस्य अर्थात् तस्यैव राशेः, द्वितीयः द्रेष्काणः सुतस्य अर्थात् तस्मात् पञ्चमराशेः। तृतीयः द्रेष्काणः तस्मात् नवमराशेः। प्रथमः दशमांशम् यावत्, द्वितीयः विंशत्यांशान्तम् तृतीयश्च त्रिंशदंशपर्यन्तम्। इत्थम् द्रेष्काणत्रयम् प्रत्येकस्मिन् प्रत्येकस्मिन् राशौ भवन्ति यथा चक्रेण स्पष्टम् –

मेषादिराशिषु द्रेष्काणज्ञानचक्रम्

राशयः अंशाः	मेषः	वृषः	मिथुनः	कर्कः	सिंहः	कन्या	तुला	वृश्चिक	धनुः	मकर	कुम्भ	मीनः
0 तः 10	मेषः	वृषः	मिथुनः	कर्कः	सिंहः	कन्या	तुला	वृश्चिक	धनुः	मकर	कुम्भः	मीनः
11 तः 20	सिंहः	कन्या	तुला	वृश्चिक	धनु	मकरः	कुंभः	मीनः	मेषः	वृषः	मिथुनः	कर्कः
21 तः 30	धनुः	मकरः	कुंभः	मीनः	मेषः	वृषः	मिथुनः	कर्कः	सिंहः	कन्या	तुला	वृश्चिक

उदाहरणम्

जीवचिन्तेति निश्चये जाते लग्नस्पष्टम् पक्षिसंज्ञकद्रेष्काणे (सिंहकुंभयोः प्रथमे तुलामिथुनयोः द्वितीये) स्यात् शनिचन्द्रयोः दृष्टिः युतिर्वा लग्ने भवेत् तदा पक्षिजनित चिन्तायोगः, पक्षिजन्म वा वाच्यम्। अत्र कल्प्यते लग्नस्पष्टम् राश्यादिकम् अस्ति 4 - 8 - 10 - 11 अत्र सिंहराशौ प्रथमः द्रेष्काणः वर्तते। अर्थात् लग्ने यदि पक्षिसंज्ञकद्रेष्काणः तर्हि पक्षिजन्म, पक्षिजनितचिन्ता वा मनसि वर्तते इति वक्तुम् शक्यते।

यथोदाहरणम् –

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



अत्र बुधस्पष्टमस्ति १० - ११ - २०-३० अत्र बुधः शनिनवांशे अन्यभागस्थितः वर्तते। लग्ने ४ - ८ - १० - ११ राश्यादिके सिंहराशौ तृतीयनवांशः मिथुननवांशः अर्थात् मिथुनाधिपतेः बुधस्य नवांशः वर्तते अतोऽत्र **"अन्यभागस्थितः स्वांशमङ्गे पश्यति"** अतः जीवचिन्ता। तत्रापि लग्ने शनिचन्द्रयोः दृष्टिः वर्तते। लग्नम् च सिंहस्य प्रथमे द्रेष्काणे स्थितत्वात् पक्षिसंज्ञकद्रेष्काणे, अतः पक्षिजन्म, तज्जनितप्रश्नो वा अस्तीति वक्तुम् शक्यते।

४.३.६ त्रिकोणादिसंज्ञाः

भवन्तः पूर्वम् श्लोके पठितवन्तः यत् **"धातुचिन्ता त्रिकोण ऽथवा"** अत्र त्रिकोणम् किम् इति जिज्ञासायाः समाधानप्रसङ्गात् द्वादशभावानाम् केन्द्रत्रिकोणपणफरआपोक्लिमत्रित्रिकोण- चतुरस्रादिसंज्ञाः ग्रन्थान्तरादाकृष्य निर्दिश्यन्ते।

संज्ञान्तराणि –

संज्ञा वेश्माष्टमयोश्चतुरस्रम् वै तपश्च नवमस्य।
होरास्तदशजलानां चतुष्टयं कण्टकं केन्द्रम्॥

चतुर्थ दशमयोः नामान्तराणि

नामानि चतुर्थस्य तु सुखजलपातालबन्धुहिबुकानि।
कर्माज्ञामेषूरणगमनाख्यं कीर्त्यते दशमम्॥

सप्तमपञ्चमनवानां नामान्तराणि

धर्मसुततयोस्त्रिकोणम् सुतस्य धीस्त्रित्रिकोणमिति तपसः।
द्यूनं जायास्तमयम् जामित्रम् सप्तमस्याख्याः॥

षष्ठतृतीयद्वादशद्वितीयानां नामान्तराणि

षट्कोणम् रिपुभवनं तृतीयम् कीर्तयन्ति दुश्चिक्यम्।
रिःफम् द्वादशभवनम् द्वितीयसंज्ञकम् कुटुम्बं च॥

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पणफरआपोक्लिमसंज्ञा

केन्द्रात्परम् पणफरम् आपोक्लिमसंज्ञितम् तयोः परतः।

भावानामुपचयानुपचयसंज्ञाः

षट्दशभवदुश्चिक्यान्युपचयसंज्ञानि कीर्त्यन्ते।
स्वतनुसुखसुतास्ततपश्छिद्रव्ययसंज्ञितानि चान्यानि॥

स्पष्टार्थाः (१)

चतुर्थभावसंज्ञाः = सुखम्, जलम्, पातालः, बन्धुः, हिबुकः।

दशमभावसंज्ञाः = कर्म, आज्ञा, मेषूरणम्, गगनम् ।

त्रिकोणम् = नवमपञ्चमभावः (धर्मसुतयोः)।

त्रित्रिकोणम् = नवमः भावः (तपसः)।

केन्द्रस्थानानि = १ - ४ - ७ - १० (होराजलास्तदशमानाम्)

सुतस्य = धीः (पञ्चमभावः)

द्यूनम् = जाया (सप्तमभावः)

षष्ठभावः = षट्कोणम् , रिपुभवनम्

तृतीयभावः = दुश्चिक्यम्

द्वादशभवनम् = रिःफम्

द्वितीयभावः = कुटुम्बम्

पणफरम् = केन्द्रात्परम् (२ - ५- ८ - ११)

तयोः परतः आपोक्लिमम् = (३ - ६ - ९ - १२)

उपचयभावाः = ३ - ६ - १० - ११ भावाः

अनुपचयभावाः = १ - २ - ४ - ५ - ७ - ८ - ९ - १२ भावाः

चतुरस्रम् = चतुर्थाष्टमम् (४- ८ भावौ)

एतासाम् संज्ञानाम् प्रयोगस्यावश्यकता प्रश्नशास्त्रे पदे पदे भवति अतः एतासाम् ज्ञानमनिवार्यमिति दिक्। अधुना स्पष्टरूपेण प्रथमश्लोकोक्तविषयस्य सोदाहरणम् धातुमूलजीव चिन्तनम् क्रमशः प्रस्तूयते।

४.३.६ धातुचिन्तायोगः

स्वांशगः खेचरः स्वांशमंगे यदा धातुचिन्ता त्रिकोणे ऽथवा ऽलोकयेत्॥

अस्य स्पष्टार्थः अस्ति यत् प्रश्नकुण्डल्याम् स्वनवांशस्थः ग्रहः, लग्ने वर्तमानम् स्वनवांशम् पश्येत् तदा धातुचिन्ता, यदि लग्ने न पश्येत् लग्ने स्वांशो वा न भवेत् तर्हि त्रिकोणेपञ्चमे नवमे वा स्थितम् स्वांशम् पश्येत् तदा धातुचिन्ता प्राशिनकस्य मनसि चिन्तनीया। अत्र धातुचिन्ताकारकाः ग्रहाः शनिचन्द्र-राहु भौमाः सन्ति। अतोऽत्र उदाहरणत्रयम् (स्वांशगः खेचरः) क्रमशः स्वांशमंगे, स्वांशम् पञ्चमे (त्रिकोणे) स्वांशम् नवमे (त्रिकोणे)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पश्येत् तदा धातुचिन्ता, एतेषाम् धातुजीवमूलानां उदाहरणानि प्रदर्श्यन्ते। लग्नस्पष्टम् ० - २ - १०- २० अत्र मेष लग्नम्। नवांशे ऽपि मेषलग्नम्। धातुचिन्ताकारकाः चत्वारः ग्रहाः शनिचन्द्रराहुभौमाः भवन्ति अतः भौमोदाहरणम्। भौमः मकरराशौ अवस्थितः तस्य राश्यादिस्पष्टम् ९ - १२ - १० - ०० अत्र भौमः मकरराशौ चतुर्थे नवांशे ऽवस्थितः। मकरे चतुर्थः नवांशः मेषस्य अर्थात् स्वांशगः भौमः लग्नस्थितम् स्वांशम् चतुर्थदृष्टया (विशेषपूर्णदृष्टया) पश्यति अतः धातुचिन्ता। तत्र भौमेन हेमधातोः, (धाम्यधातोः) चिन्ता प्राश्निकस्य मनसि वक्तुं शक्यते।

---

1. सारावली , अ. 3 , श्लो 28 तः 33 यावत्

प्रश्नकुण्डलीचक्रम्



४.३.७ जीवचिन्तायाः उदाहरणम्

सूत्रमस्ति (**अन्यभागस्थितः स्वांशमगे त्रिकोणे वा आलोकयेत्**)

अत्र पञ्चमभावे स्पष्टमस्ति ४ - २९ - १० - २० तत्र सिंहराशौ नवांशः नवमः गुरोः नवांशः। गुरु स्पष्टम् अस्ति १० - २१- १० - २०

अत्र पञ्चमभावे सिंहराशिः तत्र सिंहराशौ नवमः नवांशः गुरोः (धनुराशेः) विद्यते। गुरुस्पष्टम् अस्ति मेषराशौ २१ अंशे अर्थात् मेषराशौ सप्तमः नवांशः तुलायाः वर्तते अर्थात् शुक्रस्य नवांशः अतः गुरुः अन्यभागगतः त्रिकोणे (पञ्चमे) स्थितम् स्वांशम् स्वनवांशम् (धनुराशेः नवांशम्) पञ्चमविशेषपूर्णदृष्टया पश्यति अतः **"अन्यभागस्थितो जीवचिन्ता तदा"** इति नियमेन जीवचिन्ता प्राश्निकस्य मनसि विद्यते इति वक्तुं शक्यते।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रश्नकुण्डली



४.३.८ मूलचिन्तायाः उदाहरणम्

सूत्रमस्ति **"मूलचिन्ता ऽन्य भागम् परांशोपगः"** इति नियमेन अन्यभागगः ग्रहः अन्यभागगतम् लग्नं त्रिकोणम् नवमम् पञ्चमम् वा पश्येत् तदा मूलचिन्ता भवति अत्र **"सवितृभार्गवौ मूलम्"** । सूर्यस्पष्टम् राश्यादिकम् 2 - 2 - 10 - 20 अस्ति। अत्र सूर्यः मिथुनराशौ प्रथमनवांशे तुलायाः नवांशे विद्यते। अतः सूर्यः परांशोपगः अस्ति। नवमभावे धनुराशिः तत्र राश्यादिकम् स्पष्टम् अस्ति 8 - 2 - 10 - 20 धनुराशेः प्रथमः नवांशः मेषस्य वर्तते। अतः नवमभावे मेषनवांशः। अर्थात् अन्यभागः तत्रास्ति अतः सूर्यः परांशगः सन् तृतीये स्थित्वा नवमभावम् त्रिकोणस्थम् अन्यभागम् पश्यति। अतः **"मूलचिन्ता ऽन्यभागम् परांशोपगः लग्नस्थम् त्रिकोणस्थम् वा पश्यति"** अनेन नियमेन मूलचिन्ता प्राश्निकस्य मनसि विद्यते इति दिक्।

प्रश्नकुण्डली



इत्थमनेकानि उदाहरणानि धातुमूलजीवचिन्ताज्ञापकानि भवितुमर्हन्ति, अत्र नवांशः विशेषतया अभ्यसनीयः। अथ स्वांशमङ्गम् त्रिकोणे इत्यादिवाक्ये अंगम्, त्रिकोणम् तु संज्ञया भवन्तः जानन्त्येव परन्तु त्रिकोणे अर्थात् पञ्चमे नवमे, अंगे अर्थात् लग्ने स्वनवांशम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

परनवांशम् वा तावत्पर्यन्तम् ज्ञातुम् न प्रभवन्ति यावत् लग्नादिद्वादशभावाः गणितेन नैव ज्ञाताः स्युः। तथा च **"स्वांशगः खेचरः"** **"अन्यभागस्थितः"** **"परांशोपगः"** वा ग्रहः तावत्कालपर्यन्तम् ज्ञातुम् न शक्यते यावत् भवतः पार्श्वे ग्रहस्पष्टाः न स्युः, नवांशविधिस्तु पठित एव। अत्र ग्रहस्पष्टीकरणम्, द्वादशभावस्पष्टीकरणम्, षड्वर्गादिसाधनञ्च सहायकग्रन्थेभ्यः अभ्यसनीयम्। अत्र प्रकरणेऽस्मिन् उद्धरणादिकम् येभ्यः ग्रन्थेभ्यः प्रदत्तम् तेऽपि विषयेऽस्मिन् पठनीयाः।

बोधप्रश्नाः

१. धातुनिर्देशकाः ग्रहाः के ?

.....

.....

२. मूलज्ञापकौ ग्रहौ को ?

.....

.....

३. जीवनिदर्शकौ ग्रहौ को ?

.....

.....

४. ग्रहाणां धातवः लेख्याः ?

.....

.....

५. पक्षिसंज्ञकद्रेष्काणाः के ?

.....

.....

६. धातुचिन्तायाम्स्वांशगः ग्रहः कम्पश्येत् ?

.....

.....

७. जीवचिन्तायाम् अन्यभागस्थः ग्रहः कम्पश्येत् ?

.....

.....

८. मूलचिन्तायाम् कः कम् पश्येत् ?

.....

.....

९. सूर्यशुक्रौ कीदृशम् मूलमुत्पादयन्ति ?

.....

.....

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१०. चन्द्रः कुत्र द्वादशभागे मनुष्यजन्मकारकः ?

.....

.....

४.४ प्रकारान्तरेण धातुमूलजीवचिन्तानिरूपणम्

भवतः कृते प्रश्नलग्नस्थनवांशवशात्, पञ्चमनवमभावस्थनवांशवशात् तदुपरि च स्वांशगतपरांशगतग्रहदृष्टिवशात् धात्वादयः चिन्तिताः तत्रापि लग्नस्थःस्वांशोपरि त्रिकोणस्थ स्वांशोपरि वा स्वांशगतलग्नोपरि त्रिकोणोपरि वा दृष्टिवशात् मूलचिन्ता वर्तते इति विवेचितम्। अधुना प्रकारान्तरेण इतोऽपि सरलविधिना लग्नस्थराशीनाम् (समविषयानाम्) मध्ये नवांशप्रयोगेन नवनवनवांशेषु त्रिरावृत्या धातुमूलजीवादिचिन्तानिरूपणं क्रियते। तत्र मुष्टिगत वस्तुविचारे हृदगतप्रश्नविचारेचोभयत्र अस्य विधेः प्रयोगः अतीव सरलतया कर्तुम् शक्यते तद् यथा पुनरेतदेव प्रकारान्तरेणाह –

जीवं मूलं धातुमंशक्रमेण
विज्ञायैवं युग्मभे प्रश्नकाले।
धातुम् मूलं जीवमित्यादि विद्या-
दोजे मुष्टौ हृदगते वा विशेषात्॥

पदच्छेदः

जीवम्, मूलम् , धातुम्, अंशक्रमेण, विज्ञाय, एवम्, युग्मभे, प्रश्नकाले, धातुम्, मूलम्, जीवम्, इत्यादि , विद्यात्, आजे, मुष्टौ, हृदगते वा विशेषात्।

अन्वयः

प्रश्नकाले, युग्मभे, अंशक्रमेण, जीवम्, मूलम्, धातुम्, एवम्, विज्ञाय, ओजे, धातुम्, मूलम्, जीवम्, इत्यादि, मुष्टौ वा विशेषात् हृदगते विचार्यम्।

प्रतिपदार्थः

प्रश्नकाले = यस्मिन् समये प्रश्नः स्यात् तस्य कालः एव प्रश्नकालः तस्मिन् इति प्रश्नकाले (प्रश्नलगने इत्यर्थः) युग्ममे = समराशौ लग्ने सति (वृषकर्ककन्यावृश्चिकमकर मीनानामन्यतमे लग्ने) वृषादिसमराशौ लग्ने इत्यर्थः) अंशक्रमेण = अंशः अर्थात् नवांशः तस्य क्रमेण नवनवांशेषु आवृत्त्या इत्यर्थः क्रमशः जीवम् = जीवचिन्ताजनकप्रश्नम्, मूलम् = मूलविषयकप्रश्नम्, धातुम् = धाम्याधाम्यधातुविषयकं प्रश्नमित्यर्थः विज्ञाय = ज्ञात्वा (वदेदिति शेषः) पुनश्च ओजे = विषमराशौ लग्ने स्थिते सति (मेषमिथुनसिंहतुलाधनुकुंभानामन्यतमे लग्ने) धातुम्, मूलम्, जीवम् (इति विपरीतक्रमेण) इत्यादि = क्रमशः विद्यात्। इदम् श्लोकद्वयोक्तम् मुष्टौ = मुष्टिगत-वस्तुज्ञानप्रश्ने, तथा विशेषात् हृदगते = हृदयगतप्रश्ने मूकप्रश्नविचारे बोध्यमिति शेषः।

विशिष्टार्थः

केवलम् प्रश्नलग्ने समविषमराशिमध्ये नवांशक्रमेण धातुमूलजीवादिचिन्ताविषये ग्रन्थकारः प्रकारान्तरम् निर्दिशति। तत्र समराशिमध्ये यस्य कस्यापि राशेः लग्नम् स्यात् तत्र लग्नस्पष्टवशात् नवनवांशेषु क्रमशः जीवम्, मूलम्, धातुम्, अंशक्रमेण विज्ञेयाः। अर्थात् समराशौ वृषादौ प्रथमनवांशकोदये जीवम्, द्वितीयनवांशे मूलम्, तृतीयनवांशे धातुम् पुनः चतुर्थ नवांशे जीवम्, पञ्चमे मूलम्, षष्ठे धातुम् पुनश्च तथैव क्रमेण सप्तमे जीवम्, अष्टमे नवांशे मूलम्, नवमे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नवांशे च धातुम् विज्ञाय प्रश्नोत्तरम् कथयेदिति शेषः। अर्थात त्रिरावृत्त्या समराशौ नवनवांशेषु जीवमूलधातूनाम् क्रमः विज्ञेयः। विषमराशौ लग्ने सति एष क्रमः विपरीतः अर्थात् धातुमूलजीवक्रमे विज्ञेयः। विषमराशिलग्ने मेषादिराशिषु प्रथमनवांशे सति धातुः, द्वितीये मूलः, तृतीये जीवः पुनः चतुर्थे धातुः, पञ्चमे मूलः, षष्ठे जीवः, सप्तमे च पुनः धातुः, अष्टमे मूलः, नवमे जीवः इति त्रिरावृत्तिषु विज्ञेयः। एष विचारः मुष्टिगतवस्तुज्ञाने, हृदयगत (मूक) प्रश्नविचारे उभयत्र प्रयोक्तुम् शक्यते। विषमसमराशिषु लग्नवशात् नवांशवशेन निम्नचक्रद्वारा एतत्सर्वं स्पष्टम् भवति।

विषमराशिचक्रम्

प्रश्नलग्नम्						अंशः	कला	वर्गः
मे.	मि.	सिं.	तु.	ध.	कु.	3	20	धातुः
मे.	मि.	सिं.	तु.	ध.	कु.	6	40	मूलम्
मे.	मि.	सिं.	तु.	ध.	कु.	10	0	जीवः
मे.	मि.	सिं.	तु.	ध.	कु.	13	20	धातुः
मे.	मि.	सिं.	तु.	ध.	कु.	16	40	मूलम्
मे.	मि.	सिं.	तु.	ध.	कु.	20	0	जीवः
मे.	मि.	सिं.	तु.	ध.	कु.	23	20	धातुः
मे.	मि.	सिं.	तु.	ध.	कु.	26	40	मूलम्
मे.	मि.	सिं.	तु.	ध.	कु.	30	0	जीवः

समराशिचक्रम्

प्रश्नलग्नम्						अंशः	कला	वर्गः
वृ.	क.	क.	वृश्चि.	म.	मीनः	3	20	जीवः
वृ.	क.	क.	वृश्चि.	म.	मीनः	6	40	मूलम्
वृ.	क.	क.	वृश्चि.	म.	मीनः	10	0	धातुः
वृ.	क.	क.	वृश्चि.	म.	मीन.	13	20	जीवः
वृ.	क.	क.	वृश्चि.	म.	मीनः	16	40	मूलम्
वृ.	क.	क.	वृश्चि.	म.	मीनः	20	0	धातुः
वृ.	क.	क.	वृश्चि.	म.	मीनः	23	20	जीवः
वृ.	क.	क.	वृश्चि.	म.	मीनः	26	40	मूलम्
वृ.	क.	क.	वृश्चि.	म.	मीनः	30	0	धातुः

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

४.४.१ विषमराशिषु नवांशक्रमेण धातुमूलजीवप्रश्नज्ञाने च (उदाहरणम्)

प्रियविद्यार्थिनः पूर्वं भवद्भिः ग्रहवशात् ग्रहदृष्टिवशात् च प्राश्निकस्य मनसि चिन्तितधातुमूलजीवानां प्रश्नसमाधानम् पठितम्। अधुना केवलं राशिवशेन तत्रापि प्रथमं विषमराशिषु नवांशक्रमेण धातुमूलजीवानाम् प्रश्नज्ञानस्योदाहरणानि दीयन्ते। तत्र सूत्रमस्ति– **"धातुं मूलजं जीवमित्यादिविद्यादोजे"** अत्र प्रथमम् उदाहरणम् यत्र लग्न स्पष्टम् ० - १० - २० - २१ राश्यादिकमस्ति। नवांशविधिम् भवन्तः जानत्येव। केवलमत्र विषयद्वयम् चिन्तनीयम्। लग्ने राशिः कः विषमः समो वा तत्र नवांशः कः प्रथमः, द्वितीयः, चतुर्थः .. नवमो वा। तेन क्रमेण एव धातुमूलजीवादयः ज्ञायन्ते। अत्र लग्नम् मेषः विषमराशिः, नवांशः चतुर्थः तत्र क्रमः अस्ति **"धातुम् मूलम् जीवमित्यादि विद्यादोजे"** अर्थात् चतुर्थे नवांशे धातुप्रश्नः विज्ञेयः।

एवमेव विषमे राशावेव द्वितीयमुदाहरणम् – यत्र लग्नस्पष्टमस्ति ४ - २८ - ३० - १० राश्यादिकम् अत्रापि लग्ने विषमराशिः अन्तिमः नवमः नवांशः तृतीयावृत्तौ अन्तिमः (नवमः) जीवचिन्ता प्रश्नः ज्ञेयः।

इत्थम् विषमराशावेव तृतीयमुदाहरणम् तुलाराशौ लग्नस्पष्टम् राश्यादिकम् ६ - ५-१०'-२०" अत्र तुलाराशिः विषमराशिः नवांशः द्वितीयः अतः मूलप्रश्नः विज्ञेयः।

४.४.२ समराशिषु नवांशक्रमेण जीवमूलधातुप्रश्नज्ञाने उदाहरणम्

तत्र सूत्रमस्ति– **"जीवम् मूलं धातुमंश क्रमेण विज्ञायैवं युग्मे प्रश्नकाले"** अत्र समराशौ एष क्रमः आवृत्त्या नवनवांशेषु बोध्यः। यथा उदाहरणम् प्रश्नलग्नस्पष्टम् राश्यादिकम् १-२°-३०"-२०" अत्र समराशिः लग्नम् प्रथमः नवांशः **"जीवम् मूलम् धातुम् विन्द्यात्"** इति क्रमे प्रथमः जीवः अतः जीवचिन्ता

वाच्या द्वितीयमुदाहरणम् : ५-७°-२०'-१० अत्रापि कन्याराशिः समराशिः, तृतीयः नवांश वर्तमानः अतः प्राश्निकस्य मनसि धातुचिन्ता वर्तते।

तृतीयमुदाहरणम् : ११ -२०-२१-२० राश्यादिकम् प्रश्नलग्नम् अत्र समराशिः मीनराशिः तत्र सप्तमः नवांशः द्विरावृत्तिक्रमे प्रथमः जीवः भवति अतः जीवचिन्ताविषयक प्रश्नः सिद्धयति।

बोधप्रश्नाः

११ विषमराशयः के सन्ति।

.....

.....

१२ समराशयः के सन्ति।

.....

.....

१३ विषमराशिषु नवनवांशेषु धातुमूलादिषु कः क्रमः।

.....

.....

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१४ समराशिषु नवनवांशेषु धातुमूलादिषु कः क्रमः।

.....

.....

१५ एकराशौ धातुमूलादीनाम् आवृत्तयः कति भवन्ति।

.....

.....

४.५ मुष्टिप्रश्नविचारः हृदगतप्रश्नविचारश्च

विज्ञाः छात्राः भवन्तः इदमवगच्छन्तु यत् ज्योतिषशास्त्रम् जनाः एकम् चमत्कृतिकरम् शास्त्रम् स्वीकुर्वन्ति। अत एव प्राश्निकाः इदमपि चिन्तयन्ति यत् प्रश्नाविद्याप्रवीणः दैवज्ञः प्राश्निकस्य हृदयगतम् चिन्तनम् प्रश्नम् वा अवगच्छति। परीक्षार्थम् जनाः इदमपि पृच्छन्ति यत् मम मुष्टिकायाम् किं निहितमस्ति, पिनद्धम् वा अस्ति, एतादृशाः प्रश्नाः प्राचीनकालतः जनैः दैवज्ञानाम् विद्यायाः चमत्कृतिदर्शनार्थम् पृच्छयन्ते। दैवज्ञाश्च उत्तरमपि प्रयच्छन्ति स्म। अत एव अस्य अध्यायस्य नाम मौष्टिकादिप्रश्नाध्यायनाम्ना कृतम्। अथ च द्वितीये श्लोके अन्तिमपङ्क्त्याम् ग्रन्थकारः निर्देशमपि करोति – **"मुष्टौ हृदगते वा विशेषात्"** केचन् ग्रन्थकाराः मूकप्रश्नविचारनाम्नापि एतादृशानाम् चमत्कृतिकराणाम् विषयानाम् उल्लेखं कुर्वन्ति। सत्यासत्यतायाः निदर्शनम् तु अभ्यासाधीनम्। मन्ये मौष्टिकप्रश्ने प्रष्टा पृच्छति यत् मम मुष्टिकायाम् किमस्ति तर्हि विचार्य प्रश्नलग्ने जीवचिन्तायोगे सम्प्राप्ते प्रश्नविद्याप्रवीणः निर्दिशति यत् कश्चन जीवः भवताम् मुष्टिकायाम् अस्ति, तर्हि सः पृच्छति कः जीवः अत्र इदम् तु निश्चितम् यत् मनुष्यादिकीटपतंगान्तम् यावत् सर्वे जीवाः जीवचिन्ताधीनाः परन्तु मुष्टिकायाम् स एव जीवः भवितुमर्हति यो हि मुष्टिकायाम् पिनद्धम् भवितुम् शक्नुयात्, सो हि कीटपतंगमशकपिपीलिकादिर्वा भवितुमर्हति, तत्र मनुष्यः पशुः हस्ती वा भवितुं नार्हति इत्थम् व्यावहारिकपक्षमपि प्रश्नविद्याप्रवीणेन चिन्तनीयम्। मनसि (हृदये वा) तु अनेके प्रश्नाः भवितुमर्हन्ति, अतः भवद्भिः छात्रैः अतीव सावधानतया अस्य पाठस्य अध्ययनम्, तत्तद्विषयकसहायकग्रन्थैश्च अभ्यासम् विधाय, इष्टबलम्प्राप्य च विबुधार्चनव्रतोपवासादिभिः वाक्सिद्धिं प्राप्य एव मुष्टिगतप्रश्नाः हृद्गतप्रश्नाश्च समुत्तरणीयाः।

४.६ सारांशः

भवद्भिः पाठकैः अस्मिन् चमत्कृतिकरे पाठे प्रश्नभूषणस्य मौष्टिकप्रश्नाध्यायोक्त विषयस्य अध्ययनम् कृतम्। तत्र प्राश्निकानाम् मनसि प्रश्नाः मुष्टिगतपदार्थाः वा धातुमूलजीवान्तर्गताः एव भवितुर्हन्ति। तेषाम् प्रश्नानाम् ज्ञानार्थम् आचार्य जीवनाथशर्मा श्लोकद्वये एव साररूपेण धातुमूलजीवेति विभागत्रये सर्वेषाम् प्रश्नानाम् उत्तरम् दत्तवान्। यः कश्चित् ग्रहः प्रश्नकाले आत्मीयनवांशे स्थितः प्रश्नलग्ने तत्कालोदितम् स्वांशमेव पश्येत् तदा प्रष्टुः धातुचिन्तां कथयेत् अथ च यदि लग्नगतम् स्वांशं न पश्यति तदा त्रिकोणे अर्थात् पञ्चमे नवमे स्थितं तमेव स्वांशम् पश्यति अर्थात् पञ्चमम् नवमम् स्थानम् स्वांशकसमेतम् पश्यति, यतो हि अत्र त्रिकोणे कथनस्य तात्पर्योऽयं आसीत् यत् लग्नपञ्चमनवमानामेक एव नवांशस्तुल्य कालमुदेति। अतः पाठेऽस्मिन् भवद्भिः मन्ये इदम् ज्ञातमेव यत् स्वांशकस्थो ग्रहो लग्नपञ्चमनवमानामन्यतमस्वांशकयुक्तम् पश्यति तदा धातुचिन्तां वदेत्। सुवर्णादि मृत्तिकान्तं धातुद्रव्यम् तत्रापि धाम्याधाम्यप्रविभागो ग्रहांशकवशाद्वाच्यः। पापग्रहांशक समवस्थितस्य धाम्यम् सौम्यमग्रहांशकसमवस्थितस्य अधाम्यम्। अनेन धातुचिन्ता पठिता अथ च यः

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कश्चित् ग्रहः अन्यनवांशकस्थः लग्नगतम् सवनवांशम् त्रिकोणयोरन्यतमगतं वा स्वांशम् पश्येत् तदा जीवचिन्ता वक्तव्या। पुरुषादिकीटपतंगान्तः सरीसृपान्तो वा जीवः , तत्रापि ग्रहयुक्तनवांशकवशात् द्विपदसरीसृपादिविभागः। मिथुनकन्यातुलाधनुःपूर्वार्द्धाः नराः, पक्षिणश्च, द्विपदाः ज्ञेयाः। मेषसिंहधन्विपरार्धाश्चतुष्पदाः। कर्कवृश्चिकक मकरमीनाः सरीसृपाः तत्र मीनो ह्यपदः अन्ये तु बहुपदाः इत्यनेन विभागेन जीवज्ञानम् पठितम्। अथ च यः कश्चिद् ग्रहः परांशोपगः (अन्य ग्रहनवांशे समवस्थितः) विलग्नगतम् त्रिकोणयोरन्यतमगतं वा परनवभागम् पश्यति तदा मूलचिन्ताम् वदेत्। अत्र वृक्षादितृणान्तम् मूलम तत्रापि ग्रहयुक्तनवांशकवशाज्जलजत्वम् स्थलजत्वम् वा विज्ञेयम् इत्थं ग्रहदृष्टिवशात् स्व परनवांशवशाच्च मौष्टिक्म्प्रतिपाद्य।

पाठेऽस्मिन् एकः सरलविधिः अपि प्रतिपादितः यत्र केवलम् समविषमराशिगत प्रश्नलग्नवशात् तत्रोदितनवांशक्रमाधारेणैव धातुमूलजीवचिन्ताः प्रतिपादिता। तत्र मेषसिंहः तुलाधनुःकुम्भराशिषु (ओजराशिषु) प्रश्नलग्ने वर्तमाने प्रथमनवांशे धातुः, द्वितीये मूलः, तृतीये जीवः पुनरपि चतुर्थे धातुः पञ्चमे मूलः, षष्ठे जीवः, पुनः सप्तमे धातुः, अष्टमे मूलः, नवमे च जीवः ज्ञेयाः। एवमेव अत्र वृषकन्याकर्कवृश्चिकमकरमीनाः समराशयः। तेषु लग्ने वर्तमाने प्रथमनवांशकोदये जीवम्, द्वितीये मूलं, तृतीये धातुम्, पुनश्चतुर्थे जीवम्, पञ्चमे मूलम् , षष्ठे धातुम्, पुनः सप्तमे जीवम् अष्टमे मूलं नवमे धातुम् जानीयत्। एष अतीव सरलप्रकारः। पूर्वप्रकारस्यापि निम्नचक्रेण स्पष्टता सारांशरूपेण सिद्धयति –

प्रश्ने धातुमूलजीवज्ञानचक्रम् –

	दृष्टिः	प्रश्नः
स्वनवांशे	लग्ने पञ्चमे वा नवमे भावे स्थिते स्वनवांशराशौ	धातुः
अन्यनवांशे	लग्नपञ्चमनवमानामेकतम भावगत-स्वनवांशराशौ	जीवः
अन्यनवांशे	लग्नपञ्चम नवमभावानामेकतमे भावे अन्यग्रहनवांश राशौ	मूलम्

४.८ शब्दावली

१. आदेशः = फलादेशः
२. नूनम् = निश्चयेन
३. स्पष्टखेटाश्रयः = ग्रहस्पष्टाधारितः
४. अन्तरेण = विना
५. गोलः = ग्रहगोलखगोलादयः
६. स्वांशगः = स्वनवांशे स्थितः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

७.	अङ्गे	=	लग्ने
८.	त्रिकोणे	=	नवपञ्चमे
९.	अन्यभागस्थितः	=	परनवांशे स्थितः
१०.	अन्यभागम्	=	अन्यग्रहनवांशम्
११.	परांशोपगः	=	अन्यग्रहनवांशे वर्तमानः
१२.	मन्दः	=	शनिः
१३.	इन्दुः	=	चन्द्रः
१४.	उरगः	=	राहुः
१५.	सवितृ	=	सूर्यः
१६.	भार्गवः	=	शुक्रः
१७.	महाधियः	=	तीव्रबुद्धयः
१८.	युक्तिः	=	कांस्यधातुः
१९.	रजतः	=	चाँदी
२०.	आयसः	=	लौहधातुः
२१.	हिमांशोः	=	चन्द्रस्य
२२.	हेम	=	स्वर्णम्
२३.	होरा	=	लग्नम्
२४.	सूरिः	=	शनिः
२५.	विबलैः	=	निर्बलैः
२६.	तोयस्थले	=	जलमये स्थलमये च
२७.	तरुभवः	=	उत्पन्नः वृक्षः
२८.	स्थलजलर्क्षपतिः	=	स्थलराशीनाम् जलचरराशीनां च पतिः
२९.	उत्तमस्वांशकः	=	वर्गोत्तमनवांशः
३०.	भत्रिभागगः	=	द्रेष्काणगः
३१.	अन्तः सारान्	=	अन्तर्गतः सारः तैलादिकम् (चिक्कणता) येषु ते वृक्षाः तान्
३२.	कटुकविटपान	=	मरीचिनिम्बादिवृक्षान्
३३.	भूमिपुत्रः	=	मंगलः
३४.	रुचिरम्	=	श्रेष्ठवृक्षम्
३५.	क्लीबे	=	बुधग्रहे

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३६.	चतुष्टयगते	=	केन्द्र (1.4.7.10) गते
३७.	द्विरसभागः	=	द्वादशांशः
३८.	सत्त्वम्	=	प्राणिनम्
३९.	वियोनिसंज्ञः	=	वृक्षाः, चतुष्पदाः
४०.	कूर्मादीनाम्	=	कच्छपादीनाम्
४१.	उदकजानाम्	=	जलोत्पन्नानाम्
४२.	वणिगंशे	=	तुलाद्वादशांशे
४३.	पारक्ये	=	अन्यग्रहनवांशे
४४.	स्मरसंस्थे	=	सप्तमभावगतेः
४५.	क्रियः	=	मेषः
४६.	वक्त्रम्	=	मुखम्
४७.	कुक्षिः	=	उदरः
४८.	अपानांघ्री	=	गुदद्वारम् चरणाश्च
४९.	मेद्रमुष्कौ	=	लिंगम् योनिर्वा, अण्डकौषौ च
५०.	स्फिक्	=	नितम्बः
५१.	खगे दृष्काणे	=	पक्षिसज्ञंकद्रेष्काणे
५२.	चरभांशकोदये	=	चरराशीनाम् मेषकर्कतुलामकराणाम् नवांशे लग्ने सति
५३.	खरतुरगाद्याः	=	गदर्भः अश्वादयः जीवाः
५४.	भुजङ्गाद्याः	=	सर्पाद्याः
५५.	शुकतनुनिभः	=	हरितवर्णः
५६.	सितः	=	श्वेतवर्णः
५७.	अतिरिक्तः	=	प्रगाढरक्तवर्णः
५८.	व्यापीतः	=	प्रगाढपीतवर्णः
५९.	चित्रः	=	बहुवर्णानां समाहारः
६०.	असितः	=	कृष्णवर्णः
६१.	पाटलः	=	ईषद्रक्तः
६२.	धूम्रः	=	धूम्रसदृशवर्णः
६३.	पाण्डुः	=	पीतः
६४.	कनकसदृशः	=	सुवर्णसदृशवर्णः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

६५. पिङ्गलः = ईषत्पीतः

६६. कर्बुरः = विचित्रवर्णः

६७. बभ्रुः = नकुलसदृशवर्णः

६८. स्वच्छः = शुभ्रः

६९. उद्भिजः = वृक्षपादपवनस्पतयः

७०. ओजे = विषमराशौ

७१. मुष्टौ = मुष्टिगतवस्तुज्ञानप्रश्ने

७२. हृदगते = मूकप्रश्नविचारे

४.९ सन्दर्भग्रन्थाः

१. बृहज्जातकम् – वराहप्रणीतम् – भट्टोत्पलटीकायुतम्

२. सारावली – कल्याणवर्मविरचिता

३. लघुजातकम् – वराहविरचितम्

४. भुवनदीपकम् – आचार्य पद्मप्रभुसूरिविरचितम्
(डॉ. वासुदेव शर्मा कृतसंस्कृतभाष्यसहितम्)

४.१० सहायकग्रन्थाः

१. षट्पञ्चाशिका

२. जन्मपत्रदीपकम्

३. बृहत्पाराशरहोराशास्त्रम्

४. जातकपारिजातम्

४.११ बोधप्रश्नोत्तराणि

१. शनिचन्द्रराहुभौमाः

२. सवितृभार्गवौ

३. जीवश्च सौम्यश्च जीवं प्राहुर्महाधिपः

४. ताम्रं स्यान्मणिहेमयुक्तिरजतान्यर्काच्च मुक्तायसी।
अर्कस्य ताम्रं मणयो हिमांशोर्भौमस्य हेमेन्दुसुतस्य युक्तिः॥

५. सिंहकुम्भराश्योः प्रथमः, तुलामिथुनयोः द्वितीयः द्रेष्काणः पक्षिसंज्ञकः।

६. स्वांशगः खेचरः स्वांशमङ्गे त्रिकोणेऽथवालोकयेत् धातुचिन्ता भवति।

७. अन्यभागस्थः ग्रहः स्वांशमङ्गे त्रिकोणेऽथवालोकयेत् जीवचिन्ता भवति।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

८. परांशोपगः ग्रहः अन्यभागम् अङ्के त्रिकोणेऽथवालोकयेत् मूलचिन्ता भवति।

९. अन्तः साराञ्जनयति रविः, पुष्पवृक्षांश्च शुक्रः।

१०. नररूपाणाम् तृतीयेऽंशे, कन्यायां ज्ञेयं नररूपाणाम् वणिगंशे नररूपा, एकादशे च पुरुषाः।

११. मेषमिथुनसिंहतुलाधनुकुम्भाः

१२. वृषकर्ककन्यावृश्चिकमकरमीनाः

१३. जीवमूलधातवः, जीवमूलधातवः, जीवमूलधातवः (त्रिरावृत्तिः)

१४. धातुः मूलम्, जीवः एवं क्रमेण नवनवांशेषु त्रिरावृत्तिः।

१५. एकराशौ नवनवांशेषु धातुमूलजीवानां त्रिरावृत्तयः।

४.१२ अभ्यासप्रश्नाः

१. ग्रहाणां धातवः निर्देश्याः।

2. ग्रहाणां मूलेषु आधिपत्यम् क्रमशः निर्दिश्यताम्।

3. ग्रहाणां जीवेषु द्विपदचतुष्पदसरीसृपादिषु आधिपत्यस्य कः नियमः?

4. नवांशाः कथं ज्ञायन्ते।

5. द्रेष्काणज्ञानसूत्रम् व्याख्यायताम्।

6. द्वादशांशविचारेण "चन्द्रोपगद्विरसभागसमानरूपम्" इति कथं विचार्यते।

7. स्वांशगः खेचरः स्वांशम् कुत्र पश्येत् येन धातुचिन्ता सिद्धयेत् उदाहरणम् प्रदेयम्।

8. परभागगः खेचरः कम् कुत्र पश्येत् येन मूलचिन्ता सिद्धयेत्, उदाहरणं प्रदेयम्।

9. परभागगः खेचरः कम् कुत्र पश्येत् येन जीवचिन्ता सिद्धयेत्। उदाहरणं देयम्।

10. समविषमराशौ धात्वादीनां चिन्ताक्रमः वृषमिथुनराशौ नवनवनवांशेषु पृथक् पृथक् प्रदर्शनीयः।

—•—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्वप्नः

संस्कृते पारम्परिक-आधुनिकज्ञानवैदुष्यस्य समन्वयनदृशा
संस्कृतशिक्षायाः वैश्विकपरिप्रेक्ष्यस्य उपस्थानम्।

सङ्कल्पः

- संस्कृतनिष्ठज्ञानसरण्याः उत्तमावबोधस्य सर्जनम्।
- संस्कृतशिक्षान्तर्गतानाम् अभिनवविषयाणां संवर्धनम्।
- आधुनिकसमाजोत्कर्षाय सम्भावनानां प्रकाशनदृष्ट्या संस्कृतभाषायाः तत्साहित्यस्य च प्रासङ्गिकतायाः आविष्करणम्।

Kirtikant Sharma Collection, Najafgarh